नं० ४३११-घ

प्रशस्त्र दीपिका प्रकाशप्रथमाध्यायद्वितीयतृ-तीयचतुर्थपादाः

नं० ४३११-घ

पत्राणि १००

मीमांसा

१४२. पत्राणि ३७४

३८२

४५००

शा० अ० १
१

श्रीमते रामानुजाय नमः ॥ श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ॥ ॐ । नत्वा गुरून् गणाधीशं वा
णीं चाभीष्टसिद्धये । प्राचीनर्षिगिरां दिशा व्याख्याले शास्त्रदीपिका ॥ १ ॥ प्राचीनैर्विस्तृतव्याख्यामूढ
धीनां स्वल्पचेतसां । उपकाराय यत्नोयं वाक्यार्थैकप्रकाशने । आम्नायस्य । अस्मिन्नध्याये कारि
ष्यमाणस्यार्थवादमन्त्रस्मृतिनामधेयादिविचारस्य शास्त्रसंगतिं तावद्दर्शयितुं शास्त्रार्थं प्रदर्श
नपरं प्रथमसूत्रार्थं दर्शयति । अथेति । अथ वेदाध्ययनानन्तरं अतः पूर्ववृत्ताध्ययनाद्धेतोर्धर्मस्य
जिज्ञासा । विचारः कर्तव्य इत्यध्याहारः । ननु कैः प्रकारैर्धर्मो विचार्यस्तत्राह प्रमाणेति । प्रमाणादिभि
श्चतुर्भिः प्रकारैरित्यर्थः तत्र प्रमाणं श्रुतिस्मृत्यादि । स्वरूपमग्निहोत्रदर्शपूर्णमासादि । साधनं
दध्याज्यपुरोडाशादि प्रयाजादि च फलं स्वर्गादीति विवेकः । हेयमपि धर्मप्रमाणाद्याभासास्तत्रापि हेया
इत्याशयेनाह साभासैरिति तत्र प्रमाणाभासाः शाक्यागमादयः स्वरूपाभासाः श्येनवदनादयः । सा
धनाभासाः श्येनत्वादयः फलाभासास्तु स्वर्गादयः एवं च प्रतिज्ञातशास्त्रार्थधर्मप्रमाणविचाररूप श्री रम:
त्वादस्य शास्त्रसंगतिरिति भावः अध्यायार्थं विवक्षन्नध्यायसंगतिं दर्शयति तत्रेत्यादिना । तत्र प्रमाणं १

कौ २

दिमध्यस्त्वर्थः। धर्मे किं प्रमाणमिति जिज्ञासायां प्रमाणं निरूप्यत इति योजना। तत्र प्रथमेऽध्याये प्र
माणं विचार्यते द्वितीयेऽस्य रूपं षष्ठे फलमिति शेषः साधनं प्रयोजनं हि परीक्षणा एवं तन्त्रशास्त्राभ्यासस्तत्र तत्त्वे बोधितबो
ध्यं। तेनेति। प्रथमसूत्रे प्रमाणसामान्यस्यैव प्रतिज्ञातत्वेनेत्यर्थः। संगतमेवेत्यन्वयः। ननु चोदनालक्ष
णोऽर्थो धर्म इति सूत्रे चोदनाया एव धर्मप्रमाणत्वप्रतिज्ञानात्तदर्थस्य च पुरुषप्रवृत्तिप्रयोजनार्थभावना
रूपभाव्यस्वर्गादिरूपकरणं आशस्त्यादिरूपेतिकर्तव्यता। लक्षणांशत्रयविशिष्टप्रवर्तनारूप
त्वात्तद्भाव्यस्य स्वर्गादिभाव्य। यागादिकरणप्रयाजादीतिकर्तव्यतारूपांशत्रयविशिष्टार्थभाव
नारूपस्यार्थवादार्पितप्राशस्त्य। मन्त्रस्मारित। नामावच्छिन्नधात्वर्थयागाद्यनुरक्ततयार्थवादमन्त्र
नामधेयानां चोदनान्तर्गतत्वेन तद्विचारस्यात्र संगतत्वेऽपि स्मृत्यादिविचारस्येह न संगतिरित्याशंक्याह
न हीति चोदनेति चोदनामात्रेत्यर्थः। लक्षणार्थः प्रध्यायप्रयोजनं। स्मृत्यादेरिति। आदिपदेनाचारसा
मर्थ्ययोः संग्रहः। प्रमाणेति। प्रमाणसामान्ये सर्थः उक्ते समन्तिमाह। तदिति। को धर्म इति स्वरूपप्रश्नः
कथंलक्षणक इति प्रमाणप्रश्नः। इत्यस्य प्रमाणसामान्यनिरूपणमेवाध्यायार्थ इत्याह सर्वस्मिंश्च

प्रा॰ प्र॰
२

तिप्रमाणलक्षणं सूत्रमित्यादिभाष्यकारव्यवहारादप्येवमेवेत्याशयेनाह इतिसमस्तामिति। इति हेतौ। तथा च
चोदनासूत्रे साक्षाद्धर्मप्रमितिकरणत्वाबोधनायाः प्रामाण्ये प्रतिज्ञाते तन्मूलस्मृत्यादेरप्युपलक्षण
तयात्तत्स्मृतित्वासिद्धिरिति भावः। प्रमाणसामान्यस्याध्यायार्थत्वोपपादनसमाप्त्यर्थस्वरम इति शङ्कते।
प्रमाणसामान्यविचारप्रवृत्तिसाधनफलमाह। तेनेति। प्रमाणसामान्यस्यैव विचार्यत्वेनार्थवादादेः
स्मृत्यादेश्च विचारस्याध्यायसंगतिः सिद्धेत्यर्थः। प्रकृतसंगतिः एतस्याद्यस्य प्रथमपादसंगतिः उच्यत
इति। शेषः उपजीव्योपजीवकभावसंगतेः पूर्वपादार्थस्योपजीव्यत्वं दर्शयितुं तत्रत्यौत्पत्तिकसूत्रसिद्ध
मर्थं तावदाह चोदनानामिति। प्रामाण्ये उपपादिते इत्यन्वयः। औत्पत्तिकत्वेनानित्यत्वेन तथा चेपस
षसंकेति तत्त्वप्रयुक्तात् प्रामाण्यात् प्रसक्तिरिति भावः। तदुत्तरतन्त्रेनाधिकरणसिद्धमाह वाक्यार्थे
तिमूलत्वत्तया। आकाङ्क्षादिमत्त्वेन तथा च तावत्तेव प्रमोत्पत्त्युपपत्तेर्न पूर्ववैदिकवाक्यतदर्थसंबंध श्री रामः
यहासंभवप्रयुक्ताः प्रामाण्यं तत्र हानेः पेक्षणादिति भावः। तदुत्तरवेदाधिकरणसिद्धमाह अनंतरेति वे २
दहारेणेतिकर्तृत्वादिप्रणीतत्वप्रयुक्तकाठकादिसमाख्यावगमितवेदपौरुषेयत्वहारेणेत्यर्थः। आशं

कितमिति । वेदानां पौरुषेयत्वे तदवयवानामपि तद्वत्वं भावादिति भावः । तामेतामाशंकां वेदपौरुषेयत्वहेतु
गर्भितभाष्योक्त्या दर्शयति । यथोक्तमिति । समन्त्रि हृष्टकालाद्दस्सु व्याख्याता इदानीं नेनारइति । वेदानां पौरुषेय
त्वेपि चोदनानां किं तत्राह तेचेति अवश्यं चेति भारतादिवाक्यसंघावयवेषु तथादर्शनादिति भावः अत्रेति
शङ्को भाष्यं यथासमाप्तौ । अपौरुषेयत्वेति । वाचा विरूपनित्ययेत्यादिश्रुतेः काठकादिसंज्ञायाः प्रवचन
मात्रेणाप्युपपत्तेरिति भावः । अन्तर्हितस्य प्रकृतोपयोगमाह एवमिति । प्रसक्तमिति । तथाच पूर्वपादसेनाऽऽ
चार्यप्रामाण्यप्रसंजनायोपजीव्यत्वात्संगतिरित्यर्थः प्रसंगएव वा संगतिः उक्तेऽर्थे वार्तिकसंमतिमाह त
दिति तत्पूर्वपादप्रमेयं इदमेतत्पादप्रमेयमुभयं संगृह्योक्तमित्यर्थः वार्तिकमुदाहरति सिद्धेति ननु पूर्वपा
दे चोदनाप्रामाण्यस्यैव व्युत्पादनात्तदंशः सिद्धप्रमाणभावस्येत्युक्तमित्याशंक्य श्लोकं तात्पर्यतो व्या
चष्टे अस्यार्थ इति सिद्धेति चोदनांशे सिद्धप्रमाणभावं वेदमित्यन्वयः विधेति विध्यर्थवादमन्त्ररूपेण
त्यर्थः तावन्मात्रस्य चोदनामात्रस्य विचार्यत्वे संदिग्धनिर्णीयत्वेन निर्णयप्रकारमेवाह नविधेरेवेति अत्र
त्रिमउपयोगशङ्कोत्तराप्यनुषज्यते न विधेरेव धर्मप्रमितावुपयोगः साधनत्वं प्रामाण्यमिति यावत् किं

शा·दी·सु·
३
3

तु विध्यर्थवादमंत्राणां सर्वेषामुपयोग इति प्रतिपाद्यत इति योजना । अत्रोपयोगपदे ऽन्तर्भावितशब्दोद्दिष्ट
त्वः । प्रतिपाद्यत इति नीतिशब्दस्योपक्रमस्थ नास्यार्थ इत्यनेनान्वयः सर्वशब्दस्य व्याख्यानं सर्वप्रकारमि
ति क्रियाविशेषणं प्रकारेण वा हविर्धीति विधिर्विधानं । स्तुतिर्मिरितित्व नीया ऽभेदार्थात्प्रकारपदेनान्व
ति । अनेन च त्वं श्लोकाक्षरगमनिका सूचिता । धर्मविषये विध्यंशो सिद्धप्रमाणभावस्य वेदस्य संबंधिनां
विध्यर्थवादमंत्राणां सर्वेषां सर्वशः सर्वैर्विधिस्तुतिस्मृतिप्रकारैरुपयोगः प्रामाण्यमित्यधुनोच्यत
इति एवं च सर्वशब्द इत्यस्य सिद्धपदेनान्वयानंगीकारान्नोक्ताधांकेति भावः अत्र सर्वशब्द इत्यस्योत्तरार्द्धेना
न्वयस्य स्वारसिकत्वाभावान्नामधेयस्य च परित्यागाद्दृश्याप्रकारान्तरेण योजनान्तरं दर्शयितुं तात्प
र्यमाह यद्वेति अत्र समस्तस्य प्रामाण्यं सिद्धप्रायमित्यनेन सर्वशब्द इत्यस्य सिद्धपदेनान्वयः सूचितः ॥
अर्थवादादीनां शास्त्रबोधकत्वाक्षिप्ते स्वयात्सागर्थादपि प्रामाण्ये संभावनामात्रं न तु सिद्धिरित्यभिप्रेत्य श्रीरामः
सिद्धप्रायमित्युक्तं आशंकेति सिद्धानुवादित्वादिति भावः स्थिरीक्रियत इति साक्षाद्धर्मबोधकत्वशास्त्र
भावेऽपि स्तुतसाधुप्रयोगोत्साहजननाद्यापादन इत्यर्थः ननु व्याख्यानद्वयेऽपि विधेरधुनोपयोगानुक्तेर्विधिग्रह ३

णं च्यर्थमित्याशंकामपनयन्नुक्तमर्थं विशदयति विध्यर्थवादेत्यादिना पूर्वं विधिः प्रमाणमिति बुद्धिस
त्त्वेपि विध्यर्थवादमंत्राः प्रमाणमिति विधिसंवलितवेदप्रामाण्यबुद्धेरेतद्विचाराधीनत्वाच्छ्लोके विधिग्रहण
मित्यर्थः श्लोकाक्षरगमनिकातु धर्मे विषये सर्वशः सर्वावयवेषु सिद्धः सिद्धप्रायः प्रमाणभावो यस्य वेदस्य
ति अन्यत्सामान्ये अस्मिन्नपि व्याख्याने नामधेयपरित्यागसामर्थ्यान्हचेदाह नामेति विधिशब्दस्यामुख्यार्थ
त्वान्हचेदाह यद्वेति अर्थोक्तिरिति अविधेयस्य स्तुत्यादेः संभवादर्थो प्यत्र विधिर्विधानोपयोगीकृत एवेत्यर्थः
अत्रेत्थं श्लोकयोजना सर्वशः कार्त्स्न्येन सामान्यतो धर्मे सिद्धः प्रमाणभावो यस्य वेदस्य संबंधिनो विध्यर्थवा
दमंत्राणां विशेषेण प्रामाण्यमधुनोच्यत इति अत्रापि विध्यंशे स्वार्थिकत्वे उच्यत इत्यसंगतेराह अथोद्भवे
ति तत्र विधौ सत्येव समीहितसाधनत्वप्रतीतिरिति विध्यभावादुडुंबरतायाः गर्वरोधसाधनत्वासंभवात्केरि
तिभावः अस्याधिकरणस्य सामान्यविचारे विशेषविचारे च तात्पर्यमभिप्रेत्य सामान्यरूपेणावस्य वेनन्तरपञ्जो
संक्षिप्य दर्शयति तत्रेत्याद्यभिधास्यत इत्यंतेन तत्रोद्भिद्विधिविचारे कर्तव्ये सति सर्वेषामर्थवादमंत्रनामधेया
नामानर्थक्यं अर्थबोधमेलक्षणः प्रमेयस्तच्छून्यत्वधर्मप्रमितिजनकत्वरूपप्रामाण्याभाव इति यावत्

शा·दी·प्र·
४
४

अतएवसामान्यतः प्रामाण्यस्य पूर्वपादएवसिद्धत्वादिहतत्साधनंमुधेतिचोद्यानवकाशः तत्रचोदनार्थप्र
क्तेनानपेक्षत्वेनार्थवादादीनांप्रामाण्योपपादकदोषाभावमात्रसिद्धावप्युक्तप्रामाण्यस्यासिद्धेरि
तिभावः स्वाध्यायेतिफलवदर्थावबोधोद्देशेनाध्ययनविधानादित्यर्थः अर्थवत्तयाधर्मलक्षणत्वमेवव
नेयाऽभिधास्यतइतिविधिनालेकवाक्यत्वादितिसिद्धांतसूत्रावयवार्थस्याविधेयोक्तत्वाकान्तहेतोःसकलस्यच
सांप्रदायिकमितिगुणसूत्रार्थस्याध्ययनव्रतनियमनोत्महेतोःस्वार्थवादवन्मंत्रनामधेययोरपिसाधा
रण्यादितिभावः पश्चात्सामान्यविचारानंतरं क्रमेणेति आदावर्थवादानांततोमंत्राणांततोसपदेना
मधेयानामित्यर्थः विशेषश्रुतेति अभिधास्यतइत्यनुषंगः स्तोतीति इतिविचारद्वयंरथ्यक्त्यादर्शयितव्यंपरंतुला
घवायसहैवमयाप्रदर्श्यतइत्यर्थः नचात्रविध्यतिरिक्तानामित्येतदुदाहृतवाक्यानेकविरुद्धंतत्रविधेरप्य
हणादितिशंक्यंतदविरोधिनोपितद्यारव्याप्रकारस्यप्रदर्शितत्वात् ॥ विचारद्वयस्यमंत्रादिसाधारण्यप्र
योजनमर्थवादानामेवोदाहरणेहेतुमाह तत्रेति स्तुत्यर्थेनविधानांस्युरितिसूत्रेणमंत्रनामधेययोरधि
करणान्तरदर्शनाद्ग्रहणसूत्राणामर्थवादमात्रविषयत्वाच्चास्मिन्नधिकरणेऽर्थवादानेवोदाहरत्यभिप्रा

श्रीरामः
४

रहूयंक्रियमङ्गमर्थः विचारविषयसुदाहरति वायुरिति एवमादीनां निवाक्यानां निशेषः विधीति विधिर्विधा
यकोलिङादिस्तद्व्याख्यात अर्थभावनातेदं शास्त्रयचभाव्यक रणेति कर्तव्यतारूपं स्वर्गयागद्रव्याज्यादितदति
रिक्तार्थकानीत्यर्थः नन्विह विधिभावनेति पदं हृभावनायास्त्याः पूर्वपक्षिणा तदङ्गीकारात् अन्ययाः र्थ
वादानामपि तदेशास्त्रयातगोतस्कृतिलक्षणेति कर्तव्यतांशकत्वेन प्रामाण्यावश्यकत्वान्नदशामाण्यपूर्व
पक्षानुन्मेषात् । शाणके च पूर्वपक्षेतस्यावकुधारत्वस्यानवगानेके च मिद्धान्तसमयेयत्नेन तत्पुसारस्यात् । अ
र्थभावना या विधिवाच्यत्वविशेषणं तत्र र्थवादादिगतार्ख्यातानामसुदाहरणत्वायतेषाम र्थभावनार्थक
त्वेप्यविधायकत्वेन विधिवाच्यार्थभावनातिरिक्तार्थकत्वात् स्मृत एव सामान्यविचारे मंत्रनाम [illegible]
[illegible] धणानामप्युदाहरणत्वसिद्धिः विचारांगसंशयमाह नानि किमिति तदर्थमिति तदेन्यतरकोटि
निर्णयार्थमित्यर्थः एवमग्रेपि बोध्यं विधुद्देशेन विधिवाक्येन अत्र विधुद्देशार्थवादयोः परस्परानाकांक्ष
त्वेएकवाक्यताभावात् र्थवादानां धर्मे प्रामाण्यासिद्धिः वेपरीत्ये वेपर्थ्यः समाप्यंते निराकांक्षा भवंति वि
धिस्यार्थेति अंशत्रयविशिष्टभावने सर्थः अयमस्वतो धर्मे प्रमापकत्वाभावरूपं सामान्यपूर्वपक्षसुपपा

२ रीत्यमिति फलफलिभावः । पूर्वपक्षं का
रिकया संगृह्णाति अर्थेति । मूलार्थेति

शा·दी·प्र
५

दृश्यमित्येवास्तु नेतीति संततवायुक्षेपिष्ठत्वादिकं च संतमद्विजादेवयजमेदिङ्गाह इत्यादिकं च धर्मेयद्दृष्टं
दृष्टान्तार्थं ननु मयूवदन्येनापि क्रियामुक्षेपि छेदमधिजवाभिसध्याहारादिनाधर्मावग्रमिति संभवस्तत्राह
न चेति। आदिशब्दात् तु यंभ्यादिग्रहः। सः। ओष्ठरेतं यत्नमाचे। हारामावरूपविशेषपरवेपक्षमाह। नाकांक्षत्वा
दिति। ननु प्रयोजनवदर्थलाभाया क्षिविधुद्देशापेक्षा तत्राह विशिष्टेति आख्यायिकेति वलवमानामपर
जाबभूषेत्येवमादिरूपाणामित्यर्थः लोके तथा ननु वेदे इति शोकेन स्वाध्यायेतिदृष्टः शाद् शक्तिलभ्यः तेन
अध्ययनविधिनार्थकल्पना। धर्मलक्षणार्थान्तरकल्पना। अथशब्दार्थबोधनशक्तो विधिशक्तेनापि दुः
संपादत्वादिति भावः। नन्वेवमर्थवादाध्ययनं निष्प्रयोजनं स्यात्तत्राह तदिति तेन तः प्रयोजनवदर्थान्तरकल्प
नाद्दूरेणरायणादिना साक्षात्स्वर्गादिरूपादृष्टप्रयोजनकल्पनामिति भावः नचैवमध्ययनस्याविधेयं
दृष्टार्थतार्थवादांशेत्र दृष्टार्थतेति वेरूपं स्यादिति शंकां। अध्ययनविधेरधीतस्वाध्यायेन यच्छं स प्र
योजनवत्त्वार्थादि स्वर्थकतयानुगमसंभवात् श्लोकोत्तरार्धं व्याचष्टे। नापि विधुद्देशापेक्षेति आकांक्षेत्य
नुषंगः विशिष्टेति अंशात्रयाविशिष्टाथभावनाप्रतिपादनेनेत्यर्थः ननु लोके गोः क्रयेसादो ह्दृष्टस्पर्धं
ने

श्रीराम:
५

बद्ध्रक्षीरेत्यादिश्रशंसा वद्देद्देप्यार्थवादिकप्रशंसा सापेक्षा स्तीत्याशंक्य निषेधति नचेति वैदिकविधेर्नि
रपेक्षप्रमाणत्वान्नलोकसाम्यमिति भावः किंचार्थवादैः शास्त्रार्थप्रशंसनं प्रतिपाद्यते न लक्षणया वा ना
धस्साहनचेति हितीयमुख्यापेत्यान्वयानुपपत्तिरूपतद्बीजाभावेनहृक्षयति लक्षणामिति ननु विध्येकवाक्य
तावगमितविशिष्टार्थतात्पर्यानुपपत्तिस्तद्बीजमिति शंकते एकेति परस्परमेकोक्त्याख्येकवाक्यत्वे हेतुः सा
चहृषितेति मत्वाहनचेति विशेषपूर्वपक्षमुपसंहरति तस्मादिति एवमर्थवादेषु स्तावकधर्मप्रमितिजन
कत्वाभावरूपः सामान्यपूर्वपक्षोहारविशेषाभावरूपो विशेषपूर्वपक्षश्चोपपादितस्तत्र सामान्यपूर्वपक्ष
मंत्रनामधेययोरप्यतिदिशत्येवमिति नहि शेषपूर्वपक्षस्कत न्नदधिकेशोदर्शी पिष्यतइति भावः सामा
न्यपूर्वपक्षमुपसंहरति तस्मादिति द्विविधपूर्वपक्षोपपादनफलमाह तेनेति अवधारणामूर्वपादहृदेति
शेषः इति शास्त्रस्यायक्रमगतेन पूर्वपक्षद्वयेनेन संबंधः सिद्धांतेकारिकया संगृह्णाति स्वाध्यायेति स्वा
ध्यायाध्ययनविधिनेत्यर्थः तत्र स वैद्द्संतेनेसामान्यसिद्धांतोक्तिरवशिष्टेन तद्विशेषोक्तिः ननु अध्यय
नविधेः स्वर्गादिनयायिपुरुषार्थपर्यवसानमुक्तमितिसाशंक्य सामान्यसिद्धांतभागं विवृणोति स्वाध्या

योतिहृष्टः फलवदर्थाववोधोऽर्थः प्रयोजनं यस्य विधेस्तत्त्वात्तथा च फलवत्त्वस्य वेदस्यैकरूप्येणाहृष्टप्रयोज
नसंभवे कश्चिदिह दृष्टार्थत्वेन वेदरूपं यथा कथंचिदनुगमकत्वं चायुक्तमिति भावः। अत एवार्थवादानां
विध्यपेक्षितप्राशस्त्यज्ञापनेन धर्मप्रमोपयोगित्वमिति विशेषासिद्धान्तभागं व्याचष्टे अर्थवादानां
चेति वाचकपदाभावाल्लक्षणया इत्युक्तं ननु मामेत्याशास्त्रधीर्यदर्थं लक्षणा लक्षितोऽनुक्तमते
तेन नेति वायुर्वै क्षेपिष्ठा इत्यादिवाक्येन तस्यार्थः प्राशस्त्यहेतुमाह क्षिप्रेति इतिहेतोरनन्तरेति अव्यवहितत्वे
त्यर्थः प्रयोजनेति अध्ययनविधेरर्थवादांशे याप्रयोजनाकाङ्क्षा तामित्यर्थः प्रत्युत अध्ययनविधि
नेति शेषः तथा च यदुक्तं विध्युद्देशार्थवादयोः स्वस्वार्थबोधनादेकैकेनैराकाङ्क्ष्यमिति तदसिद्धमिति भावः यदु
क्तं लक्षणा बीजमन्वयानुपपत्तिरिह नास्तीति तत्र तात्पर्यानुपपत्तिरेव तद्बीजमनुगन्तव्यमित्यर्थमाह
कस्मात्राध्ययनविधिरेवेत्याह स्वाध्यायेति यच्चोक्तमेकवाक्यतानिष्कर्षः विध्युद्देशस्य पुरुषप्रवर्तनायां विधे
यत्व सापेक्षायामर्थवादानां चाध्ययनविध्याक्षिप्तप्रयोजनवत्त्वाय स्वार्थत्यागेन प्राशस्त्यलक्षणाया
स्तात्पर्यापेक्षायां समभिव्याहारसिद्धपरस्परान्वयबलादेकवाक्यतानिष्पद्यत इति। पूर्वपक्षमनूद्य निरस्य

३ निःश्रेयसमार्गेति तदत एव निरस्तमित्याह. ततश्चेति

ति। यत्त्विच्छादिना प्राशस्त्यशक्तिलभ्योऽर्थ इत्यंशमंगीकरोति। सत्यमिति। तर्हि लक्षणानवकाश स्तत्राह
ल्लाक्षणिकोऽपीति। हेत्वेवं शब्दशक्तिलभ्य एवं परं परस्याप्रशस्तैव लाभादित्यर्थः। ते देवा ह द इत्यत इति। तर्हि सर्व
त्र लक्षणाप्रसंगस्तत्राह संभवतीति। अनंतरप्रवृत्तं विध्युद्देशाकांक्षितत्वादित्युक्तमुक्ताशंकानिरसनपू
र्वकमुपपादयितुं पुनरुपक्षिपति तद्धीति। तेनाप्राशस्त्यं विधिर्लिङादेः। प्रवर्तनायं पुरुषप्रवृत्तिजननाय। अ
यमाशयः लिङादिर्हि आख्यातत्वसामान्यरूपेणार्थभावनायां शक्तः। लिङ्त्वादिना विशेषरूपेण प्रवर्त
नाप्रेरणानियोगाद्यपरपर्यायशब्दभावनायां शक्तः। गामानयेत्यादौ गवानयने मां प्रवर्तयतीत्यादिबोधोद
यात्। सा च प्रवर्तना लोके वक्तुराशयः। स तु रूमः। वेदे तु वक्तुरभावाच्छब्दस्य लिङादेरेव धर्मः। अर्थभावना
वदंशत्रयवती च। तत्रार्थभावनैव भाव्यांशः स्वज्ञानं करणांशः प्राशस्त्यमितिकर्तव्यतांशः। तथा च लि
ङादिरर्थभावनारूपपुरुषप्रवृत्तिजननीं प्रवर्तनां बोधयितुं प्राशस्त्यमपेक्षत इति। यन्निरासार्थमयमु
पक्षेपस्तामाशंकामनुवदति। यत्त्विति स्वयमेवेति प्राशस्त्यज्ञानव्यवच्छेदः। तत्र हेतुगर्भमनपेक्ष इति।
निरपेक्षप्रमाणत्वादित्यर्थः। वास्याप्रवर्तकतां वारयितुं समर्थो हितेति। अयमर्थः। विधिर्हि लिङादेः।

शा.दी.प्र.

२

६ स्वर्गादिभाव्यकं । धात्वर्थकरणिकामर्थभावनां पुरुषप्रवृत्तिरूपां बोधयन्न तस्यां । तज्जन्यस्य धा
त्वर्थस्य साक्षात्करणत्वानुपपत्त्यार्थात्तद्विशेषणीभूतभाव्यस्वर्गादिसमीहितं प्रति तत्स्य करणत्वं
बोधयन् । तत्र पुरुषं प्रवर्तयेदिति । किमत्र लिङादिर्लिङ्त्वादिरूपेण प्रवर्तनारूपशब्दभावनां प्रतिपा
दयति तद्विषयत्वेनार्थभावनामाख्यातत्वेन बोधयन्नु क्रैरीत्या धात्वर्थस्य समीहितसाधनताबोधने
न तत्र प्रवर्तयत्याहोस्विज्ज्ञामप्रातिपाधेवेति विकल्प्याद्यमंगीकरोति सत्यमिति । विधिरेवेत्येवकारेण
लिङादिव्यवच्छेदः । स च द्वितीयविकल्पानिरासतात्पर्यकः । यथा हि यजतीत्युक्ते वैधप्रवर्तनानवगमा
त्तु न स्वप्रवृत्तिस्तथैव यजेतेत्युक्तेपि वैधप्रवर्तनानवगमे आख्यातोक्तभावनायाः पुरुषार्थभाव्यानाव
श्यकत्वात्समानपदोपात्तधात्वर्थस्यैव भाव्यत्वेनान्वयापत्तौ तत्र च क्लेशात्मकेन कोपि प्रवर्तेतेति । प्र
धानमिति । अध्ययनविधिना लिङादेर्विपुरुषप्रवर्तने नियुक्तत्वादिति आकरे स्थिते सिति भावः । ननु वि- श्री एम:
धित एव स्वतंत्रात्प्रवृत्तिसिद्धेः किं प्राशस्त्यज्ञानेनेत्याशंक्याह तस्यैवेति । न तु पुष्करणापेक्षा त्वात्
त्वविघातिनीति भावः । ननु कोसौ प्राशस्त्यकृतोनुग्रहः यदि फलसाधनेच्छारुचिः साफल इव साधनेपि

स्वतः किं न स्यादित्याशंक्याह फलइति साधने स्वतो रुचिर्न तु भवपराहतानां तत्तत्कष्टं कर्मेति द्वेष एव
स्वारसिकः फलरुच्या तु भवंती साधनेच्छा स्वारसिकद्वेषबाधेन वा प्रवृत्तिक्षमेत्यर्थः ननु मा भूत्साधने
रुचिः फलरुचिरेव साधने प्रवर्त्तयेत्तत्राह श्रेयोमुखं चेति रुचिरहंकारे ज्ञानेन स्यान्नत्वनुरुच्याऽन्यत्र प्रवृत्तिरिति प्रसं
गादिति भावः तर्हि फलसाधनतावगतिरेव साक्षात्प्रवृत्तिकरी किं न स्यात्तत्राह हितसाधनतेति जनयंसे
वेत्यन्वयः सत्यामपि न स्यात् तत्र रुच्यभावे प्रवृत्त्यदर्शनादिति भावः अस्तु तर्हि फलरुचिसहकृतसाध
नताधीजन्या रुच्या तत्प्रवृत्तिरित्याशंक्य प्रतिबंधकबाहुल्यात्तु क्वापि यापि तत्कुचेरनुदयात्तत्पनया
यथाशक्त्यावगतिरेव प्रयोजिकेत्याह सावेति साधनतावगतिः प्रतिबंधकान्याह प्रमादेति अवश्यकर्त
व्येष्वननुसंधानं प्रमादः तदभावेऽपि प्रवृत्तिमांद्यमालस्यं व्याधिना प्रागुक्ताः द्वेषादयः तद्युक्तेभ्यः पुरुषेभ्यः क
र्म रोचयंती पुरुषाणां कर्मणि रुचिं जनयंतीत्यर्थः स्वतः कर्मणि रुचिर्गुणाकर्षणेन तु सत्त्वविशिष्टे तत्त्वेदानीं
प्रसाधयामीत्याह अवगतेति इत्थं समर्थितां विधीनामर्थवादानां च परस्पराकांक्षामिवं धनामेकवाक्यता
मनुवदं स्तहेतुके प्राशस्त्यप्रकारा धर्मप्रमितिजनकत्वरूपमर्थवादप्रामाण्यमुपसंहरति तदेवमिति तस्मा

शा॰ दी॰ प्र॰
८
8

दध्ययनविधिविहितानां प्रामाण्यावष्टंभावादित्यर्थः एवं-उक्तरीत्या तामेवाह विधीनामित्या
दिनावशेनप्रवर्तमानानामित्यन्वयः दृष्टेष्टदृष्टप्रयोजनभूते प्रवर्तने-प्रवृत्तौ-निमित्तमप्रमी-प्रव
र्तमानानां-व्याप्त एवाना-नारूपप्रवृत्तिहेतुप्रवर्तनाबोधकत्वमिति यावत्तत्तद्दृशेनेव अध्यय
नविधिवशेनेव नियमः एकवाक्यताइति हेतोरेककार्यकत्वात् विशिष्टैकार्थबोधजननात्तत्तेषां वा
नुवादकत्वदशेनेति तत्रार्थवादेषूक्तं सामान्यसिद्धांतं मंत्रेष्वतिदिशति एवमिति ननु मंत्राणां विध्युद्दे
शवद्विधायकत्वेनार्थवादवद्धा स्तावकत्वेन प्रयोजनवत्त्वं किं न स्यात्तत्राह विधीति-निराकरणान्न-
विधिमंत्राधिकरणे भाष्योदाहृतेति शेषः किं तत्प्रयोजनं तदाह प्रकरणेति श्रादिना लिंगादिः। प्रधा
नेति। प्रयोजनिकथनं हृष्टमदृष्टं वेति प्रामाण्यमात्रसाधने प्रयोजनविशेषानाग्रहात्सामान्याभि
प्रायं। फलितमाह नाप्रामाण्यमिति नत्वहृयात्प्रामाण्यमित्यर्थः। सिद्धमिति शेषः प्रयोजनव
त्वेन प्रमितिकरणत्वरूपं प्रामाण्यं न सिद्ध्यतीति शंकते। ननु नित्यपदोपस्थापिताः पदार्था एव लक्षण
या वाक्यार्थप्रमितिं जनयंतीति सिद्धांतावष्टंभेन परिहरति नेव इति तत्स्मरंतिवेति। वाक्यार्थे प्रमाणे

श्रीराम॰
८

मित्यर्थः मंत्रविशिष्टमिति मंत्राद्युपकृतेन यागेन स्वर्गं भावयेदित्येवंरूपप्रधानविधिवाक्यार्थे मंत्राणां
पदार्थविधया प्रामाण्यमस्तीत्यर्थः ननु एवमप्युपकृतेन विधिस्तुतिस्मृतिभिः रित्युपक्षिप्तमंत्राणां स्मारक
त्वरूपं प्रयोजनं नायाविसिद्धमित्यत आह तेनेति पदार्थविधया प्रामाण्येनेत्यर्थः तथा च दृष्टादृष्टान्य
तरप्रधानोपकाररूपप्रयोजनसामान्यवत्तया प्रधानांगत्वात्प्रधानविधिवाक्यार्थघटकपदार्थवि
धया परं प्रामाण्यं मंत्रोक्तं । अत्र तु दृष्टार्थप्रकाशनरूपदृष्टप्रयोजनविशेषद्वारकं तु प्रामाण्यं मंत्राधिक
रणे वक्ष्यत इत्यर्थः अधिकरणं अधिकारः । मंत्रेषु सिद्धसामान्यसिद्धांतं नामधेयेष्वतिदिशति तथेति ·
उद्भिदादेरप्यध्ययनविधिपरिग्रहात्सामान्यतो धर्मप्रमितिजनकत्वरूपं प्रामाण्यं सिद्धं यात्वर्थोपरं
जनद्वारकं तु तस्मादेव वक्ष्यत इत्यर्थः परमप्रकृतमुपसंहरति सिद्धमिति हेतुत्वान्वयस्तु हेत्वधिकरणे नि
राक्रियत इति नात्र निराक्रियत इति कश्चित्तद्युतेत स्यार्थः आभाकरं तत्रेऽपि वादानां विध्यर्थे कार्ये हे
तुत्वेनान्वया हेतुसापेक्षत्वलक्षणम प्रामाण्यं प्राप्त निराकृतमिदमाधिकरणमित्युक्ते तदयुक्तं हे
त्वधिकरणेन येन नहत्वादिति। प्रयोजनं पूर्वपक्षे एतन्मंत्रादौ विश्वजिन्यायात्स्वर्गः फलं सिद्धांते त्वा

शा॰दी॰त्र॰ ९

र्थवादिकमित्यादि। तत्र आम्नायस्य वेदस्य तदुक्तानां क्रियार्थेन समाम्नानादिति क्रियार्थत्वावगमा
त् क्रियार्थानामर्थवादादीनामानर्थक्यं प्रयोजनवदर्थशून्यत्वं तस्मात् क्रियार्थं सर्वमनित्यं लौकि
कवाक्यवदप्रमाणमुच्यत इति॥ ॥विधिवर्गः॥ ॥आक्षेपिकीं संगतिमाह पूर्वेति तु शब्दो विशेषार्थः
तमेव पूर्वोक्तैकदेशांगीकाररूपं दर्शयन्नाक्षेपस्वरूपमाह यद्वित्यादिना केषुचिदर्थवादेत्वेन सिद्धा
त्यभिमतेष्वित्यर्थः सर्वं प्राक्षिरगात तत्र विधिनांगीकारादिति बोध्यं ज्ञानेवो हाहरति। यथेत्यादिना अग्नि
तशाखिनो संग्रसारभूते॥ सूक्ष्मोत्तरम् उच्यते उदुम्बररूपयोर्जायजमानो यमे ध्रुवः पशुरूपामूर्जमा
प्नोति ततोपपस्यौदुम्बरत्वमूर्जः संपादनाय भवतीति श्रुतेरर्थः अमर्षहेतु विधीति भवतीत्युक्त भवने
तेभावनाक्षेपोत्यप्युक्ताम अत्र औदुम्बरयूपं कुर्यादिति विधिसंभवादित्यर्थः विध्यभावपक्षे पश्वौदुम्बरतयोः
साध्यसाधनभावत्वमिति संभवादित्यर्थः विधिशब्दस्तु ज्ञातज्ञापनपरः विध्यभावपक्षेपि विधि भ
क्तिरहितेनासत्यपि विधौ नाथो विधिना विधावसमर्थवादत एवधिहन्तेयदेसादिय यकारव्यवहारा
दवगम्यते। संगतिमुपसंहरति इत्येवमिति इत्युक्तहेतोरेवमुक्तरीत्या अत्र उदाहतवाक्ये विचार्यते सदि

विर

श्रीरामः ९

स्पृते इत्यौदुंबरताया इति विहितौदुंबरतायाः। विध्यभावपक्षे इति श्रुतौदुंबरतायाः। फलं फलसम
र्पकं। सर्वः। ऊर्ग्वा इत्यादिरूपध्या इत्यनेन। विध्यभावपक्षे औदुंबर इत्यादिरूपध्या इत्यनेन। इति पर्यालो
तासमाम्नो। एवंजातीयकत्वमेवाह। विधिविभक्तीति। शाकोनेत्येहजेवरूध्या इत्यनेन फलसमर्पकेन च
न्येति विचारयोः फलफलिभावः। इतिरयं तत्पर्यचिंतासमाप्तौ। तत्रानयोः। संशयकोद्योर्मध्ये पूर्वप
क्षरूयत इति शेषः। यद्वा नाधो विधिनेतीत्यत्र न्येनेतिशब्देनान्वेति। एवमग्रेपि तत्र तत्र व्याख्येयं। पाठम्भू
नामौदुंबरतायाश्च साध्यसाधनभावरूपं पूर्वपक्षं वक्तुं प्रश्नं नानावृत्तसाध्यत्वमुपपादयन्नूर्जो मिनि।
श्रुत्येति। द्वितीयाचतुर्थ्योर्ह्येनमर्जयति धनायसेवत इत्यादौ साध्यार्थकत्वदर्शनादिति भावः। सिद्धांते दे
वमाह। लक्षणयेति श्रुतिसंभवे लक्षणानयुक्तेति भावः। इत्थोपि नार्थवादत्वमित्याह फलेति फला
र्थविधौ अर्थवत्त्वं धर्मप्रमापकत्वं। आनर्थक्यं तदभावः। यद्वा स्तुत्यभावे पि निरर्थवादविधिवाक्या
दिव प्रवृत्तिसिद्धेर्निष्फलत्वमित्यर्थः। साध्यांशमुपपाद्य साधनांशमुपपादयति। साध्यस्येति। उच्चारि
तमुक्तं। नन्वपेक्षितत्वेपि बोधकविध्यभावे कथं तदवगमस्तत्राह। सप्तमीति विधौ लिङादौ भूतमव्यस

शा·दी·प्र· १०

मुच्चारण्यायेनमृत्तस्योदुंबरत्वस्यभव्यपश्वस्समभिव्याहारात्तत्साधनतावगमइतिभावः। ननु तथापि विधि
तः प्रवर्त्तनानवगमे कथं प्रवृत्तिस्तत्राह साधनत्वेति। विधिरपि हि प्रवर्त्तनया समीहितसाधनतामाक्षिप्यैव
प्रवर्त्तयेत्साचेदुक्तन्यायादपि सिध्यति किं विधिनिर्बंधेन इतरथा स्वतः साधनतामेवगमादप्रवृत्तिप्रसंगादि
तिभावः। एवकारः प्रकृतमभिप्रायः। किमत्रभवतीत्युक्तभवनाक्षिप्तभावनाकाक्षया पश्वं तं भाव्यत्वेन सं
बंधः। आहोस्विदुक्तभव्यन्यायेनेतिविकल्पमभिप्रेत्याधनिरस्यति विधाविति। विधौ प्रवर्त्तनाबोधकलिङा
द्यन्यतमे भावनायाः। पुरुषप्रवृत्ते रौदुंबरताया अनुवृत्तेर्भव्यत्वोतिपदोक्तंतेनाक्षिप्तायाभवनं भावककव्यापारं
विनानोपपद्यतइतिकल्पितायाः सेयमौदुंबरतेव भाव्येति घटोभवतीत्यत्रैवोत्पद्यते भवनकर्तुर्घटस्यैवभावककुलाल
व्यापारभाव्यत्वदर्शनात्त्वइहापिस्यादित्यर्थः। फलं पशुरूपं भाव्यं न स्यादिति विपरिणामेनानुषंगः। अ
वैधप्रवृत्तेः पुरुषार्थभाव्यानावश्यकत्वादितिभावः। नियामकांतरमाह। सन्निहितेति भवनाक्षिप्तभावना
याः सा चौदुंबरता संनिहिता भवतीति पदसमीपगतो दुंबरपदेन शीघ्रोपस्थापिता पशुफलं त्वूर्जोवरुध्या इ श्रीराम· १०
ति विलंबितोपस्थितिकमित्यर्थः। फलितमाह। नैवमिति नन्विति। यादिविभक्त्या पश्वं नांसाध्यत्वाभिधाना

त्तिद्दुसाध्यसमभिव्याहारन्यायेनोक्तसिद्धिरिति द्वितीयमाशंक्याह। नेनेति। तथापि तनेत्यन्वयः। औ
दुंबरत्वस्यैव भाव्यत्वेनेत्यर्थः। अनर्थकं। अनपेक्षितत्वादनन्वितं सद्व्यर्थं स्यादित्यर्थः। ननु तत एव तु ऊर्ग्वा उ
दुंबर इत्युक्ते नौदुंबरत्वस्य स्तूयमानत्वाद्विधेयस्य च स्तुत्ययोगात्स्तुतिरेव तत्स्या विधिः कल्प्यते।
ततश्चाविहितस्य फलाकांक्षायामूर्जोवरुद्ध्या इत्येतत्फलार्थकतया सार्थकं स्यादिति शंकते इत्यर्थवाद
न इति। इति हेतौ उक्तवैयर्थ्यप्रसंगादित्यर्थः। इष्यत इति नैवेति चस्त्वर्थः उक्ताशंकाव्यावर्तकः स्तुतिप
रत्वेन विधिशक्तिं भवतीत्यस्य लेट्त्वमुपजनयन्निश्चाप्यपुनस्तेनैवेति ऊर्ग्वा उदुंबर इत्यस्य स्तावकत्वेन
दुपपाद्यार्थकतया तदेकवाक्यतापन्नस्योर्जोवरुद्ध्या इत्यस्यापि स्तुतावेवोपक्षयादिति भावः। वा भेति औ
दुंबरो यूपः इत्याशास्त्रस्य स्वपशाक फलभिन्नस्यार्थभेदेन वाक्यभेदप्रसंगादित्यर्थः। ननु सिद्धान्तेपि यूपो दुंबर
त्वस्यार्थवादोक्तरीत्या विध्यावश्यकत्वेपि अन्यांफलतानुपगमाद्धि फलविधानापत्तिरित्याशंक्य सोमायो
स्त्रं त्रैतमालभेत पशुकाम इति सन्निहिते विकृतियागे निर्देशाप्राप्तयूपोद्देशेनौदुंबरत्वविधिरुपपद्यमानस्य
च यूपद्वारा क्रतूपकारेणाफलत्वेनाकांक्षाया तस्मिन्नक्तु ।। गतफलसाधनत्वमुपचर्यते स्तत्यर्थोयम

शा॰दी॰प्र॰ र्थवाद इत्यभिप्रेत्योपसंहरति तस्मादिति उक्तफलकल्पनासंभवादित्यर्थः किंच द्वितीयपादेऽग्निं गच्छंस्तृ
११ णं स्पृशति ब्राह्मणाय स्वप इत्यादिषु समीहितसाधनार्थकत्वव्यभिचारात् स्वर्गकाम इत्यादिवत्कर्मपदाभा
वे साध्यत्वं दुःसाधमित्यभिप्रेत्याह न चेति चतुर्थ्येव सप्तपर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोतीत्या
दावपापश्लोकश्रवणादीनां फलत्वेन प्रतिपादनं न संभवति कामशब्दाभावादिति वक्ष्यत इत्यर्थः न हीति
नैतत्पुनरुक्तं तत्राहार्थवन्निति विधिविभक्त्यभावादौदुंबरत्वपर्णमयत्वादीनां साधनत्वान्वयायोग्यत्वाज्जुहूर्जौव
रुद्धेन स पापं श्लोकं शृणोतीत्यादीनामर्थवादत्वमत्रोक्तं तत्र कामशब्दाभावेन साध्यत्वप्रतिपादनाशक्ते
रर्थवादत्वमित्यपौनरुक्त्यमित्यर्थः उक्तविभागे विनिगमकाभावाद्वैपरीत्यस्यापि सुवचत्वात् स्वरसादाहाथ
वेति रात्रीति प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्तीत्यत्र स्तुतिसमर्पकस्यैव फलसमर्पकत्ववदित्यर्थः निरा
करिष्यत इति। तत्रान्यतः फलाकांक्षाया अशांतेरगत्या तथात्वमुदुंबरत्वपर्णतादीनां तूक्तरूपकामैकवत श्रीरामः
त्वाभावेनार्थवादिकफलकत्वमिति परिहरिष्यत इत्यर्थः न तु पशुकाम औदुंबरं यूपं कुर्यादिति गुणफलविधि ११
नैकवाक्यत्वसंभवेऽनतिप्रयोजनस्तुतिपरत्वेनैकवाक्यत्वमयुक्तं विधिकल्पनक्लेशस्याप्रसिद्धौ तद्विधेस्तु त्यक्तत्वादि

त्याशंक्योडुंबरत्वस्य सिद्धरूपस्य कर्तृव्यापाररूपमाश्रयं विनाफलेविधानासंभवादाश्रयो वाच्यः सचक्रि
सन्निधानाद्वा माद्याल्लभ्यतइतिविकल्प्याद्यमाह नचेति प्रकरणात्सन्निधानादित्यर्थः विकृतेः प्रक
रणाभावात् आद्यस्यासंतासंभवदुक्तिकत्वं द्योतयितुं तत्र दोषमनुक्त्वासंभवदुक्तिके द्वितीये दोषं प्र
तिजानीते तचेति प्रकरणादलाभे सतीत्यर्थः ननु कथमाद्यस्यासंभवदुक्तिकत्वं सन्निहितस्य यागस्य
पशुनियोजनस्यतद्विशिष्टयूपस्य वाश्रयत्वसंभवादित्याशंक्याद्यमयोग्यत्वेन दूषयति पश्विति प्र
कृतः पाठसन्निहितः गुणोत्रजातिद्रव्यगुणक्रियाद्यः तेनदाक्षायणयज्ञे न स्वर्गकामोपनेतपशुका
मइत्यादावावृत्त्यादिरूपगुणस्य दर्शपूर्णमासादिप्रकरणत्वाभावेपिन दोषः यथेति दध्नेन्द्रियकामस्य ज
हुयादितीन्द्रियफले विहितस्य दधिगुणस्याग्निहोत्रहोमवदित्यर्थः नचेति जातेरमूर्तत्वादित्यर्थः नचजा
तेरपिस्वपरिच्छेद्यद्रव्यद्वाराकारकत्वशक्तिरस्तीतिशंकांपरिच्छेद्यस्य स्वपागे कारकत्वाश्रवणान्नाभ्य
भ्युपेत्याप्याह नदाश्रयत्वइति गाश्रयत्वेपूयपदेनाश्रयणागानुवादासंभवाद्यपपुद्दानर्थक्यमपीत्यर्थः द्वि
तीयमाद्कत्वैयत्विति योग्यमितिं न त्वयूपे पशुर्नियुज्यतेतियूपस्य कारकत्वश्रवणादौडुंबर १० तायाय्य

ग·पशाकनाम्नानास्याछतोसन्निहितं· अतिदेशतःसन्निधिमाशंक्य दूषयति· नचेति· इहैभावे· अखंडोपकारं· सामा २

शा·दी·प्र· द्वाराकारकत्वयोग्यत्वाद्युपपदेनलक्षणयानुवादसंभवाच्चेतिभावः योग्यत्वेप्यसन्निहितत्वमपितत्तौ
१२ येनसदृष्टदूषयति नव्याति अत्रकृतंसोमार्घेणैव सर्वपदार्थविशिष्टत्वेनयागस्यानियोजनेस्यातिशेषः स्व व
रूपेणस्वातंत्र्येणादेशमाचाधिकरणन्यायेनापकारविशेषणतयैवपदार्थानामतिदेशादितिभावः ननु
विशेषतयोपस्थितिमात्रेणाश्रयत्वमस्तुतत्राहाविपरिवर्तमानइतिस्वरूपेणस्वतंत्र्यजयतेो अन्यान्वित
त्वेनोपस्थितस्यान्याश्रयत्वायोग्यत्वादितिभावः ननुविशिष्टविधौविशेषणानामिवार्थात्सदाद्यानामति दे
शात्पदार्थेष्टभावेनशास्त्राणामप्यतिदेशांगीकारात्स्वस्वधात्वेः पदार्थानांस्वातंत्र्येणोपस्थिति
रन्यथानवापिरूपानुवादेनौदुंबरताविधिर्नस्यादित्यत आह नादृशोति आतिदेशिकोसर्थः इष्टापत्ता
वाह नत्रेति एवंसन्निधानादाश्रयलाभस्यासंभवउक्तिकृत्वाद्युपपदेनैवयूपमुपस्थाप्यतस्यासिद्धरूप
स्याप्यनियोजनविशिष्टतयासाध्यत्वाद्याकप्रमाणेनौदुंबरतादृशेनाश्रयत्वयाविधिरितिपद्धतीयंत श्रीराम:
त्रप्रतिज्ञानंदोषंस्फुटयति नत्रेति तत्रसन्निधिवाक्यौमध्येवाअभेदः औदुंबरत्वेनफलभावयेत्तस्यचयू १२
पत्वाश्रयइत्येवंरूपः इध्मेद्रियकामस्यजुहुयादित्यादौययानामोदोषस्तथाद्वितीयेवक्ष्यते ग्राभाकरेस्त्व

त्रौदुंबरो यूपो भवतीति यूपोदुंबरत्वसंबंधविधेरूर्जोऽवरुद्धता प्रोतीतिफलश्रुदुंबरसंबंधविधेश्च प्रतीतेर्वाक्य
भेदो वा ऊर्जोऽवरुद्धता — प्रोतीत्यस्य स्तुतित्वप्रतीत्या वलवत्त्वेन न स्तुतिकोदुंबरताविधेर्भानादेकवाक्यत्वे वा
त्यनध्यवसायादप्रामाण्यमिति पूर्वपक्षे कृत्स्नैकवाक्यत्वस्य प्राबल्यात्संस्तुतिकविधिपरत्वमेवेति सि
द्धांतितं तद्दूषयति एकदेशिभिर्यदेकेनवाक्येनार्थफलसंबंधद्वयबोधनासंभवाद्वाक्यभेदो वार्थवैकवा
क्यत्वमिति सनध्यवसायरूपमप्रामाण्यमाशंक्य स्तुत्यर्थत्वं सिद्धांतितं तन्न दध्नेन्द्रियकामस्य जुहुया
दित्यादिषु गुणफलसंबंधविधिप्रस्थले दध्नश्चेन्द्रियकं होमः फलायविधीयत इति दध्नो होमसंबंधफलसंबंध
द्वयवाक्यभेदेनैव स्वीकृतत्वात् इहाप्येकेनैववाक्येनैव यूपौदुंबरसंबंधस्यौदुंबरफलसंबंधस्य च संभवाद्वाक्य
भेदाप्रसक्त्यानाहेदशपूर्वपक्षानुमेषादिति योजनाक्लिष्टेति अनध्यवसायपूर्वपक्षं समर्थयितुमानद्वयपर्य:-
अदृष्टत्वात् तत्क्षणादिजन्यसंस्कारविशिष्टरूपेणाशास्त्रैकगम्यत्वात् दधिहोमेति व्यतिरेकदृष्टान्तः त
-याच तत्संबंधस्य क्रियाकारकसंबंधतया लोकसिद्धत्वात्सनविधेयः किंतु लोकसिद्धं तमाश्रित्य
फलहोमसंबंध एव विधेयः दध्यादुरक्तरूपापत्त्यस्यैव होमस्य फलविधिविषयत्वाच्च फलार्थिनो निय

शा॰दी॰प्र॰ मेन दध्युपादानसिद्धिः तावतैवचास्मन्मते दधिहोमसंबंधस्यापि वाक्योयत्वव्यवहारः ॥ आश्रीपक्तफलहो
१३ मसंबंधएव औदुंबरतापाश्रयूपसंबंधस्य शास्त्रीयत्वात् फलसंबंधस्यापि तथात्वाद्वाक्यभेदाद्यपभावे
नानध्यवसायपूर्वपक्षोयुक्त इतिभावः ॥ तद्दसादितिप्रकृतेगुणाश्रयसंबंधस्यापि दधिहोमसंबंधवल्लौकि
13 कत्वसाम्यादितिभावः ॥ ननुयूपत्वस्यालौकिकत्वाद्वैषम्यमुक्तंतत्राह यद्यपीति यद्दृष्टमितितथापीति
शेषः लौकिकएवेति अन्यथाविशेषणसंस्कारस्यालौकिकत्वमात्रेणतद्विशेष्यकाष्ठजातिरूपगुणा
संबंधस्यालौकिकत्वे अलौकिकस्वतोदेशविशिष्टप्रक्षेपरूपहोमस्याप्यलौकिकत्वेनहोमसंबंधोप्य
लौकिकः स्यादित्यर्थः ॥ एवमनंगीकारेहेतुमाह यद्वेति नस्यादिति तत्रापियूपत्वस्यालौकिकत्वाद्गुणा
श्रयसंबंधेगुणफलसंबंधेचवाक्यभेदाद्यपभावादितिभावः वाक्यभेदसारं तत्वंगतमप्येकवाक्यत्वमनुपप
न्नत्वात्याज्यं तत्राह यदीति सुतरामिति तथाचनानध्यवसाय इतिभावः तत्राश्रयसंबंधस्यालौकिकत्वेपिवाक्या श्री॰प्र॰
न्तरात्सिद्धेर्नवाक्यभेदप्रसंगइतिशंकतेत्रत्येति नस्यादिति स्वादिरोयूपोभवतीत्यस्यगुणफलविध्युक्ति १३
नगुणाश्रयसंबंधबोधकत्वेनकृतार्थत्वाबोधकत्वादितिभावः उक्तमेवेतिपशुकाममुक्त्वापरश्लीपा

ष्टितिज्योतिष्टोमस्याग्नित्यफलार्थविहितालौकिकोमध्यस्थेस्वत्वापनेयउक्थ्योगत्यतइतिप्राकरणि
कवामस्योपक्षयाउक्थ्यसंस्थायानक्रत्वर्थता। एवं यत्कामोव्यूढच्छंदसाद्वादशाहेनयजेततेनास्मैकामः
समृध्यतइतिविधीयमानालौकिकव्यूढत्वेग्रहाग्रताविशेषरूपेऐंद्रवायवाग्रोग्राग्रयणीयोदृश्यनीयावथेत
रेषांदशानामन्हामैंद्रवायवाग्रंप्रथममहरथशुक्राग्रमथद्वेआग्रयणाग्रेइत्यादिव्यूढोसन्निवाभ
स्योपक्षयान्नव्यूढत्वस्यक्रत्वर्थतानहदित्यर्थः ईष्टापत्तिमाशङ्क्याह उभयेतिदधिग्रहस्योतोप्राजापस
दधिग्रहेगृह्णीयादितिदधिग्रहंगृह्णीयात्पशुकामस्येतिचविहितस्येत्यर्थः इतिवदतइतिदधिग्रहस्यक्र
तुपुरुषोभयार्थत्वेरवाहिरंहृष्टोतीकुर्वतस्तत्त्वादिरत्वमुभयार्थमिष्टमित्यर्थः यदिरवाहिरस्थलेत्र्याक्षे
पाद्वैध्यंतरकल्पनाद्वोश्रयेत्तामंत्रयात्रदात्रापितत्सभवात्तधानिरर्थकस्यत्यर्थत्ववर्णनमित्याशये
नाहन्त्र्यास्तामितित्र्यधिकरणार्थमुपसंहरतितस्मादितिविधीयतइतित्र्यर्थवादकल्पितविधिनाकल्पि
तलेटत्वेनभवतीतिपदेनवेतिशेषः अयोजनपूर्वपक्षेत्र्यौदुंबरतापाः फलार्थेनानुष्ठानेसिद्धांतेतुक्रत्व
र्थेनेतिसत्त्वेऽर्गवरोधफलस्यमानांतराप्राप्तत्वात्प्रापकमेवेदंवाक्यंनत्वर्थवादः यस्मादर्थवादस्मा

शा·दी·प्र·
१४

त्रमनर्थकमितिहेतुर्वा ॥ ॥संगतिं वक्तुं हेत्वमनूद्य तद्विचारयमाह एवमित्यादिना आनर्थक्यं प्रतियोगि
सिद्धं नञ्श्रुत्या निरसनीयं येषां ते तथोक्ताः एवमग्रेपि तथा चाद्येधिकरणे सर्वेषामानर्थक्यप्रतियोगित्वेन
द्वितीये तन्मध्ये केषांचिद्विधिप्रतियोगित्वेन विचारिता इदानीं तन्मध्ये केषांचन हेतुप्रतियोगित्वेन विचार्यन्ते
तथा च सर्वेषां विधिवाक्यगतानां न स्वस्वार्थे प्रामाण्यं किंचिद्धेतुविधिसंभवादित्याक्षेपात् संगतिरिति भावः । तत्के
वले लक्षणाद्दोषो वैयर्थ्यं चेत्याह अनर्थकेति कपिंजलवाक्यवद्बोधे स्वश्रुतिशक्तेरपि कल्पना विधि
रिति भावः । ननु वैदिकेर्थे हेतुरप्यनपेक्षित तत्राह्यर्थः । स्वतात्पर्ये तु विधेः श्रुतिशास्त्रकल्पनाद्गौरवमध्य
यत्र विध्यनुग्रहश्च स्यादित्यत आह हेतुस्त्विति वैदिकेप्यर्थेधिकार्थप्रापको हेतुः नाकर्ष दर्व्यादीनां होम
साधनत्वसिद्धिरिति मन्वानः पृच्छति कथमिति अन्तःकरणमात्रहेतुरित्याशयेनोत्तरमाह येनेति ननु व्या
प्तस्यैव हेतुत्वाद् अन्तःकरणत्वस्य च शास्त्रगम्यहोमसाधनत्वेन सह व्याप्तेर्लोकसिद्धत्वाभावात् कथं तस्य
तत्र हेतुत्वमिति शंकते । कथमिति हेतुत्वश्रुतिबलात् कल्पितवचनेन व्याप्तिसिद्धिरित्याह अत एवेति
तत्प्रयुक्तव्याप्तिवचनेन शूर्पस्यापि होमसाधनत्वसिद्धेः पुनस्तद्विधानं व्यर्थं स्यादत आह तेनेति सर्वेति सर्व

×५र्नैव्यर्थ्यं गस्तित्वात्र दर्व्यादीनामपि होमसाधनत्वप्राप्तिरिति भावः ४ ॥ अर्थः प्रयोजनम् ॥ ननु शूर्पगतान्तःकरणत्वहेतु× ४

श्रीराम:
१४

14

मन्त्रकरणं होमसाधनत्वेन विधत्त इति तथोक्तेन अवयुत्त्य सर्वेषु कामेषु शूर्पमात्रस्य पृथक्कृत्यानुवादः ए
वं चैकेन कल्पितवाक्येन शूर्पस्य दर्व्यादीनां च विधानान्न विषमशिष्टविरोधापत्तिरिति भावः ननु कल्पितव
चनस्यैव सर्वविधायकत्वे श्रुतवचनस्य कोपयोग इत्याशंक्य तदुपयोगमाह नेनेति श्रुतवचनसाहाय्येनं
त्यर्थः ईदृशं सर्वान्नकरणसंग्राहकं इदं वक्ष्यमाणं तद्देवाह शूर्पेणेति हेतोरित्यंतः श्रुतैकदेशः अत्र विशिष्टो
नुमितैकदेश इति विवेकः इतो न्यूनेन तरमिति शाखांतरे इष्टव्यां यदुक्तं शूर्पेण जुहोतीत्य सर्वयुत्यानुवाद इति तदयु
क्तं नेत्र हि शूर्पेण होतव्यत्वे प्रति ज्ञापनेन हीत्यनेन न हेतुरुपन्यसनीयमतस्त द्वाक्यमप्यहं जस्यानुवादत्वा
संभवान्न देव शूर्पस्य होमकरणत्वविधायकमित्याह शूर्पेणेतीत तीयया शूर्पेणत्यनयात थाच शूर्पस्य
दर्व्यादीनां च विषमशिष्टत्वमेवेति भावः ननु किं तदाह न नदिति न त्वस्य सक्षवचनविधिहितो आनुमानिके श्रेय
न ल्पबलत्वमुक्तं एवमधिकार्थलाभस्याशसिद्धेर्जनोर्वैय्यर्थ्यान्यत्रिशेषाहि धः स्मृतिशक्तिकल्पनागौरवप
८२ रिहाराच्च स्मार्तकत्वमेवाशयेनाह नचेत्यादिनों लाभांतरमाह सर्वं चेति ननु स्मृतिरप्यसदर्था कथं स्यान्न
हि शूर्पस्य होमसाधनता क्वापि क्रियत इत्युक्तवतेमा नान्न क्रिया संभवतीत्याशंक्य स्मृतेनोत्तस्यास्तता

15

नुरूप एवमाह क्रियत इति तदुपपादयति न हीति इयं गोरिहानीं बहुक्षीरेत्युक्तावपि वासीद्भविष्यतीति वाक्यो
क्तीत्यदर्शनादिति भावः लक्षणया प्राशस्त्यलक्षणाया ननु लक्षणैव दोषः। नाऽहीति रूपप्रयोजनसत्त्वात्
प्रस्तुतनैव दोषः नविधेः परः शब्दार्थ इति न्यायादित्यभिप्रेत्याह विधीति। अधिकार्थलाभस्यानिरस्तत्वान्नि
ष्प्रयोजनमित्युक्तं। कथानुपपत्त्या विधौ लक्षणेत्यत आह नैवेति वर्तमानान्वाक्रियादशायां होमाश
क्यावर्तमाननिर्देशो लाक्षणिकः पाकस्य वायुगहितस्यापुरस्त्वान्न करणत्वाद्धूपस्पर्शासंतव्यवहितस्य यो
२५ गान्तत्कंगान्तवन्नेस्यनेन लक्षणीयमित्यर्थः सूत्रेतेनस्यर्ने क्रियत इति हेतुविधिः स्यात्स्वर्गादीनामपि होम
साधनत्वापादनेनार्थवत्त्वाच्च हि शब्दश्चाप्युपपन्नेष्टः॥ ॥तदर्थ॥ ॥विधिसमभिव्याहृतार्थवादविचारानंतरं
तदसमभिव्याहृतमन्त्रविचार इत्येवं संगतिमाह गत इति ननु मन्त्राणामप्याद्याधिकरणे विचारितत्वात्पुन
स्तद्विचारो व्यर्थ इत्याशंक्याह तेषामपीति अर्थवत्तया सामान्यतो दृष्टादृष्टान्यतरप्रयोजनवत्तया पर्यवसि
ते सामान्यतः पदार्थविधयाप्रामाण्यमात्रं तत्पर्यवसानाय सामान्यस्य विशेषं विनापर्यवसानाभा श्री राम:
वादिति भावः। अर्थविशेषः अनुष्ठेयप्रकाशनेन शब्दविधया प्रामाण्यरूपः। उक्तं सैवमेवार्थवादाधिकरणे १५

ग्रंथकारेणैतेन मंत्राणामपि प्रयोजनवत्त्वात्प्रामाण्यमस्तीत्येतावृत्तिरिडमित्यादिनैवेह स्मारितमिति
बोध्यं। तेषां विचारोपयोगमंगत्वं संप्रमाणमुपक्षिपन् संशयमाह तेषां चेत्यादिना। प्रकरणेनैक्कत्वं गतत्वं क्र
मेणतत्त्वत्वं दार्थ्यं गतं। इदमुपलक्षणं लिंगानतिरिक्तानामन्येषामपि लिंगस्यैव पूर्वपक्षिणानमुपगमात्।
कुर्वतामिसत्वत्वेति शाब्दस्यापि चिंत्यत इति पूर्वेणान्वयः। अत्र तयोः कोद्योऽर्थे मध्ये दृष्टार्थता। अनुष्ठेयार्थप्रकाशन
रूपदृष्टप्रयोजनतायाः एवकारेण दृष्टव्यावृत्तिः। मंत्राणामाम्नानं नित्यवदाम्नानं अनर्थकं उपायांतरादे
वतत्प्रयोजनसिद्धेरितिभावः। ननु मंत्रैरेवप्रत्यायनाद् दृष्टकल्प्यते तत्राह प्रत्यायनादिति। मंत्रैरेवानुष्ठेय
प्रकाशनादित्यर्थः। ब्राह्मणेति। उच्चारणस्य वपुरुषप्रवृत्तिसाध्यत्वेन विधेयत्वया फलाकांक्षत्वात्तत एवा
दृष्टकल्पनं युक्तं न तु प्रत्ययस्य साध्यत्वेनाविधेयात्प्रत्यायनादित्यर्थः। श्लोकं व्याचष्टे। मा तेहीति। कल्पसूत्रो
पदेष्टृवचनाः। नीयग्रहणकवाक्यादिरूपेणेत्यर्थः। [illegible] × उपायेति × [illegible]
नित्यवदितिवृत्तिः स्वार्थे अर्थप्रकाशनार्थत्वे उपायांतरैः प्राप्तिकथाप्त्यानि साम्नानं विरुध्यतेत्यर्थः।
मंत्रेति। मंत्रैरेवप्रत्यायनादित्युपायानियमादिति यावत्। कल्प्येतेनित्यवदाम्नानार्थवत्त्वायेति शेषः। ननु

त्य१

कीदृशं दृष्टत्वमुच्चारणादेवेत्यवधारणं वा कुत इत्याकाङ्क्षायामवधारणे हेतुमाह तद्धीति उच्चारणमित्यर्थः
तस्मिन्नुच्चारणे स्वयमननुनिष्पाद्येन पुरुषव्यापारगोचरः ततश्च तदाश्रितनियमोऽपि निष्क्रियरूपत्वान्न
तद्गोचर इत्याशयः किं तत्तदाह स्वेति ततोऽपि किं तत्राह यत्रेति फलितमाह तेनेति दृष्टत्वञ्च दर्शयितुं तत्
स्यापुरुषत्वमाह नत्वित्यादिना उच्चारणादृष्टयोर्मध्ये प्रयत्नायनेन तदाश्रितमन्त्रनियमेन वा व्यवधानं
दूरत्वमित्यर्थः। न्यायतः पूर्वपक्षमुक्त्वा तत्र लिङ्गदर्शनमाह तथा चेति अदृष्टार्थत्वे सति तां चतुर्भिरभ्रि
मादत्ते उरुप्रथस्वेति पुरोडाशं प्रथयति इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इत्यादि
केन तस्मिन्मन्त्रप्रकाश्येऽर्थे मन्त्रविनियोजकं शास्त्रमपूर्वं घते अर्थप्रकाशनार्थत्वे त्वर्थप्रकाशनेन सामर्
थ्यरूपाल्लिङ्गादेव तत्प्रकाश्येऽर्थे विनियोगसिद्धेस्तदर्थं शास्त्रमनर्थकं स्यादिति पूर्वपक्षः आदिशब्देन यथा
धीतपदानुपूर्वीरूपवाक्यानियमादृष्टयोऽसंख्यतेन नु देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां श्री रामः
गायत्रेण छन्दसाददे अङ्गिरस्वदित्यादीनां मन्त्राणां लिङ्गेनाभ्र्यादाने विनियोगेऽपि तां चतुर्भिरभ्रिमादत्त इ
ति वचनं चतुःसंख्यारूपगुणविधानार्थं उरुप्रथस्वेति पुरोडाशं प्रथयतीति वचनमर्थवादरूपं इमा १६

मंत्रस्य बाधश्चेति त्रयो दोषाः स्युः उरु प्रथस्वेति पुरोडाशं प्रथयतीत्यस्य ब्राह्मणोपठितस्य ४४

मगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त इति वचनं मंत्रलिंगाद्विशेषादग्निचयने गर्दभरशनायामपि
मंत्रस्य प्राप्तावश्वरशनामेवादत्तेन तु गर्दभरशनामित्येवं तल्लिंगस्यार्थमतो नु तदर्थशास्त्रानर्थक्यमित्याशं
क्याह इतरथेति अश्वाभिधानीमादत्त इत्यस्य गर्दभरशनातो मंत्रव्याहत्यर्थत्वेऽश्वरशनाग्रहणरूपस्वार्थ
त्यागो गर्दभरशनावर्जनपरार्थस्वीकारो गर्दभरशनाग्रहणे लिंगात्प्राप्तस्य मंत्रस्य समानदेशे मंत्रलिंगकल्पि
तमंत्रविध्यपेक्षयाभिन्नदेशत्वेन तदर्थवादत्वानुपपत्तिः तथा देवस्य त्वेत्यादिमंत्राणां चतुर्णामाम्नानात्प्रच
यशिष्टा चतुःसंख्यासिद्धेति गुणविध्यर्थो तां चतुर्भिः शतिवाक्यमनर्थकमतः परिसंख्यार्थत्वे तत्स्वीकार
क्लेश एव दोषः स्यादित्यर्थः। यदुक्तमुच्चारणादृष्टमिति तत्र दृष्टसंभवे अदृष्टकल्पनं स्यान्याय्यत्वादित्सा
हयस्येति किं तदुच्चारणस्य दृष्टं फलं तत्राह अनुष्ठेयेति स्मृतेः स्मरणार्थं चोपधारणे ननु स्मरणं स्वरूपे
णानपुरुषार्थं तत्राह स्मरणं चेति प्रयोगद्वारा पुरुषार्थ इत्यर्थः ननु स्मरणमुपायान्तरादपि संभवति मं
त्रैरेव स्मर्तव्यमिति नियमादृष्टकल्पने ततो वरमुच्चारणादेव साक्षात्तत्कल्पनमित्युक्तमित्याशंक्याह य
स्त्विति प्रयोजनान्यथानुपपत्त्या ह्यदृष्टं कल्प्यते सा तु नियमे स्ति न तूच्चारणादिति भावः लिंगदर्शनं विघट

स्यामिन्नेदेशान्तरमात्रलिंगकल्पय x २

धा. दी. प्र. १० 17

यत्तिनद्दर्शेतिरागणेर्थेतिचतुष्टुसंख्यायाश्चादानांगत्वमप्राप्तंतांचतुर्भिरितिविधीयतेउक्तप्रयस्तोतिपु
रोडाशप्रथयतीत्यं [illegible] मंत्रविधिशेषत्वासंभवेप्यत्रेववाक्येपुरोडाशंप्र
थयतीत्यंशेनपुरोडाशप्रथनंविधीयतेउरुप्रथस्वेतिमंत्रकरणांशेनतुदेवप्रथनंप्रत्तपतिप्रथनप्रकाशक
मंत्रकरणकनात्मप्रशस्नमितिस्तूयतेतत्रश्चोरुप्रथस्वेतिमंत्रकरणांशोर्थवादः इत्यस्याभिधानीमादत्त
त्र इतिचलैंगिकविनियोगात्यागेवश्रस्यक्षत्वचनेनविनियोगादश्रामपरिसंख्येतिनत्रेदोष्याम्रितिस्तत्रेरेवप्र
रिहृतमित्यर्थः ननुअर्थस्मारकत्वमात्रेणकथमनधिगतार्थगन्तत्वरूपप्रामाण्यमित्याशंक्यमंत्रवर्णि
कदेवतासंकल्पकफलादीनांमित्थात्वेहिशिष्टधर्मप्रमित्युपयोगितयाप्रामाण्यसिद्धिरित्याशयेनोपसंह
रतितस्मादितिइति ॥ ॥इति श्रीचंपकनाथकृतौशास्त्रदीपिकाव्याख्यायां प्रथमाध्यायस्य द्वितीयः पादः
॥२॥ ॥श्रीरामः॥ ॥धर्मस्य। अस्मिन्पादेकरिष्यमाणस्यस्मृतिपुराणेतिहासकल्पसदाचारादिप्रा
माण्यविचारस्याध्यायसंगतिंवक्तुंधर्मप्रमाणसामान्यनिरूपणमध्यायार्थइतिप्रागुक्तंस्मारयतिकथमिति श्रीरामः
किंधर्मेप्रमाणंकथंचतस्यप्रामाण्यमित्यर्थः ततश्चप्रथमपदश्चानुसाराद्धर्मप्रमाणसामान्यगतस्त्वस्या १०

दिविचारोऽत्र संगत इति भावः । पादानन्तर्ये हेतुं वक्तुं पादहृदयार्थमनुवदति अत्र प्रथम इति साक्षाद्धर्मे प्रमाण
कत्वादादौ विधीनां ततस्तदेकवाक्यत्वादर्थवादादीनां प्रामाण्यं साधितमित्यर्थः एवं मूलभूते वेदप्रामाण्ये
सिद्धे तन्मूलकस्मृत्यादिप्रामाण्यविचारस्य मूलमूलिभावसंगत्यानन्तर्यमित्याह एवमिति अष्टका
दादिनामधेयानामप्याद्याधिकरणे सामान्यतः प्रामाण्यस्य साधितत्वाद्गुणविधित्वेऽपि प्रामाण्यपक्षे न
श्च कृतत्वस्येत्युक्तं । स्मृतीनां प्रायेण मन्त्रार्थवादमूलकत्वात्तत्प्रामाण्यस्य मन्त्रादिप्रामाण्याधीनत्वा
त्स्मृतिविचारस्य तद्विचारानन्तर्येणाभिधेयं नतु न कस्या अपि स्मृतेर्मूलमिति ननु द्विचारानन्तर्यपरिशेषात्स
र्वानन्तर्यमिति बोध्यं वैदिकपरिशिष्ट इति तत्र स्मृतीनामपि बोध्यं ननु चोदनासूत्रे विधीनामेव प्रामाण्यं प्रतिज्ञा
नात्तत्स्मृत्यादेरिह संगतिरिति चोद्यं तत्परिहारं च प्राक्कृतमपि प्राभाकरोक्तसंगतिदूषणाय स्मारयति
यद्यपीत्यादिना । सोऽत्र चोदनाशब्दस्य धर्मप्रमाणमात्रोपलक्षणत्वाभिप्रायेणाह तथापीति भाष्ये कथमि
ति पद्मसूत्रत्वप्रायेण प्रकारस्यैव प्रमाणस्वरूपस्यापि जिज्ञासाया अभिप्रेतत्वादिति भावः प्राभाकरसंगति
मनुवदति यत्त्विति अप्रामाण्यस्यादिति अतस्तत्परिहारायैव स्मृतिविचारो न तु संगतिरिति दोषः स्मृत्य

शा·ही·प्र·
१८
18

प्रामाण्ये वेदप्रामाण्यप्रसक्तिमुपपादयति यामित्यादिना। रात्रिं धेनुमिवायतीं। संवत्सरस्य या पत्नी
सा नो अस्तु सुमंगली स्वाहेति मंत्रशेषः प्रतीयत इति रात्रिदेवताप्रकाशकत्वादिति भावः। नन्वस्तु तस्य
मंत्रोक्तमेव तत्प्राच न स्मृत्यपेक्षत्वं तत्राह स्मार्तं चेति अष्टकाश्राद्धे इत्यर्थः रात्र्ये हुतं पिंगाक्षमित्यत्र
पर्यग्निकृतोत्सर्गो त्स्वाहांतमंत्रे स्तदंगत्वादन्यस्यापि श्रौतस्य प्रकरणाम्नानादि प्रापितमंत्राव रुद्ध
त्वादष्टकाश्राद्धांगहोमे रात्रिदेवतामेक इत्याश्वलायनोक्ते स्तत्र रात्रिदेवतामत्वाद्वन्दगत्वमेवास्येति भा
वः। नन्वस्तु मंत्रः स्मार्तकर्मांगं स्मृतिश्च प्रमाणं तावता कथं मंत्रप्रामाण्यमत आह तत्सापेक्षस्येति स्मृ
त्या रात्रिदेवत्यकर्मविधाने मंत्रे एतद्देवताप्रकाशनस्यानर्थक्यात्तद्विधानाय मंत्रस्य स्मृत्यपेक्षायां स्मृ
तेरप्रामाण्ये तदेकवाक्यतापन्नस्य मंत्रस्याप्यप्रामाण्यं स्यादित्यर्थः। ननु तथापि मंत्रमात्रस्याप्रामाण्यं
स्यान्न कृत्स्नवेदस्येत आह तस्मामान्यादिति न दृष्टांतेनेतरत्राप्यप्रामाण्यमनुमानादित्यर्थः। स्मृत्यप्रामाण्ये श्रीरामः
कृत्स्नवेदाप्रामाण्यप्रसंजकफलमाह तेनेति परोक्षसंगतिर्हृषयाम नेत्तदिति। एतत्सांगत्यमेवं परोक्ष
र्त्यान भवतीत्येतदुपपादयति यदाहीत्यादिना। सतिहि मंत्रस्य स्मार्तकर्मांगत्वे प्रमाणस्मृतिसापेक्ष १८

त्वादप्रामाण्यप्रसक्तेश्चैव। किंच मार्गाणां मंत्रगतं रात्रिदेवताप्रकाशनसामर्थ्यं स्मृतिवचनं वेति विकल्प्या
द्येऽपि सामान्यसंबंधबोधकप्रमाणमनपेक्ष्यैतदपेक्ष्य वा तत्राद्यं दूषयति न तावदिति। प्रकरणादिनाऽ
पूर्वसाधनक्रतुसंबंधावबोधने केवलरात्रिप्रकाशनेन मंत्रस्यानर्थक्यापत्तेरित्यर्थः। न द्वितीयः। ता
दृशप्रकरणादेरभावादिति भावः। ननु जलिनोत्तरया प्रपां जुहोतीति सायापमेव स्मृतिरप्यहोमे मंत्र
स्य विनियोजिका स्फुटवाचनिकविनियोगे न तु मंत्रप्रकाश्यदेवतानपेक्षणादिति द्वितीयमाशंक्य दूषयति
न चेति ननु ध्रुवयन्विधिरेव स्वाध्यायितमंत्रस्य दृष्टार्थलाभाय रात्रिदेवताकत्वेनाश्वलायनोक्ते कर्म
णि सामान्यसंबंधबोधक इत्यगत्या स्वीकारान्मंत्रलिंगान्मंत्रस्य विनियोग इति शंकते यद्यपीति मा
त्रपदेन स्मृसाधनगतक्रमप्रकाशण्यभाव उक्तः दूषयति। तथापीति। फलश्राद्धोऽधिकारपरः। साधिका
रशेषत्वे न हि निरधिकारस्य विनियोगो वाच्यः स च नात्र संभवतीत्यर्थः। किंच मंत्रस्याप्रामाण्येऽपि न ताऽप्रा
कृत्स्नवेदाप्रामाण्यमित्यभ्युपगमवादेनाह। सत्यपि चेति यदुक्तं न तु सामान्यादितरत्रापि तथात्वमिति तन्न
त्र किं तत्सामान्यं वेदत्वमुताप्रमाणसापेक्षत्वं नाद्यः आत्माश्रितत्वादव्याप्तत्वाद्दुष्टवदिति वद्भयोजकत्वा

शा॰ दी॰ प्र॰ दित्याह नहीति स्मार्यमित्येवं हेत्वभावयुक्तेः शास्त्रमात्रे कृत्स्नवेदे द्वितीयमाशङ्काया मिथ्यात्वं दूषयति अपि
१९ त्विति परसंगतिहृष्टप्रमाणामुपसंहरन् स्वाभिमतमाह नस्मार्यमिति इत्येवं क्रमेणाह धर्मेति यदुक्तमत्रैसोत्र
१९ श्रुतित्वाविरोध इतितत्र नाघसङ्गस्योपलक्षणत्वादभिप्रायं श्रागुक्तं स्मारयति नचैवमिसादिना व्याको
पाभावे हेतुमाह नहीति तन्मूलत्वेन स्मृत्यादेस्तदंतर्भावेनार्थवादादेः प्रामाण्यात्तदुपलक्षणत्वं प्रभा
वादिस्यर्थः विचारमारभते तदिहेति नजस्मात्तस्मृत्यादिविचारस्याध्यायसंगतत्वात् अतिविचार्यते नतुप्रा
भाकरवत्स्मृतिद्वारा वेदप्रामाण्यं विचार्यत इत्यर्थः पुंसां मन्वादीनां ननु मन्वादयः स्वयं धर्मे व्यवस्थाप
काः कथमन्यत्तं वदेयुस्तत्राह भ्रांतीति आहिनाप्रमादः संभावनया मूलकल्पने चोदनैव स्मृतेर्मूलं
ते॰ १ किं न कल्प्यं तत्राह चोदनेति स्मृतिमूलचोदनेत्यर्थः पुंसां प्रमाणतापमितवक्तृवाचारित्वरूपाश्रद्धे
मात्रनिमित्ताश्चारोपितेति यावत् अथवा पुंसां वचनाचारितेति शेषः प्रमाणता प्रमितिकरणत्वं श्रीरामः
ननु तेषु प्रमादेः साधकप्रमाणाभावेनाभावानिश्चयात्तत्रणीतस्मृत्यादौ प्रामाण्यनिश्चीयत इत्याशं
१९ कासाधकवद्बाधकस्याप्यभावात्प्रमादेः संभावनायां न प्रामाण्यनिश्चय इत्याह संभवदिति निश्चितेकि

त्वसंशयानास्कंदितं यथा तथा। स्वध्यवसाने सम्यक्त्वे तु शास्त्रं कदाचिदेव न तु संध्यानदशायां
निश्चितमपि पश्चात्संशयास्कंदितं भवतीत्यर्थः। ननु प्रामाण्यसंशयाद्धेतुकस्य प्रामाण्यस्य न काचित्क्ष-
तिरित्याशंक्यानुष्ठानलक्षणप्रामाण्यापत्तिरेव क्षतिरित्याह ततश्चेति। किंच पौरुषेयवचनप्रामाण्यस्य
मूलप्रमाणसापेक्षत्वात्स्वनिरूपणेऽप्रामाण्यमेव स्वध्यवसानमित्याशयेनाह किं नत्वप्रामाण्यप्रत्यक्षादिमू-
पं५ लत्वेनागममूलत्वेन वेति विकल्प्योक्तं दूषयति। किं चेति एषां स्मृत्याचाराणां श्रुती द्वितीये प्रत्यक्षस्याग्रहे
त्वोतदधीनसंबंधग्रहापेक्षस्यानुमानादेः सुतरां तत्राग्रहे त्वेरनुपलब्धे स्वाभावैकगोचरत्वादिति भा-
वः पौरुषेयत्वादेव वेदवन्मूलानपेक्षत्वं नेत्याशंकनीयमित्याह। न स्यात्तं श्रोणेति। द्वितीयं दूषयति। न चोद-
नेति। अनुपलभ्यमाना एव मूलं किं न स्युस्तत्राह। नहीति। ज्ञातस्यैव शब्दस्य बोधकत्वनियमादिति भावः॥
अनुपलभ्यमानत्वमसिद्धमित्याशंक्य तदुपलंभव्यापकस्योच्चारणस्याभावात्तद्व्याप्यस्योपलंभस्याप्य-
भाव इत्याशयेनाह न चास्मामिति व्यापकाभावोऽप्यसिद्ध इत्यत आह उच्चार्यमाणान्वेवेति वैयर्थ्यमिति प्र-
त्यक्षचोदनानामप्यवेदर्थानिष्ठानासिद्धेरिति भावः। ननु स्मर्तृभिः स्वकाले चोदनाउपलभ्यैव स्मृतिः प्रणीता

शा·दी·प्र
२०
20

नास्येदानीमुत्पन्नाः नच प्रणयनस्यैवेदमर्थमिदानींतनार्थत्वादित्याशंक्य दूषयति प्रागित्यादिना किं
मिति किंच तीत्यायाया एकस्याः शाखायाः प्रवृत्त्यादेः किं वा पठ्यमानासु शाखासु तत्तच्छाखास्थस्येत्यर्थः
एकशते एकाधिकशतं बाह्वृचं बह्वृचा ऋग्वेदिनस्तेषामाम्नानः सर्वकारपाठे वैदृश्यमेव बाह्वृच्यं स्मार्त
श्रुतेति स्मृतिमूलवचोहनेत्यर्थः आद्यस्य दूषस्य द्वितीयं दूषयति नापीति अध्येतॄणां प्रवाहविच्छित्तिः स
त्तां वा प्रमादेन तदुत्सादः स्यान्न चेत्तदुभयमित्याह अक्षीणेति उत्सन्नमूलत्वं निरस्याविच्छिन्नकीर्तिमूलत्वं
दूषयति नचेति उत्सन्नविच्छिन्नकीर्तिमूलत्वदूषणमुपसंहरति तन्नतावदिति प्राभाकरपक्षं दूषयति नापी
ति अंधेति अस्मदादीनामनुश्रुतिलिंगेन श्रुत्यनुमानमनयोरपि दृष्टमनुस्मृतिलिंगेन तत्स्याप्येवमन्या
न्यस्मृतिलिंगेनेतिन कस्यापि श्रुतिप्रत्यक्षमित्यर्थपरम्परोपदिष्टश्रोत्रादिवत्स्थितेः सिद्धेरित्यर्थः
तदेवाह यावद्धीति प्रत्यक्षयोग्यस्य शोत्सादेः सर्वप्रत्यक्षावसरे स्यादसंततनित्यानुमेयश्रुतेः प्रत्यक्षा श्री राम·
योग्यत्वादनुमानैकपरंपरयाप्यसिद्धिरिति शंकते नन्विति सर्वेषामनुहृदमनुश्वसतीनां लिंगादीति २०
आदिनावाक्यप्रकरणस्थानसामाख्याः तासामपि पूर्वपूर्वकल्पनाद्वारा श्रुतिकल्पकत्वाविशेषात् अ

अनुमानेऽर्थापत्त्यालिंगादिभिः श्रुतिकल्पनस्य दृष्टांतीकरणमनुमानार्थापत्त्योरैक्याभिप्रायेण । अथवांगी
द्विय श्रुतिगमकत्वमात्रे दृष्टांतः । अन्यथासिद्धत्वानन्यथासिद्धत्वाभ्यां वैषम्येण परिहरति विषम इति । उप
न्यासो दृष्टांतोक्तिः । श्रुतिमंतरेणानुपपद्यमानाः सर्वधूमधर्मसक्षा इत्यन्वयः तेन रूपेण सर्वैः प्रमिता इत्य
र्थः तथा च श्रुतेरेव धर्मे स्वतः प्रमाणत्वात्तां विनानुपपद्यमाना अनन्यथासिद्धाः । अन्यथासिद्धिमाह ध
तिस्तां कल्पयंती । नियन्तृघुक्रमिति योजना । पूर्वावाक्यस्य तु वाक्यार्थज्ञानमात्रकार्यत्वान्न श्रुतिं विनानुपपत्ति
रतोन्यथासिद्धत्वान्न श्रुतिकल्पकतेत्याह स्तं स्मरतीति कीदृगर्थविषया स्मृतिः कीदृशं ज्ञानं कल्पयते
कश्च कल्पनाप्रकार इत्यत्राह एकेति । इति हेतो वेदे सत्र संबंध्यते । नूनमित्युत्प्रेक्षायां । अयं स्मर्त्ता वेदजा
नाति अन्यथा तदर्थकवाक्यरचनानुपपत्तेरिति भावः । इत्येतावदिति इति एवं प्रकारेण एतावत् अष्टका
कर्त्तव्यता ज्ञानमात्रे एतावदित्यस्याव्यवच्छेद्यमाह न श्रुतीति श्रुतिं विना स्मृतेरनुपपत्त्यभावादिति भावः ।
अथवा प्राभाकरमते सुवाक्यस्यैव तज्ज्ञानानुमापकत्वेनैव प्रामाण्यात्तदेव प्रथममनुमीयत इत्यर्थः ॥
ननु प्रथमं श्रुतिकल्पनाभावेपि श्रुतिज्ञानकल्पनात् ज्ञानस्य च सविषयत्वनियमाच्छ्रुतिसिद्धिरि

शा॰टी॰
२१
21

त्यतश्चाह नापीति अनुपपत्त्यभावस्तुल्यत्वादिति भावः। ननु माभूत्स्वयमश्रुतितज्ज्ञानयोः कल्पनास्म
तुरर्थज्ञानकल्पनानन्तरं तदर्थज्ञानहेतुतया श्रुतिकल्पनमवश्यं भवेदित्यत आह एवमिति। हेयेति। ज्ञानस्य
हेयत्वं विनानुपपत्तेरिति भावः। नन्वस्माकं श्रुत्यसिद्धावपि स्मर्तुर्मे नोऽर्थं दृष्टमनुस्मरतीति लिंगेन श्रुतिसिद्धिरि
त्याशंक्य समाधमाह। एवं स्मरतीति। निष्प्रामाणिकेति। श्रुतिकल्पके प्रमाणाभावाच्छ्रुतेरनपेक्षितत्वादित्यर्थः।
ननु मूलप्रमाणनिश्चयं विना न परकीयज्ञानमात्रादर्थनिश्चयः। अंततो ज्ञानमपि परकीयं न निश्चायेदर्थं गो
चरव्यवहारस्यासंसर्गीय । हादृष्टिभिन्नवादेतो मूलश्रुत्यपेक्षास्तीति शंकते। अथेति। ननु मन्वादेरर्थज्ञाने मूलं
दृष्टमनुस्मरतीति रेवास्याधितिन श्रुतिः । तिसिद्धिः। स्तत्राह नचेति नच मूलानुसंधानापेक्षायां सत्यां संभावयेदिति
तदेति शेषः। तदपि स्मरत्यंतरमपि दृष्टमनुस्मरतीत्यपीत्यर्थः। अपिर्मन्वनुस्मरतीति दृष्टान्तार्थः। ज्ञानस्य दृष्टमज्ञानि
घ्नस्या। नार्थमिति। मूलानिश्चयादित्यर्थः। एवं तर्हि। दृष्टमनोरर्थज्ञानमूलं। ज्ञानस्य दृष्टमनोरर्थज्ञानस्य। श्रुति
रेवेति। श्रुतेरर्थज्ञानाजन्यत्वेन मूलानपेक्षत्वादिति भावः। श्रुतेः स्वविरचनहेतुज्ञानमूलानपेक्षत्वेऽपि स्वसक्षस्व श्री॰ राम॰
विषयज्ञानमूलानुसंधानापेक्षत्वादुक्तदोषसाम्यमिति परिहरति। श्रुतावपीति। मूलतयाऽर्थज्ञानमूलतया २१

नश्रुति सद्भावइति। स्वरूपसद्भूतेरर्थज्ञानाहेतुत्वादितिभावः। स्वव्याहतिमज्ञानान्तः शंकते श्रुतिविषये ए
वेति। तामेवदर्शयन्नुत्तरमाह। परज्ञानेनेति। अपेक्षेतिलइं करोतेति शेषः। तथाचेदानीं तत्यागे स्वव्याह
तिरित्यर्थः। तथापि कथमुक्तदोषसाम्यं तत्राह। मूलं चेति। स्मरणं तरमेवेति। नित्यानुमेयश्रुतिज्ञानस्य प्रत्य
क्षमूलत्वासंभवान्मूलांतरस्याप्रसक्तेः परिशेषाद्यथास्माकं स्मृतिसमानार्थकश्रुतिज्ञाने स्मृतिरेव लिंगवि
धया मूलं। तथा स्मृतिकारस्यापि मनोः श्रुतिज्ञानेऽप्यनुस्मृतिलिंगं विधया मूलमेवं तत्सर्वे प्रश्वेषोति न श्रुतिसि
द्धिरित्यर्थः। अर्थज्ञानहेतोरिति। स्मृतिरूपकार्यलिंगेन तद्धेतुमर्थज्ञानं कल्पयितातेन तद्धेतु श्रुतिज्ञानं
कल्प्यतइत्यर्थः। कश्चित्कल्पनावस्थायां कस्यचित्सुमः। अपिः क्वचिद्दियनेनापि संबध्यते। न त्वेवं लि
गादिभिरपि श्रुतिज्ञानमेव सिध्येदृश्रुतिरित्याशंक्यतेषां स्वतः प्रामाण्याभावाद्भूत्येवविनानुपपत्तिर्न
श्रुतिज्ञानेन विनानित्यवेदधर्मत्वेन ज्ञानकार्यत्वादिति प्रागुक्तवैषम्यं स्मारयति॥ लिंगादीनिवितियदि भा॰ष॰२
श्रुत्यसिद्धिर्भियामूलानुसंधानेविनाश्रुतिज्ञानेनेव श्रुतिनिश्चयः स्वीकार्येत्तदादोषमाह तेनेति श्रुतसि
द्धिप्रसंगेनेत्यर्थः। ततस्तदा। अर्थस्मरणेति। यथास्माकं स्मृतिलिंगकल्पितेन मनुनिष्ठार्थज्ञानेनार्थस्मे

वत्तिनिश्चयो न स्मृतिनिश्चयस्तथा मनोरपि स्मृत्यंतरकल्पितेन वहुमनुनिषिद्धानेनार्थस्यैव निश्चयं एवं प
वेशर्वस्येति न कश्चिद्दोषः स्मृतिमित्यादि सिद्धेरित्यर्थः। ननु ज्ञानेनैवार्थनिश्चयात्तदर्थमूलानुसंधानानपेक्षायाम
पि वक्तृतः स्मृतिकर्तुरर्थज्ञाने किंचिन्मूलं वाच्यं तत्राह। अत इति। इत्यापत्तिरिति तिनरस्य शंकायामाह अ
थेति। ननु प्रत्यक्षयोगप्रत्याभावेषमन्यमुक्तमित्यत आह चेति। एतत्रिया मूलानुसंधानापेक्षा
यामुक्तदोषमित्याह अथेति अन्यस्येति। श्रुतिसद्भावमेल मगयते स्मेति योज्या भयथामूलानुसंधान
सापेक्षत्वे तदभावे च। पूर्वपक्षमुपसंहरति अत इति। उत्तरमन्त्रविषयकं। एतेनि सानुमेयश्रुतिमूलत्वासंभवादित्य
र्थः। स्मृतौ नाचवेदमूलतेति प्रतिज्ञातमत्र हेतुः संभाव्येति। संभाव्यं संभावयितुं शक्यं वेद एव। मूलं यासु तास्त
त्वादित्यर्थः। ननु यासां स्मृतीनां मूलस्यापि संभवात्तासां हि ग्धायां हेतुरित्याशंक्य तन्निश्चयकानाह पूर्वार्धेन वैदिके
रिति। वेदोक्तमेव धर्मत्वेन स्वीकुर्वद्भिः स्मर्यमाणत्वात्। अत्र स्मृधातुः पाकं प्रवर्ततो सादावि वक्रिया सामा
न्यकरोत्यर्थकः। निबध्यमानत्वादित्यादि यावत्। नहि वेदोक्तमेव धर्मत्वेनाध्यवस्यंतो वेदानुक्तं धर्मत्वेन स्मर
न्यतो वेदमूलत्वमेव संभावितमित्यर्थः। केचित्तु वैदिकैः स्मर्यमाणत्वेपि वेदिकांतरैरपरिग्रहे वेदमूलत्वेनास्म

रणो वा वेदमूलत्वासंभावना स्यान्नतु नदस्मीत्याह तत्परिग्रहदार्ढ्यत इति। तद्ग्रहेनावैदिकत्वसामान्येन स्म
र्त्तीभिन्नाः स्मरसथा तु ष्ठातारे स्तद्वैदिकत्वस्मर्त्तारश्च परामृष्टे तेषां वैदिकानां परिग्रहो यथानुष्ठानं। दार्ढ्यं
च वैदिकत्वस्मरणं। ताभ्यां पंचम्यासमासित्वं। तत्र श्लोकहेतुत्रयेण वेदमूलत्वमेव संभाव्यमानत्वात्तदपवादे
कस्याप्यभावाद्वेदमूलत्वसिद्धिरिति न भ्रमादिमूलत्वं। नाप्यनुष्ठानलक्षणामूत्रामाण्यमिति भावः। श्लो
कस्यार्घपादं व्यतिरेकमुखेन व्याचष्टे। एवमिति। आस्थिता वेदोऽखिलो धर्ममूलमिति च। ते ज्ञातवंत ग
वेदमूलत्वेति। अष्टकादिस्मृतीनामित्यादि: न स्यात्संभावितमानस्यात्तु यदि तदा नोपपद्यत इति योजना। द्विती
यं व्याचष्टे। तथेति। अविगीता। अनिंदितापुरुषपरंपरागृहीता। परिग्रहोऽथानुष्ठानं दार्ढ्यपदस्य व्याख्या वैदिक
स्मरणमिति। अनुष्ठानस्य तात्कालिकत्वेऽपि वेदमूलत्वनिबंधनस्याविरतरस्थायित्वात्तेन स्मर्तॄणां दार्ढ्यमि
ति भावः। असमिति। असंभाविते। ननु मन्वादीनां वैदिकत्वे सति सर्वेषामेव तस्मात्तदेव संदिग्धमित्याशंकाम
पाकर्वन्स्तृतीयं व्याचष्टे। संभवतिचेति। इति हेतौ संभाव्यवेदमूलत्वादित्यर्थः। चतुर्थं व्याचष्टे। नादि तिस्मृतीना
मित्यादिः। केचित्तु वेदमूलत्वप्रतिज्ञायां संभाव्यवेदमूलत्वहेतोर्भ्रांतिमूलत्वसंभावनाप्रतिरोधादसाधकत्व

शा·दी·त्र
२३
23

माशंक्य तन्मात्साधकहेतुपरत्वेन पूर्वार्धं व्याचष्टे ननु स्मृतिमूलमतो वेदो नास्त्यप्रतीतेः प्रतीतमत्वे
चाऽबोधकत्वान्न तन्मूलतेति शंकते कथमिति। ननूच्चार्यमाणत्वे स्मृतिप्रणयनवैयर्थ्यमुक्तं तत्राह वि
प्रकीर्णत्वादिति। लिंगादीनामपौरुषेयत्वे योच्चारणनिरपेक्षश्रुतिस्वरूपकल्पने नाप्यनुपपत्तिः शंकते निःसा
नुमेयश्रुतिमूलत्वमंगीकृतमिह तत्तु च्चारितस्य मूलत्वासंभवात् विप्रकीर्णशाखामूलत्वमितिविशेषमंतत
च्छाखाध्यायिविषय्य यैवत्वमाहोपलंभेपीति। अनुपसंहरणीयानां। अवगमार्थानामुपसंहारो यथाविगमनः
न वैयर्थ्यमिति। अन्यथा अग्निहोत्रादिप्रत्यक्षश्रुतिमूलस्मृतिप्रणयनस्यापि वैयर्थ्यापत्तिरिति भावः॥
केचित्तु उपलंभेपि मेधावतां शाखांतरस्योपलंभेपि मंदधीभिः। नुपलब्धुमशक्यानामष्टकादीनामुपलंभः। फ
लमिति। व्याचष्टे। सत्त्वेषमेष्ववेदैकप्रमाणकत्वाहेतुरहितं स्मृत्यादिकं प्रमाणत्वेनानपेक्ष्यं स्यात्॥ ॥वि
रोधे॥ ॥ आपवादिकीं संगतिमाह उत्तरस्येति। उत्सर्गेतः प्राप्तस्य त्यपर्थः बाधकापनोदो नियमउत्सर्गः। न श्रीरामः
नश्चात्रयासुप्रामाण्यमपोद्यते नादितः परिविषयं पूर्वाधिकरणप्रसिद्धं प्रामाण्यं फलतीति भावः। प्रत्यक्षेति। औडुं २३
बरीस्पर्शेद्वा उद्गायेत् जातपुत्रकृष्णकेशोग्नीनादधीत आग्नीयेसंस्थिते यजमानस्य गृहे शितव्यमित्यादि

प्रत्यक्षश्रुतिविरुद्धा औदुंबरी सर्वा वेष्टयितव्या अष्टाचत्वारिंशद्वर्षाणि ब्रह्मचर्यं चरेत् । क्रीतराजको
भोज्यान्न इत्यादिस्मृतीत्यर्थः । औदुंबरी नाम ज्योतिष्टोमसदोमंडपमध्ये निखन्यमानोदुंबरकाष्ठस्थूणा
। पूर्वाधिकरणे प्रमाणाधिकरणासिद्धांतयुक्तिः पूर्वपक्षः पूर्वपक्षयुक्तिः । ननु सर्वत्र मूलश्रुत्यनुमानेन स्मृती
नां प्रामाण्यं साधितं न चात्र तत्संभवं मूलं कथमत्र पूर्वोसिद्धांतन्याय इत्याशंक्य निषेधति । नवेति । निषेधहे
तुः इत्येति । सर्वेष्टनस्मृतेः सर्ववेष्टनश्रुतिद्वयेत्यर्थः । युगपद्विरुद्धतदर्थानुष्ठानमशक्यमित्याशंक्य विकल्पेन तु श
कमित्यभिप्रेत्याह शास्त्रश्रुतिसंभवे दृष्टांतमाह । व्रीहीति । नन प्रत्यक्षेण स्पर्शनविधोप्रमीयमाणोकल्पितद्विरुद्धा
सर्ववेष्टनश्रुतिरनुमीयेत नहि वन्हावौष्ण्ये प्रत्यक्षीक्रियमाणे शैत्यमनुमातुं शक्यं व्रीहियवश्रुत्योस्तु द्वयो
रपि प्रत्यक्षत्वान्न दृष्टांततेत्याशंक्य वन्हावौष्ण्यशैत्ययोर्वस्तुत्वेन विकल्पेनाप्यसंभवादासंतिको विशेषः
इह तु श्रुत्योर्न साक्षाद्विरोधः किं त्वर्थद्वारा तत्स्य चानुष्ठेयस्य विकल्पयोग्यत्वाद्वैकल्पिकार्थकत्वेनोभयसंभवे
न रूप एव दृष्टांत इत्यभिप्रेत्याह यत्र हीत्यादिना निराकृत्येमित्यंतेन । द्वयोर्विषययोः । असंभव इति । विकल्पेना
पीत्यादिः । अपहारादिभाववबोधनात् । अनायासेन । साक्षात्तनुव्यभिचायादाविव च्याप्तिज्ञानप्रामशादिवि

घटनद्वारा। सामान्यत उक्तमुदाहरति वन्हाविवेति। अग्नौ क्षारात्य भेरोगस्य ध्याहार्यो। अङ्कते तं द्वेषम्यमाह य
त्रेति। तिद्वयेति। स्पर्शनसर्ववेष्टनश्रुतिद्वयेत्यर्थः। वैकल्पिकार्थकत्वेनेत्यादि। बाध्यबाधकतायां विषय
संभवासंभवाववतं तत्र न शैघ्र्यमापद्यते इति प्रेस्योक्तं। शीघ्रग्रहणमपीति। इतरत्। स्पर्शनश्रुति प्रत्यक्षं इतर
स्यानुमानस्य विषयं सर्ववेष्टनश्रुति। तद्विषयं सर्ववेष्टनश्रुतिविषयकं। नन्विदमपि वन्हौ क्षारादिवद्दसं
भावितमेवेत्याशंकायां वैकल्पिकार्थकत्वेन संभवस्योक्तत्वान्मैवमित्याह संभवति चेति। चकारो ध्याहृत स
र्थः। अत्र पूर्वोक्तेन महान्यायेन विहृष्टांतानाह व्रीहीति। यथा दर्शपूर्णमासयो व्रीहिभिर्यजेत यवैर्यजेते
ति श्रुतिद्वयं स्वस्वविषयस्येतरनिरपेक्षतया साधनताबोधकत्वेन युगपदननुष्ठेयार्थकं ज्योतिष्टोमे बृहद
द्रथंतरं भवति रथंतरं पृष्ठं भवतीति श्रुतिद्वयं पृष्ठस्तोत्रविकल्पवचनानुरोधाद्युगपदननुष्ठेयार्थकं अ
तिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति श्रुतिद्वयं भावाभावयोरेकस्मिन्प्रयोगे त्व
समावेशाद्युगपदननुष्ठेयार्थकं तद्वदित्यर्थः। सोपपत्तिकोक्तमुपसंहरति इतिप्रसक्तेनेति। इति हेतोरु
क्तयुक्तेरित्यर्थः। यदुक्तं बाध्यबाधकभावे संभवावेवतं तत्र न शैघ्र्यमापद्यते इति तस्य व्यभिचारशंकते।

संभवा

कथं नहीति। लक्षणयापि शीघ्रप्रवृत्तयापि श्रुत्यपेक्षं स्थीतं। अयमर्थः। शेषलक्षणो श्रुतिलिंगवाक्य
प्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रे। श्रुत्यादिषु प्रमाणेषु पूर्वंपू
र्वेणोत्तरोत्तरस्य बाध उक्तः। यथाग्निचयनप्रकरणे पठितः। कदाचन स्तरीरसि नेन्द्र सश्चसि दाशुषे इ
ति मंत्रः ऐंद्र्या गार्हपत्यमुपतिष्ठत इति अत्र श्रुत्या गार्हपत्योपस्थानशेषतया श्रूयते। इंद्रप्रकाश
नसामर्थ्यलक्षणेन तु लिंगेनेंद्रोपस्थानशेषतया तत्र लिंगस्य श्रुतिं विना विनियोजकत्वाभावो यावत् श्रु
तिं कल्पयति तावल्लक्षणया श्रुत्या लैंगिकश्रुतिकल्पनं बाधित्वा स्वविषये मंत्रो विनियुज्यते तल्लक्षणस्य
हेतोः श्रुतेः शीघ्रप्रवृत्तत्वात् लक्षणेन तु तत्रापि विकल्पादिनोभयश्रुत्यर्थानुष्ठानसंभवात् लक्षणयापि
श्रुत्या कल्प्या न बाध्येत अत एव सत्यपि संभवे श्रुतिशैघ्र्यादेव बाधदर्शनादुक्तनियमे सत्यत्र व्यभिचा
रः। एवं लिंगादिना वाक्यादिबाधेपि व्यभिचारो द्रष्टव्य इति। उक्तं व्यभिचारमुद्धरति उच्यत इति। द्विविधो हि
लोके प्रत्यक्षेणानुमानस्य बाधः एकस्तावत्प्रमेयापहाराद्यथा वह्नावौष्ण्यप्रत्यक्षेणाशैत्यानुमानस्य द्वि
तीयस्त्वनुमितिसामग्रीविघटनेन यथा सिद्धसाधनस्थले प्रत्यक्षहेतुकलिंगातयोगो बाधोऽनुमस्या

शा-दी-त्र- द्वितीयपक्षे गौणः मुख्ययोरेव च बाधाबाधयोः संभवासंभवं ज्ञात्वा नियमः । तत्र श्रुतिलिंगादिस्थले पूर्व
२५ स्य शीघ्रप्रवृत्त्या किमुत्तरस्याक्रमेण पक्षाः क्रियन्तेऽतोऽनुमितिसामग्रीविघटनं नायुक्तमाह नैवमत्रेति स्व
25 मश्रुतिप्रत्यक्षेण कल्प्यश्रुतेरभावावबोधेनान्यस्य पक्षे प्रामुख्यबाधात् तत्र तत्वान्तोक्तनियमव्यभिचा
र इति भावः । द्वितीयस्त्विष्ट इत्याह किंत्विति कल्प्यनामूले । श्रुतिसिसाधयिषाकुठत्वकृतूक्तो दोबीजाभा
वादित्यत्र कुश्रुतिसिसाधयिषायां बीजमाह पाठेति । आम्नानं प्रकरणे पाठः । प्रकरणे प्रधानं कर्म
श्रुत इत्यर्थः । अलब्धोपकारः श्रुतिकल्पनं मंत्रप्रकरणिनोः परस्परं शेषशेषिभावबोधकश्रुत्यनुमिति
प्रमाणवत् । इत्यत्वेन प्रमितं मन्त्रपाठस्य प्रयोजनाकांक्षा प्रकरणिनः उपकाराकांक्षा चोक्तश्रुत्यनुमित्सा
बीजमित्यर्थः । बीजमुक्त्वा तदभावेऽनुमित्साभावादनुमित्यभावमाह यदात्विति । लक्षणयोरेशगार्हप
त्यमित्यर्थेनया । द्वयोर्मंत्रप्रकरणिनोः नैराकांक्ष्यं शेषशेषिभावबोधनेनोक्ताकांक्षाद्वयशांतिः । म
त्रोच्छेदात् । अनुमितिमूलसिसाधयिषोच्छेदात् । आकांक्षाधीनेति । आकांक्षाहेतुकसिसाधयिषाधी श्रीरामः
नेत्यर्थः । नन्वेवमेव प्रकृतेप्यौदुंबर्यां स्पृष्ट्वा श्रुतिबाधितस्पर्शनसंस्कारेणाक्तेतोऽर्थत्वात्स्मार्त श्रुत्यनु २५
मित्साविघटनरूपो गौण एव बाध इत्याशंक्य वैष्णवपरिहरति · अत्रत्विति · न ह्यत्रौदुंबर्याः कृतार्थत्वायश्रु त्यनु

मिति रुध्यते किं तु स्मृतेः पौरुषेय्याः स्वविरचनमूलश्रुत्यपेक्षत्वाल्लिंगस्य तु न मूलापेक्षेति वैषम्य
मिति भावः। एवं मिसाधयिषाविघटने निरस्तेऽप्रमेयापहारादेरत्र बाधः संभाव्यतामसंचेन संभवतीत्याह
यदि परमिति। यदीति संभावनायां प्रमेयापहारात्परं विरुध्यते। यदि विरोधः संभाव्यते। न चैवं च स्मृत्यर्थः एत
देव स्फुटयितुमुक्तं स्मार्यस्य नेत्यादिनोक्तमित्यनेन। एवं प्रत्यक्षानुमेयश्रुत्योरर्थविरोधेऽपि न श्रुत्य
नुमानबाध इत्युक्तमिदानीं तयोरर्थविरोध एव नास्तीत्याह श्रुत्येवेति। श्रुतिः। प्रत्यक्षश्रुतिः। स्मृतिस्था
नश्रुतिः। तयोः प्रमेये इत्यर्थः। न तु प्रवर्तनयोः क्वचित् क्वचिद्यागपर्ययोः रसैव विरोध इत्याशंक्य न प्रवर्तना शा
स्त्रार्थः किं तु शक्तिः सा च फललोपप्रधानाभावेऽपि संभवतीत्याशयेनाविरोधमुपपादयति व्रीहीति। व्रीहिशक्तिः
व्रीहीणां प्रोक्षणस्य तद्द्वारा यागस्य वा निर्वर्तनशक्तिः एवं यवेऽपि। न तु प्रवर्तना शक्तिर्वा शास्त्रार्थ इत्यत्र
किं विनिगमकमित्याशंक्य व्रीहियवादिश्रुतीनामविरुद्धार्थकत्वलाभ एवेत्याशयेनाह शक्तिमात्रमिति। पू
र्वपक्षमुपसंहरति अत इति। प्रत्यक्षेण स्वयं न श्रुत्यानुमानस्य श्रुत्यनुमेयवत्वनक्तेः। विरुद्धानामपीति।
सर्वकल्पाभिप्रायेण प्रातेवती स्वाभिप्रायेण वा। प्रवर्तनैव शास्त्रार्थ इत्याशयेन सिद्धान्तमाह प्रामाण्यमि

रा० प्र०
२६
26

तिाविरुद्धानां श्रुतिस्मृतीनां मध्येऽन्यतराप्रामाण्यमित्यर्थः। नन्वौदुंबर्या अवच्छेदकभेदेनोद्गात्रा स्पृ
र्शनं वा समावेष्टनं च समुच्चायकमित्यत आह औदुंबरीमिति। वेष्टनसंकोचकप्रमाणाभावादिति भावः। वे
ष्टिताया उपरिस्पर्शः शक्य इत्यत्राह। वेष्टितां वेति। अथवानेन सर्वांशस्य शोद्गात्रा योग्यत्वं स्यादिति भावः। फलित
माह अत इति बाधः इत्यनेनान्वयः अशक्यविधानादित्यर्थः। तत्र हेतुरन्योन्यविरोधत इति। परस्परविरुद्धार्थ
कत्वादित्यर्थः। अनेन विरुद्धानामित्यस्य हेतुगर्भविशेषणत्वं सूचितं। एवं च सामग्रीविघटनेन बाधासंभ
वेऽपि विषयापहारे बाधः स्यादेवेत्यर्थः। नन्वनुष्ठानाशक्तिः पुरुषस्यैव दोषो न त्वर्थं बोधयतः शास्त्रस्य त
दृष्टो भयप्रामाण्योपपत्तेर्नान्यतराप्रामाण्यमित्याशंकामपनुदन् श्लोकं व्याचष्टे अशक्येति। मूर्धा
भिषिक्तं। मूर्धाभिषिक्तो राजेव सर्वजनप्रसिद्धं। शक्यमपीदृशादेववाक्यप्रमाणमन्यथा तदुपदेशवैफ
ल्यादिति भावः। न हि सत्यपि पक्षद्वयस्वरूपावबोधकत्वे उभयाप्रामाण्यं स्यादित्याशंक्याह अशक्यमिमि श्री राम:
ति। पौरुषेयापौरुषेयपक्षस्य बलवत्त्वाभावात्तर्कहीने सत्यपि पक्षद्वयोरुभयमेव बाध्यमिति भावः। २६
यवर्जनाशास्त्रार्थ इति पक्षे स्यादेवं न पक्षांतरे इति शंकते नन्विति। अतिप्रसंगेनाहृष्यति। तत्किमि

तिसागरतरणविधानमपि हन्तुमंतमित्रकं चिद्योगिनं प्रतिप्रमाणमेवान आह अग्नेनेति। अग्न्योक
हाग्निसेचनफलानुपधानान्न च्छक्रोमानाभावइत्यत आह तथेति अविरोधइत्यतिहाहवनीयेजुहोतीति य
सामान्यशास्त्रस्य ज्योतिष्टोमे सोमक्रयण्याः सप्तमेपदे जुहोतीति विशेषशास्त्रविरोधो नु स्यात्पदहो
मेप्याहवनीयस्य शक्तिसद्भावादित्यर्थः। सामान्यशास्त्रस्याविशेषशास्त्रेण बाधस्तस्यतत्रापि दुर्बलत्वा
त्तु विरोधात्तत्राहाविरुद्धस्येति। अन्यथाप्रकरणेक्रमसेनमंत्रादेर्लैंगिकविनियोगो न स्यादिति भावः।
श्रुतिलिंगादिन्यायेनत्वनुमितश्रुत्या विघटनेन श्रुत्यनुमितिनिरोधरूपोबाधो नेतराशंकनीय इत्याह। न चेति।
इवेति। व्यतिरेकदृष्टान्तं। तत्र हेतुमाह सामान्येति। श्रुतिकल्पनाप्रसक्तेरेवाभावादिति भावः। ननु होम
सामान्यस्याहवनीयरूपाधारसंबंधेऽप्याहवनीयशास्त्रस्य प्रत्यक्षत्वेन तत्क्रतोरपि पदहोमरूपविशेष
स्य तत्संबंधे तत्प्रमत्वाभावात्सामान्यस्य च विशेषं विनानुष्ठानापर्यवसानात् हि शेषाकांक्षितत्संबंधबो
धकश्रुतेः कल्पनीयत्वेनप्रसक्तौ तत्प्रमेनपदशास्त्रेण तदाकांक्षाशांसनात् विरोधाद्यमपि मूलाकांक्षो
द्वेदलतएवबाधइत्याशंक्याह तन्मात्रेणेति। सामान्येप्रत्यक्षमात्रेणेत्यर्थः। न निर्विशेषं सामान्यमिति

शा॰दी॰प्र॰ न्यायेन पदहोमातिरिक्तहोमस्य विशेषाणामिव पदहोमस्यापि विशेषस्याप्याहवनीयसंबंधे आहवनीयशास्त्र
२७ स्य प्रसक्तत्वात्तद्देशेन श्रुतिकल्पनाप्रसक्तिरिति भावः। प्रमेयेति। पदाहवनीययोरुभयोरपि युगपदाधा
27 रत्वविरोधादित्यर्थः। विशेषस्य शीघ्रप्रवृत्तत्वेन स्वार्थेनुष्ठापिते सामान्यशास्त्रस्य तद्देशेनानुष्ठापनमा
त्रेण न तु शक्तिरूपप्रमेयापहार इत्यरुचेराह। एवमिति। नभूपयसि दध्यानयति सा वैश्वदेव्यामिक्षेति यागोत्प
त्तिसमय एव शिष्टया आमिक्षया वाजिभ्यो वाजिनमिति सन्नयागे प्राप्ते हि हितस्य वाजिनस्य बाधो न स्या
दित्यर्थः। ननु तत्रापि सत्त्वावेवावगतया आमिक्षया द्रव्याकांक्षाशांतेस्तेव बाधो न प्रमेयापहारादित्यरुच्या
ह नित्येति। सप्तदशानुवृत्त्या दैश्यस्येति वैश्वानिमित्तेन सामिक्षेनो सामदशेपननिष्ठस्य तत्त्वां चूदधयस्य
बाधो न स्यादित्यर्थः। आदिशब्देन सावकाशनिरवकाशादिसंग्रहः। फलितमाह तस्मादिति। शक्ति
शास्त्रार्थतायाः अतिप्रसंगदुष्टत्वेन तद्वर्तनाया एव शास्त्रार्थतास्वीकारे पर्यायानुष्ठानाशक्तौ शास्त्र
योर्विरोधे नान्यतराप्रामाण्यं स्यादेवेत्यर्थः। अपि चेदमत्र शाक्तमित्येतावता प्रवृत्तस्य भक्तिछक्तिवादिना श्रीरामः २७
पि विधेः प्रवर्तकत्वाय शाक्तगोचरप्रवर्तने गौरवं ध्रुवं वाच्यः। ततो वरं लाघवात्प्रवर्तनैव विध्यर्थ इत्या

ह किंचेति। ननु प्रवर्त्तनाया विध्यर्थत्वेपीष्टसाधनताज्ञानं विना प्रवृत्त्ययोगात्सापि विध्य
५२ र्थो भूपेयेत्याशंक्याधिक्यत्वान्नेत्याह प्रवर्तनारूपे हीति। अर्थादिति। आत्मप्रवृत्तेर्नान्यथानु
पपत्तेरित्यर्थः। तथा च प्रवर्तनाया एव विध्यर्थत्वे प्रागुक्तमेव फलितमित्याह प्रवर्त्तनेनाचेति। नन्वाप्र
वर्तनानुपपत्त्येष्टसाधनताशक्तपवगतिवदाप्तोक्तेष्टसाधनताशक्तानुपपत्त्या प्रवर्तनावगतेरिष्ट
साधनतायां शक्तिरेव विध्यर्थः किं न स्यादित्याशंक्याह यदापीति कर्तुरिति। अन्यथान्यकृतेनान्यस्य
फलं स्यादिति भावः। ततः किं तत्राह न चेति। अथ शब्दाविधयो न प्रवर्तका इत्यत्राह ऊहसम्मतिमाह यथो
क्तमिति। स्वार्थप्रवर्तकमर्थं आख्यातानां लिङादीनां शक्तिः कारकनिष्ठा उपसंहरति तेनेति। अन्य
नरत्योरुषेयस्मृतिवचनमित्यर्थः। ननु स्मृतेः पौरुषेयत्वेप्यनुमेयश्रुतिसमानार्थकत्वादष्टकादिस्मृ
तिवत्प्रामाण्यं स्यादित्याशंक्याह तत्रेति। प्रत्यक्षेणास्पर्शनश्रुतिप्रत्यक्षेणानुमानस्य सर्ववेष्टनश्रु
त्यनुमानस्य। ननु कृप्रत्यक्षेणानुमेयश्रुत्यभावाबोधनात्कथं तेन तद्बाध इत्यत आह अग्राह्येति।
चेत्स्य प्रत्यक्षेणेति शेषः। न च तदभावज्ञानवत्तदभावव्याप्यवत्ताज्ञानस्यापि तज्ज्ञानप्रतिबंधक

शा॰दी॰प्र॰
२८
२८

स्यावच्छेदत्वाभावव्याप्यत्वेन गृहीतस्योपस्थापकपक्षेण शेत्यानुमानप्रतिबंधो युक्तः ननु प्रकृते तथा
संभवति विपक्षत्वश्रुत्यभावव्याप्यतया स्पर्शनश्रुतेरगृहीतत्वादिति वाच्यं प्रमेयपक्षे विरोधे प्रमाणयो
रपि तदवश्यंभावात् । परमप्रकृतमुपमेहरति इति सिद्धमिति । नन्वेवमुक्तरीत्या व्रीहिश्रुतिमूलपक्षेण
यवश्रुतिगोचरप्रमाणं बाध्येतेत्यत आह व्रीहीति । द्वयोः श्रुतिगोचरप्रमाणयोरग्रहप्रमाणे विशेषः
प्रबलदुर्बलभावापन्नयोरसत्त्वात् । एकेन । एकश्रुतिविषयकप्रत्यक्षेण इतरस्य इतरश्रुतिविषयप्रत्यक्ष
प्रत्यक्षस्य प्रत्यक्षानुमानयोस्तु प्रत्यक्षप्राबल्यस्य सर्वसंमतत्वेन पक्षे वैषम्यमिति भावः । ननु व्रीहिय
वश्रुत्योरन्यतराबाध उभयप्रामाण्ये युगपद्व्रीहियवानुष्ठेयो स्यातां न चैतच्छक्यते इतिमहत्संकटमि
त्यत आह । विरुद्धार्थत्वाच्चेति । आजपस्येन पाक्षिकबाधं विना । ननु तर्हि ईषदवसरदानेऽपि प्रसंगेन लभ्
क्वचन तेन यावत्स [illegible] इति मर्कटाइ इति न्यायेन सर्वथा अप्रामाण्यं स्यादित्यत आह । नचेति । दो
षः पौरुषेयत्वेऽहेतुः । ननु कोऽयं क्लेशः विधातरमास्थापितात आह इतिगतीति । ननु तत्वगतमेवाप्रामा श्रीरामः
ण्यं बाधितार्थकत्वमेव हि तल्लक्षणमित्याशंकां गूढाभिसंधिराह न चैवमिति । एतेन । बाधितस्याप्रामाण्यं २८

आभिसंधिमज्ञानं हृदंतः संजनि पत्यानामवशीकामनुवराति. नन्विति. अभिसंधिं प्रकटयन्नाह सत्यमिति. ४१

परंतु बाधे विशेषोस्तीत्याह नन्विति। पारमार्थिकस्तात्पर्यविषयः क्रीहशस्तर्हि बाधस्तत्राह किंत्विति। प्र
तिपक्षे। स्वार्थविरोध्यर्थकेयत्र शास्त्रं स्वरसतः। शाब्दं शक्तिमात्रात्। सार्वत्रिकः। यदीयप्रयोगसाधारण्यं
प्रत्ययः श्री हि शास्त्रजन्यः शाब्दबोधः बाध्यते यदीयप्रयोगांशोऽप्रमत्वेन निश्चीयते। एवं पूर्वशास्त्रजन्य
प्रत्ययोऽपि बाध्यः बाधफलमाह नेदं बाधाच्चेति। पाक्षिकेति श्री हि शास्त्रस्यापवादनाक्रान्तविषय एव तात्प
र्य। पूर्वशास्त्रस्य च श्री यन्नाक्रान्तविषय एवेत्यर्थः। अत एव हृष्टोतापि संप्रतिपत्तव्य इत्याशयेनाह सिद्धव
त्वमित्याह सामान्येति। आहवनीयशास्त्रस्येत्यर्थः। विशेषेति। पदेत्यर्थः। फलितमाह इतिनेति नन्वेवमे
वस्पर्शेन श्रुतिवेषन स्मृत्योरपि पाक्षिकपरत्वेन प्रामाण्यं किं न स्यात्तत्राह नचैवमिति। श्रुतिस्व
रूपेति। स्वारसिका पाक्षिकार्थत्वेत्यर्थः। स्मृतेर्बाधकत्वेऽप्यनुमितश्रुतिबोधिके साशंकानुमाना
नुत्पत्तिप्रयुक्तं स्मारयति। श्रुतिकल्पनस्यानिविरोधेन। विरुद्धार्थकत्वेन वेदस्य प्रमाणाभावव्याप्यस्यर्शि
नात्तद्दत्यत्य प्रत्यक्षश्रुतेः पाक्षिकार्थकत्वेन स्मार्तश्रुतिसंभवेऽपि कयास्पर्शेन श्रुतिप्रत्यक्षस्योक्तव्याप्यता
निश्चयात्तस्मान्नश्रुत्यनुमितिप्रतिबंध इत्याशयेनाशंकते नन्विति प्रत्यक्षश्रुतेः पाक्षिकार्थत्वेनकथं

नश्रुतिप्रत्यक्षप्रतिबद्धत्वेनेतियावत्। ननु पाक्षिकार्थकत्री हियवादिविरुद्धश्रुतिदर्श ५२

स्मार्तश्रुतिसंभवोतआह यस्मिन्न्यक्षइति। स्मार्तश्रुतिसंभवस्यैकरेतराश्रयत्वेनदुःसंपादत्वादुक्तव्याप्य
त्वनिश्चयेबाधकाभावइत्यभिप्रेत्याहनेति। स्मार्तश्रुतिसंभवेऽत्यक्षश्रुतेः याज्ञिकार्थत्वेनसिंध्यमति
सइत्यन्यान्याश्रयमुपपादयितुमत्याक्षिकार्थत्वंस्मार्तश्रुतिसंभवैककल्प्यमेघाहस्वरससिद्धमिति
तावदाहस्वरसतइति। नत्संभवच्छ्रुतन्याक्षिकत्वैककल्प्यानान्यथेत्याहतस्मिंश्चेतिफलितमन्योन्याश्र
यमाहतत्रैतितस्फलवदन्तेधिकरणार्थमुपसंहरतिअतइतिमूलाकांक्षाशामकमाहभ्रांतीति। ननुम
न्वादीनांभ्रांत्यादिसंभवस्तत्राहनहीति कस्यचित्पुरुषस्यमहर्षीणामपिव्यतिक्रमादिदर्शनादिति
भावः। ननुसंभावनामात्रेणभ्रांत्यादिमूलकल्पनेष्टकादिस्मृतिबाधितदापत्तिस्तत्राहसंभाव्यमान
इति। दृष्टेति। श्रुतिविरोधाविरोधवैदिकपरिग्रहापरिग्रहादीत्यर्थः। अक्तीतिअष्टकादिश्रुतौसर्वः। न
सर्वत्रेति। न्यायमूलमर्थवेशसमप्यदोषइतिभावः। सूत्रे। अक्तिस्मृतिविरोधेमानांतरानपेक्षंश्रुतिवा श्रीरामः
क्यमेवप्रमाणंस्यान्नस्मृतिवाक्यंयस्मादसत्यविरोधेस्मृत्यनुमानं॥ ॥हेतु॥ ॥इदंसूत्रंभाष्यकृता २९
औदुंबरीवेष्टनस्मृतेर्विस्तरतःस्त्रलोभस्यापराचत्वारिंशद्वर्षब्रह्मचर्यस्मृतेःस्वन्क्रीबत्वाछादनस्यक्री

तराज्ञकान्नभोजनस्मृतेर्बुभुक्षायाश्च हेतोर्दर्शनात्तन्मूलाएवतास्मृतयो नवेदमूला इत्यन्वाचय
हेतुपरतयापूर्वाधिकरणशेषत्वेन व्याख्यायश्रुतिविरोधेनैव प्रधानहेतुना स्मृतिबाधसिद्धेरन्वाच
यहेतावेन तिप्रयोजनं तथाऽधिकरणांतरत्वेनापि व्याख्यातं तत इहोपेयते इत्यधिकरणेति। अथ द्वितीयाधि
करणाभ्यामगतार्थत्वाय क्रमेण विषयं विशिनष्टि। अत्र गृह्यमाणे सादिग गृह्यमाणकारणके। लोभा
दिकारणके। वैसर्जनेति। अत्र वृत्तस्ते दीक्षाविसर्जनार्थो होमो वैसर्जनहोमः सच यजमानतत्पत्नीपुत्रभ्रा
तृपुस्तमन्वारब्धेषु हुतेन वाससा परिसंवृत्यादितेषु कर्तव्यस्ततत्तन्संप्रच्छादनार्थं वासो वैसर्जनहोमीयं
आदिशाहृतेन यूपहस्तिनो दानमाचरति इत्यादि संग्रहः। यूपहस्ती यूपपरिव्याणशाटकं। अविरोधादिप
त्वेनैव पूर्वाधिकरणसिद्धांतहेतुभावात् संगतिरपि सूचिता। कार्तसामान्यात् वैसर्जनहोमीयादिस्मृता
प्यस्ति। अतः श्रुत्यविरोधादिति श्रुत्यविरोधे सति कर्तृसामान्यं प्रामाण्यहेतुरिति भावः। नास्तीति। दृष्ट
संभवत्यदृष्टकल्पनाया अन्याय्यत्वादिति न्यायादिति भावः। चोभिन्नक्रमोऽप्यपूर्वकः। श्रुत्यविरहमप्यत्य
र्यः। नन्वेवं दानादिस्मृतेरप्रामाण्यस्यात्तत्राह मोन्यादिति। दानस्मृतिमन्वादिप्रणीता श्चेत्कादिस्मृ

शा॰दी॰प्र॰ तिस्मृह पठिता। इयं तु मुक्तकर्तया पद्यत इति विशेष इति भावः॥ ॥ एतदधिकरणद्वयं वार्त्तिककृताह। ष्वितं तद्द
३० र्शयितियायस्त्विति। यदुक्तं वेदेन प्रमाणाभावव्याप्यमिति गृहीतस्य दर्शनप्रमाणाप्रत्यक्षे साध्यानेवं धान्ये वेदेन
अस्यानुमानोदय इति। तदयुक्तं स्पर्शनस्य श्रुतेर्वेदेन प्रमाणान्तराभावव्याप्यत्वग्रहसंभवेऽपि वेदेन श्रुत्यभावव्या
30 प्यत्वग्रहासंभवात्। न हि क्वापि सा श्रुतिर्न पठ्यत इति निश्चये सात्मस एव दुःशाकः इत्याशङ्कयेनाह भवेदिति॥
यदि स्मृतिमूलं कदाचिदपि न पठ्यत इत्यध्यवसातुं शक्यते तेन वेदे मुक्तरीत्या स्मृते बोधो ऽप्रामाण्यं भवेन्न चै
वमध्यवसातुं शक्यमिति योजना। तत्र हेतोर्वाक्यं बाध इत्युपेक्षायात उपपादयति। तदाहीति। सकलजनानां स
मस्तानि प्रत्यक्षानुमानादीनि प्रमाणानि तत्त्वत्यानि वर्तितदविषय इत्यर्थः। अशक्यत्वे हेतुमाह। अनन्तेति।
अनन्ता असंख्याः। चरणाः। सांप्रदापिका। आधारेण संतानसामने कुसहस्राणामेतु बहूनां। तस्यापि
विरोध इति। ब्रीहियवादिश्रुतिवत्प्रामाण्यसंभवादिति भावः। अपि नाविरोधाभावे वेसजनिहामो यादि स्मृ श्रीराम॰
तीनां किमुवक्तव्यमिति सूत्रे निर्णयादिहिस्मृतिमूलश्रुतिनिश्चयानुमेयाच्चेतत्तदाप्रत्यक्षश्रुतिविरोधेन ३०
तदनुमितिस्तुदयात्तदभावनिश्चये स्मृते रप्रामाण्यं स्यात्तत्तु न योच्यत इत्याह नित्येति। अस्मिन्पक्षेन श्रु

त्यभावनिश्चय इत्याह यद्वाहीति। इवधाज्ञेवास्यालंकारो। ननु संभावनामात्रेण कथं तदभावानिश्चयस्तु
त्राह द्वेधाहीति। हश्यादर्शनात्। योग्यानुपलब्धेः। तदभावनियतेति वेष्टनश्रुत्यभावव्याप्येत्यर्थः। समस्ते
ति। सर्वशाखानामनुपलम्भे सतीति हि तत्कृतवेष्टनश्रुतेरप्युपलम्भयोग्यतयोदनुपलम्भो योग्यानुपलब्धिः स्या ८२
न्नतु सर्वेषां शाखोपलम्भो ऽस्तीत्यर्थः। आद्य द्वितीयमाशंक्य निषेधति नचेति। विरुद्धश्रुतेर्नीति। द्वयपमानश्रु
ति विरुद्धश्रुतीत्यर्थः। नियतत्वाभावे हेतुं व्यभिचारं दर्शयति विरुद्धानामपीति। आद्यकल्पं निरास्य समुप
संहरति तेनेति। द्वितीयमाशंक्य निषेधति नापीति। तमपि द्वेधा विकल्पयति सइति। द्वितीयं निरस्यति नच
सर्वेति। विप्रकीर्णश्रुतिवादेऽश्रुत्यभावनिश्चयाशक्यत्वं व्यतिरेकमुखेनाप्याह निःशेषेति। ननु पुरुषान्तरस्य
त्यक्षेण स्वप्रत्यक्षवाहुल्यं भणीयमित्यत आह अतइति स्मार्तस्मृतेः संभावनामात्रमेव न तु निश्चय
इत्यत आह यत्वाचेति। इयं स्मृतिर्वेदमूलामन्वादिप्रणीतत्वादष्टकादिस्मृतिवदिति भावः। विरुद्धार्थैवे
शं स्मृत्यनुष्ठानापत्तिस्तत्राह ननश्चेति ननु सर्वस्य स्वप्रत्यक्षो विरुद्धविषयपरप्रत्यक्षेण न सर्वथा वि
स्तंभोतत्कल्पवद्विकल्पोनुष्ठानायोग इत्यत आह यदिपरामिति संभावनायां यदिशब्दः। क्रियत इति स

शा·ही·प·

३१

31

माप्यतेइत्यर्थः। व्यवहारःस्वत्वप्रत्यक्षश्रुत्यर्थानुष्ठानंपरस्वत्वस्यश्रुत्यर्थानुष्ठानंचानन्वनादरस्वी
कारेऽष्टकादिषुपितृत्वमंगलत्राह अत्रेनाहरेयाश्चतिस्मृहत्वातेमइति। कश्चिदेवंशेननुसर्वत्रेत्यर्थः। ता
दृशामंशमाह अधैकेइति। नहृदयमूलेश्रुतिर्दृश्यतेत्यर्थः। श्रुतिविरुद्धस्येत्युबोध्यं। अन्यथाउक्ताति पि
प्रसंगापरिहारात्। ननुतदृशोपिवेष्टनमस्मृतिवत्स्यामाएपमसक्तत्राहन्यायेति। वेष्टनस्मृतिर्नन्याया
भावमूलकत्वेतिभावः। नाशस्मृतिवत्स्यामाएपमसक्तत्राहन्यायेति वेष्टनस्मृतिर्नन्यायाभासमूले
तिभावः। तादृशस्मृतिमुदाहरति अंगंवेति। पितृत्वयन्नेस्वकालत्वादनंगंस्यादित्यमावास्याशब्दस्यक
त्वपरत्वेनदर्शकर्मसमभिव्याहाराभावान्नतदंगंपिंडपितृयज्ञः। किंतुस्वतंत्रइतितदनंगत्वसाधकेचातु
र्थिकाधिकरणपूर्वपक्षयुक्त्याभासमूलकमंगंवेत्यादिकल्पसूत्रवचनमित्यर्थः। अविशेषादिति। द
र्शपूर्णमासयोरग्न्याधेयंचतुर्धाकरणंनेति। द्विविधंयच्चतुर्धाकरणंतद्विषयमिदंकल्पसूत्रवचनमाग्निसं
बंधाविशेषादाग्नेयाग्नीषोमीयावुभावपिचतुर्धाकुर्यादित्यर्थकंशेषस्तुयुणसंयुक्तइतिनिरपेक्षाग्नि एप्र:
देवताबोधकतद्धितघटितयाताग्नेयशब्दस्याग्नीषोमीयेऽसंभवादाग्नेयस्यैवचतुर्धाकरणमितितानी ३१

याधिकरणसिद्धान्तव्यावर्त्यपूर्वपक्षयुक्त्याभासमूलकमित्यर्थः। नन्वेवं वेदनाहि स्मृतिष्वपि न्याया
भासमूलत्वसंभवात्कल्पसूत्रेष्वेव न वेदप्रामाण्यमेव स्यादित्यत आह। नन्विति। कल्पसूत्रेषु समभिव्याहा
राद्विशेषादिवहेष्टनादिस्मृतौ हेत्वाभासानुपन्यासादिति भावः। सूत्रस्य गतिमाह। व्यवहारेति। प्राप्त
मिति। अनुष्ठेयार्थकमित्यर्थः। उपसंहरति तेनेति। फलतः अननुष्ठानात्॥ ॥ इदानीं बाधितार्थकत्व
प्रमित्युपजनकत्वरूपाप्रामाण्यप्रसक्तेन वर्णकान्तरमाह यद्वेति। शाक्यादीत्यादिशब्देनागतिकोक्तपाशु
पतपाञ्चरात्रादिसंग्रहः। आभासानेति। सिद्धान्ताभिप्रायेण पूर्वेति। अपि वा कर्तृसामान्यात्प्रमा
णमनुमानं स्यादिति स्मृत्यधिकरणसिद्धान्तसूत्रोक्तप्रकारेण स्मृतौ नाम सिद्धहेत्वादि वैदिकपदार्थैः
समानकर्तृकत्वं प्रामाण्यकारणमत्र नास्तीत्येवं तत्त्वमुदाहरणहेतुत्वेनास्यार्थः। सत्संप्रयोगे पुरुष
स्यादिसूत्रेण पौनरुक्त्यमाशङ्क्याह तेषामिति। ननु साक्षाद्वैदिकार्थैः समानकर्तृकत्वेकर्तृत्वेनाव
दस्यैव धर्मप्रमाणत्वाद्वेदानुक्तधर्मत्वेन न बुद्ध्युपशिक्षितवेदमूलकत्वं संभाव्यते इह तु तदभावान्न तत्संभाव
नेत्याशङ्क्याह। पूर्वं वेदमूलत्वाभ्युपगमात्तत्प्रसिद्धवेदार्थसमानकर्तृकत्वापेक्षेत्याह। तेषां हीति। अभि

३ माशंकनीयमतस्तस्य निराकरणार्थमधिकरणं व्यर्थमित्याशंक्याह । इदं चेति । अदृष्टवेदमूलत्व ३

शा.दी.प्र. न्तप्रस्थानाः प्रसिद्धवेदार्थासंवलितार्थकाः वेदांतरसंभावनामाह यथेति । तेषूपलभ्येरन्नित्सतन्त्या
३२ हतेनेति । ननु न कृत्स्नवेदानुपलंभः संभावित इत्यत आह मन्वादीति । केचित्तन्नेप्यायिका दादयः । न
32 नु वेदविहितविधिभिरेव तत्स्मरित्रहाक्त्रतेर्वेदमूलत्वं प्रकारेणेत्यर्थः । केषांचित् देदिकानामेव मध्ये केषांचिद
ननु त्वधिकरणस्यार्थवत्त्वके पुनरत्र पूर्वपक्षस्तत्राह कृतमिति । यदेवाधिकरणारंभसमर्थनार्थ
मुक्तं तेषां हीत्यादिना विघ्यंतीत्यंतेन तेन वक्तृत इत्यर्थः । युक्तं मन्वादिप्रणीतानां केषांचिन्मते प्रली
नशाखामूलत्ववदिह प्रलीनवेदमूलत्वमिति तत्राह अविच्छिन्नेति । तत्र वैदिकपदं विग्रहः कल्प्यकोने
हेत्यर्थः प्रत्युत वेदमूलकत्वं कल्प्यकमेवास्तीत्याह । शाक्यादिष्विति । इदं स्मरणमित्यन्वयः । न स्व
विरोधकरणमस्तेन विपरीतमिति । वेदमूलत्वविरुद्धमित्यर्थः । स्मरणमभिनयति । अवैदिकमवेदमूल
मप्रमाणं प्रमित्यजेन केनचेति । अवेदमूलत्वं कल्प्यमित्याह हेष्वेति । वेदद्वेषिपरिगृहीतत्वादीत्यर्थः । त श्री.एम: ३२
त्रयहिंसानिषेधस्य यागीयसाधारणत्वान्न वेदार्थत्वमिति भावः । उपसंहरति अत इति । दर्शापसीद्धरत
ात्र संन्न्मूलकत्वाद्वेदद्वेषमूलकत्वात् ॥ शिष्ट ॥ ॥ आचांतेन कृताचमनेन कर्तव्यो वैदिकं कर्मेत्या

२ कल्प्यकांतरमाह । वेदेति । अत एवाहिंसादिवेदार्थैकदेशसंबंधेन कल्प्यकांतरेणात न्मूलत्वं म ३

दिःनआचारेणाहमेनस्मृत्युक्तपुरुषार्थानां क्रतुमध्येऽनुष्ठानाभावेन विरोधशंकाया अभावात्क्रत्वं
गेस्मृत्युक्तो क्रत्वंगविशेषे सर्वः। तेन सर्ववेष्टनादिस्मृतिर्व्यवच्छेदः। किमिति। अत्र विरोधाविरोधौ विव
विचार्यौ तयोः सतोः प्रामाण्याप्रामाण्ये स्मृत्यधिकरणविरोधाधिकरणाभ्यामेव सिद्धे इति न द्विता
ः फलविचारतया तथा च विरोध एव कास्ति क्रतेनेति विरोधाधिकरणविषयव्याप्त्यर्थत्वाद्दृश्यते नसं
गतिर्बोध्या हेतुदर्शनाधिकरणं तु समनंतरमपि विरोधाधिकरणाभ्युच्चयहेतुभूतहेतुदर्शनस्य
स्यात्तेन प्यप्रामाण्यावहत्वपरतया विरोधाधिकरणभक्तमेवेति व तेनास्य पृथक्संगत्यपेक्षा॥
क्रतुमध्य इति। अनेन क्रतुप्रक्रमकर्तव्याचमनेनोदाहरणं श्रोतक्रमाप्राविरोधित्वादि स्मृचि
ताक्रमादः पदार्थेषु गुणत्वात्पदार्थानां ततोपि प्राबल्यात्क्रमादिबाधेन शास्त्रान्तरीयपदार्थोपसंहा
रोस्तीति वक्ष्यमाणधर्मत्वात्तदधिकरणेनैव गतमिदमित्युदाहरणासाहृत्य पर्यवेति। अस्मिन्पक्षे प्रामा
ण्यादिविचारो धिकरणांगमेवात्र अममस्यापि विरोधे प्रामाण्यमुत्पादनाद्विरोधाधिकरणेनापवादे हि की
संगतिः। प्रमाणेति। प्रमाणयोः श्रुतिस्मृत्योर्यद्बलाबलक्रमेण प्रबलदुर्बलभावः। यच्च प्रमेययो॥

स्मृत्यर्थस्तुत्यर्थयोः। पदार्थेतद्धर्मरूपयोर्बलाबलं तयोर्विसंवादे विरुद्धानुष्ठानप्रसंजकत्वे सति
किंज्यायः। स्वप्रसंजितानुष्ठानैकसिध्यर्थः तत्र तदर्थसंशयस्य मूलसंशयोपपादकत्वं दर्शयन्न
प्रमाणबलाबलं तावद्दर्शयति तथाहीति। अत्र वृस्थिते। स्मृत्यधिकरणइत्यादि। तत्प्रसंजितं दर्श
यति स्मृतइति बलीयान्सः अनुष्ठेयाः तथा च स्मृतेः प्रामाण्यं सिध्यतीत्यर्थः प्रमेयबलाबलं दर्शय
ति। प्रमेयेति। पदार्थाः प्रधानभूताइति शेषः। तयोश्च प्रधानोपसर्जनभावरूपप्रमेयबलाबलं दर्शि
तं तत्प्रसंजितं दर्शयति। बलीयान्सइति। नु तस्य स्मृतेः प्रामाण्यं सिध्यतीत्यर्थः उक्तबलाबलद्वय
विरोधविवेचनं संक्षयमाह इति बलाबलेति। आद्यंपूर्वपक्षं संगृह्णाति। सार्धश्लोकेन स्मृतीति।
व्याकोपो बाधः अतः व्याकोपात् विरोधफलमाह तत्रेति।। विरोधे सतीत्यर्थः। द्वितीयं संगृह्णाति।
पूर्वेति। सार्धश्लोकेनापूर्वभावि। प्रथमावगम्यं। यत्प्रमाणं तज्ज्ञानकरणस्यामित्यर्थः। तेन प्रमा
णबलाबलेन निर्णीतइति। क्रमाद्यनुष्ठेयत्वइत्यादिः। इतरेति। इतरस्मिन्प्रमेयबलाबले। आदरा
स्तत्प्रसंजिते आचमनादावनुष्ठेयत्वाबुद्धिः। अनादरे हेतुमाह। नैराकांक्ष्यादिति। फलितमाह। अत

इति। स्मृतेरप्रामाण्यं सिध्यतीत्यर्थः। आद्यपक्षे क्वचिद्विरोधे हेतुं स्मार्ते श्रौतेबाधप्रसंगं च वक्तुं स्मो
तक्रमादानुदर्शयति वेदमित्यादिना। वेदोदर्भमुष्टिः। इतीति। एवंप्रकारेण श्रुत्यर्थपाठादिगम्य इत्यर्थः।
कालस्त्रिः प्रकारस्तत्र हि प्रकारं दर्शयति य इति। अविप्रकर्षः सन्निहितत्वं। आशुभावः शीघ्रता। अथवा
तद्द्वयविप्रकर्षस्यापि विशेषणं सर्वांगसहितप्रधानानुष्ठापकेन प्रयोगविधिना एकस्मिन्क्षणे तत्साहि
त्यसंभवात्तन्निर्वाहार्थमाक्षिप्यत्वविप्रकर्ष आशुभावावित्यर्थः। तृतीयप्रकारं कालमाह यस्त्विति। पूर्वा
ह्णे वै देवानामित्यादिश्रुतिविहितइति शेषः सोमवांगसहितप्रधानानुष्ठापकेन प्रयोगविधिना एक
स्मिन्ः। सिध्यर्थमिति। परिमाणमुपप्रयोजनोक्तिः। अपेक्षितमिति। तथा च तेनाक्षिप्यत इत्यर्थः।
प्रचयादिति। तत्प्रमाणेनाक्लिन्नतदेहादिति। तत्र वेदवेधनुष्ठानमध्ये कृता दर्शमित्राचमनादनुष्ठा
ने वेदं कृत्वेति क्रमाश्रुत्युक्तेनेत्यर्थरूपः क्रमः प्रधानसन्निकर्षरूपः आशुभावरूपश्च कालो विरु
ध्यते यदार्थन्यायस्य सर्वांगसाधः। पदार्थपरिमाणं चाविरुध्यते एवं तत्र ध्याय एव देवाद्यङ्गप्रवीतस्यास्व
सनेयथा पूर्वस्यापने क्रमकालो विरुध्येते दक्षिणाह सोनेवकरणे आशुभावो विरुध्यत इति यथा

शा०दी० ३४
34

संभवबोध्यं । अन्यथात्वं बाधं प्रतिपद्यते । प्रामाण्यं प्रसज्यते तत्फलमाह नेनेति । तत्स्यापि फलमाह विरो
धे चेति । स्मृतेरप्रामाण्यफलमित्यर्थः । इदानीं द्वितीयं पूर्वपक्षं तदीयसिद्धान्तं निरस्य न पूर्वकं विवृणोति ।
न चेति । बलीयस्त्वमिति । तथा च प्रमेयबलाबलाश्रयणेन स्मृतेः प्रामाण्यं युक्तमित्यर्थः । तत्र यथेमोप
स्थितप्रमाणबलाबलादेवानुष्ठेयानि तीये पश्चादवगतप्रमेयबलाबलं न किंचित्करमित्याह प्रमा
णेति । प्रकृत इत्यादि । प्रकृते प्रमेयावगमः श्रुतिस्मृत्योः शाह्योपमानयोरेव बोधकत्वात् ह्याय
मानप्रमाणजन्य इत्यर्थः । ततः किं तदाह तेनेति पूर्वभावीति प्रथमावगम्ये इत्यर्थः । फलितमाह तेनेति ।
निराकांक्षत्वात् । अनुष्ठेयजिज्ञासायां तेः । आद्यत्वात् । अनुष्ठानत्रियामकत्वेन प्रात्यं । द्वितीयं पूर्वप
क्षमुपसंहरति तस्मादिति । आद्यसिद्धान्तसंग्रहात्पदार्थेति । सर्वप्रदार्थप्राप्त्युत्तरमवान्तरतः क्रमा
देसत्त्वगुणत्वेनैव कल्पनान्न विरोधः । स्मातेंपदार्थ भयत्वपूर्वी ह्याहिकालविरोधः स्मृत्यन्तरमि
त्यहोमादिश्रोतनैमित्तिकपदार्थभयत्व इवकथंचित्प्रत्यासत्त्यापरिहर्तव्य इति भावः । द्वितीयं संग्रह्णा एम्
ति विरोधेपीति । यथावत्तः धर्मत्वात् । ननु वेदेकत्वावेदिमित्येवं श्रुत्यादिगम्यः । क्रमः श्रोतावेव ह्यावेव प ३४

दार्थापेक्षत्वेन सर्वेषामपि समानेषु पदार्थानां तत्कथमनपेक्षितत्वाभिप्रायेकेस्मेः क्रमाद्यविरोध इत्युक्तं स्व
रूपेक्षामुपपादयन्नुबोधे विहितोऽतिसर्वेष्विति। प्रयोगेति। प्रयोगविधौ त्यर्थः। तद्विषयगुणत्वात्प्रयोगांग
त्वात्प्राप्तत्नित्वातोभवति। ततः किं तदाहनेनेति। पदार्थप्राप्त्यनंतरग्रहत्वप्रयोगविधिविषयगुणत्वेनप
दार्थप्राप्त्यपेक्षाऽवसीयत इति शेषः। अयं भावः। श्रुत्यादिगम्यः क्रमो हि न प्रातिस्विकपदार्थविधिभिरपेक्षि
तस्तस्य प्रत्येकाहर्तृत्वात्। किं तु प्रयोगविधिनानुष्ठापकेनानुष्ठाने च श्रुतिस्तस्योपनीतसर्वपदार्था
नामिस्य क्लिक्रमस्य स्मात्तत्पदार्थापेक्षापीति। यस्त्वपेक्षा तावता कथमविरोध इत्यत्राह पदार्थप्राप्तीति
उक्तापेक्षाव भागात्प्रहायानां क्रमस्य च पूर्वपश्चाद्भावेऽसति पूर्वभाव्यनुगुणतया पश्चाद्भाविकल्पनादवि
रोधत्व इत्यर्थः। प्रयोगविधेः क्रमस्य वा श्रौतेष्वेवापेक्षायुक्ता न तु जघन्यस्य तत्त्वस्येष्विति शंकां वार
यितुं जघन्यप्रमाणकोपीत्युक्तं। जघन्योप्युपजीव्यत्वात् लिंगादिगम्यवदपेक्ष्यत इति भावः। कालस्या
पि पदार्थैरविरोधमाह कालइति एवं च श्राविरहः अविरोधमुपपादयति। प्रयोगेति। पूर्वाह्णादिः सन्नि
कर्षः प्राशुभावश्चेति त्रिविधोपि कालः सर्वेषां पदार्थानां भवतीत्यत्र हेतुः प्रयोगांगमन्वोदिति। काल

भा.दी. ३५

35

स्याप्याकांक्षावलात्त्वयोगविधिशेषत्वात्त्वयोगविधेश्च सर्वपदार्थशास्त्रत्वं संघटते: कालस्यापि सर्व
पदार्थशास्यपेक्षत्वात्पूर्ववद्विरोध इत्यर्थः। परिमाणत्वेत्यादि तत्त्वे वाश्रावल्यान्न स्यादिति विरोध इत्याह परिमा
णं चेति। कस्यचिदित्यस्यार्थं पाठाद्यन्यतमस्य। नन्वविस्मृतसर्वानुष्ठानसिद्ध्येऽत्र योगविधिनापेक्षित
त्वात्तदाक्षिप्तं परिमाणं च योगविधिरूपशास्त्रार्थ एव प्रचयोक्तं तन्नाह द्वावयवेत्यादिशास्त्रार्थ इत्याशंक्य मा
ह त्रयोगेति। अन्यथेति। न हि येनापेक्षितं तदेव तत्र प्रमाणं किं त्वन्यदेव वाचनिकत्वाद्यर्थबोधनेनान्यथा
सिद्धमत एव त्रयोपि तत्प्रमाणमिति भावः। उभयमभ्युपेत्याप्याह अपि चापीति। एवं सत्यपीत्यर्थः शास्त्रा
र्थ इतीत्येदिति शेषः। विरोधमंगीकृत्योत्तराध्वं विहायानुष्ठितीयं सिद्धान्तमाह यद्यपीति। पूर्वपक्षयुक्तमनू
द्य निषेधति नचेति। पूर्वेमाक्षिप्तं। प्रथमावगतत्वेनेत्यत्र हेतुं वक्तुं वस्तुगतिमाह न हीति अतिप्रसंगादिति
भावः। तदेवोपपादयति। प्रमेयगतं हीति। ततः किं तदाह। न चेदिति। बलाबलत्वमप्यत्र सत्त्वं सगः। तथोच
प्रमाणस्वरूपयोः पूर्वापरगमेपि न ते बलाबलस्य संहतिभावेत्र फलितमाह इत्तत्र एवेति नन्वस्तु ते श्रु
त्यविरोधे इव तद्विरोधेपि प्रामाण्ये ऽतिप्रसंग इत्याशंकाव्यवस्थामाह यद्वीति। अवैदिकशाक्यादिस्मृति

तं

श्री राम:
३५

मिति. भा ३

लक्षणमित्यर्थः। यत्त्विति। वैदिकं श्रौतमित्यर्थः। अप्रमाणं। यथाऽऽङ्गिरसामभिव्याहारादित्याद्यर्थ इत्य
र्थः। प्रमाणं। यथाऽष्टकादिस्मृत्यादीत्यर्थः। ननु तर्हि प्रकृते प्रथमावगतप्रमेयबलाबलेन प्रथममनुष्ठे
यनिर्णयेऽपि पश्चादवगतप्रमाणबलाबलेन तद्बाधः किं न स्यात्पूर्वपक्षेऽधिकरणन्यायात्तथा च स्मृतेरप्रामा
ण्यमित्यत्राह न चात्रेति। अबाधकत्वादिति। तत्र पूर्वपक्षे दर्शनिमित्तकादक्षिणाप्रयोगस्यापरपक्षे दर्शहितं
प्रयोगान्तरे सावकाशत्ववदिह प्रमेयबलाबलनिर्णीताचमनादिकर्तव्यतायाः अन्यत्रावकाशाभावाद्वैष
म्यमिति भावः। तर्हि विरुद्धानां पदार्थतत्क्रमादीनां कथं निवेशस्तत्राह तस्मादिति। तदनुरोधेनैवेति। ननु
तदननुष्ठाने तात्पर्येण बोध्यं तद् इत्यर्थः। उपसंहरति इत्याचमनेनेति। सत्रे श्रुत्याविशिष्टक्रमादेराकोपबा
धे सत्यपि तर्हि कुतो माचमादिस्मृतिवचनमप्रमाणमिति चेत्॥ ॥ एवं यथाभाष्यमुक्त्वा आचार्यव्याख्यानमनु
माह नत्विति। अतिमंदत्वादिति। शुचिना कर्म कर्तव्यमिति स्मृत्यादिनिमित्ताशुचित्वनिरासेनाचमनादेर्वैदि
कपदार्थाङ्गत्वान्न स्वाङ्गस्य व्यवधायकमित्यविरोधादाद्यपूर्वपक्षस्यामंदत्वं। विरोधाधिकरणभङ्गोक्तरी
त्याचमनादेरपि प्रत्यक्षश्रुतिमूलत्वेन प्रमाणाबलाबलविभागाभावाद्द्वितीयस्यामंदत्वं। प्रत्यक्षेति। य

ज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य च सत्यादि यस्मादादि चसे क्षेत्यर्थः दक्षिणं चास्य नु
३६ यथावेद दक्षिणः पाणिरेवं सदैव यज्ञनमिति अस्य क्षश्रुतिकृत न्याय ज्ञांगत्वोन्नयनात्म त्य क्षश्रुतिवि
36 हितत्वान्मावमनस्यापि न सोमेनोच्छिष्टा भवन्तीति सोमभक्षणेनोच्छिष्टत्व श्रुत्याउच्छिष्टनिमित्ताचम
नाभाव बोधनाद्दुच्छिष्टान्तरेष्वाचमनोन्नयनानि यथा न बोध्यं। कोत्तु हि सूत्रगतिस्तत्राह तत्स्मादि तिम
वैविरोधाधिकरणभाष्यमेगानन्तरं उक्तं वार्त्तिक इति शेषः। चोद्यं चान्तरे तयोर्भाव स्तत्वं तेनेत्यर्थः॥
तत्राद्यं सूत्रं चोद्यपरत्वेन व्याचष्टे यत्त्विति न कोपयतीति। एतेन शिष्टानाम कोपेऽप्यविरुद्धमिति सूत्र
पदकृदोदर्शितः। द्वितीयमुत्तरत्वेनाव तारयति तत्रेति। शास्त्रीयहिंसा वचनं धर्मं त्रमाणमेता वत्येवेति न
धर्मे प्रमाण शास्त्राणां परिमितत्वादिति सूत्रार्थः। सूत्रं व्याचष्टे न खल्विति। न त्ये यं स्वाध्यायमुक्ता हे
तुं व्याचष्टे। स्वाध्याय इति स्वाध्यायाः इत्यादिभिर्नियतत्वादित्यन्वयः। नियममाह वेदादिभिरिति। इ श्री एम:
त्यादिभिरित्यत्रेति शब्दोपात्तनियमश्रुतिस्स्वसाधारश्रुतिं दर्शयति। स्वाध्याय इति। अध्ययनेनेवापूर्वमि ३६
त्युत्थानुतिष्ठतां फलं भवतीत्यध्ययननियमविध्यर्थत्वात् हि धेर्नियामकत्वमित्यर्थः। स्मरतीत्याह वेदे इ

ति। मूलं प्रमाणं। महिष्ठं वेदविदां मन्वादीनां स्मृतिर्निबंधनं शीलमाचारः। साधूनामेति। स्मरंतं तरमा
हधर्मं ते ति। समयः संकेतः आचार इत्यनंतं। वेदाश्च प्रमाणं धर्म इति शेषः। पौराणिकं वचनमाह पुरा
णेति। न्यायो गौतमप्रणीतं शास्त्रं। धर्मशास्त्रं मानवादि। अंगानि शिक्षादीनि षट्। वेदाश्चेति चतुर्दश धर्मस्य
विद्यानां ज्ञानानां स्थानानि कारणानीति योजना। ननु शास्त्रादितो यद्यपि हिंसाद्विधमेवमिति:। गम्यत
इत्येतत्त्राहान्यत इति। यद्यपि वेदेष्वनुमितमहिंसनमत्र वायपरिहारायेति नियमासंभवादन्यत्र मितमपि
तत्तदर्थं भवतीति याप्यं तत्तुणमं विज्ञानं वऊं व्रीहिरपानदुक्तं तटाकारामादिरहिंसापदार्थस्तथा च त
द्दृष्टादृष्टमान्यतटाकादि निर्माणे निष्फलमित्यत्रनातात्पर्यं। न चैवमहिंसार्थे शोतव्योमाण्यायान्तियागोप
हिंसासाधारण्येन तत्प्रतिषेधादिति बोध्यं॥ ॥ अष्टकादिकं व्यावर्तयति अनिबंधा इति। मन्वादि
स्मृत्यनिबद्धा इत्यर्थः। शाकाद्याचारं व्यावर्तयति। संक्षिप्ति। फाल्गुनकृष्णप्रतिपदि पुष्पारजलसेको
वसंतोत्सवः। कार्तिकशुक्लप्रतिपदि दीपदानादि रात्रिपदार्थः। शाकादिस्मृतिबद्धाचारस्याप्यप्रा
माण्यमित्याशयेन तैः संगतिः। पुनरुक्तिशंकां परिहरति। तत्रेति॥ निर्निबंधनतया मंत्र निबंधहृतया

क्रमो विश्वामित्रादेश्चण्डालयाजनादिः । साद्(?) संविविसिष्ठस्य पुत्रशोकादात्मवधादौ प्रवृत्तिः । आसिप्येति ॰ ४१

शा॰ दी॰ ३७ 37 व्यातिं वसंतोत्सवादयो न प्रमाणं । न्यायवेदमूलकत्वाद्वाम्याद्याचारवत् । न चासिद्धिः विमतानामवेदमूला
अनिबद्धत्वात् कलंजभक्षणादिवत् न च विमताः प्रमाणं निवेदमूला वा शिष्टाचारत्वादिति वाच्यं ।
विमता नो भयविधाः धर्मव्यतिक्रमादिसमानकर्तृकत्वात् विशंकुयाजनादिवदिति सत्प्रतिपक्षात् हानि
श्चेत्यर्थः नन्वावेदमूलकत्वं विपक्षबाधकतर्केण साधयति यदिहीति । मूलं वेदरूपं न त्वनिबद्धत्वमसि
द्धमाचारश्चैव साधूनामात्मनस्तुष्टिरेव चेति निबद्धत्वादित्याशंक्यान्यथा कथंचिदनिबद्धत्वहेतुः ॥
तत्प्रतियोगिनो वेदमूलत्वाप्रयोजकत्वेन तस्या वेदमूलत्वे हेतुत्वेनानुपन्यस्तत्वात् किन्तु प्रातिस्वि
करूपेणानिबद्धत्वं हेतुः स चेहाप्यस्ति । अभिप्रेत्याचारश्चैव साधूनामित्यस्य सामान्यमात्रनिबंधनत्वात्तु वेद
मूलत्वेऽप्रयोजकत्वं किंतु नास्त्यायमस्तत्याश्रापातिकानुमानमूलत्वे इति प्रतिपादयति अथवा मूल
वेदादर्शने मन्वादयः कथं सदाचाराणां प्रामाण्यं ब्रूयुस्तत्राह आचारेति । इत्येवं प्रामाण्यमनुमी श्रीरामः ३७
यत इति मन्यामहे न केयामः अनुमीयमानत्वे हेतुः परीक्षतीति । आचारस्य सामान्यतो रूपेणोन्यर्थः
। एतदुक्तं भवति । मन्वादिभिस्तदानीन्तनानामाचारं दृष्ट्वा एते सदाचारत्वात् प्रमाणमित्यनुमायाचार

ग्धेत्यादि निबद्धं न तु तन्मूलत्वे दृष्टा ऽन्यथा सामान्यरूपेण न निबध्नीयुः किंतु समपरिकरमष्टका
दिवत्यागिति विशेषरूपेण निबध्नीयुः तदानीं तन्नाम अप्यन्येषामाचारं दृष्ट्वा तेप्यन्येषामिति। ननु तथा
प्यनुमानमूलत्वे नापि प्रामाण्यमायातमित्याशंक्याह तत्रेति सेव निःसानुमेयश्रुतिविरुद्धापादिता ननु
वैदिकानुष्ठितत्वसिद्धेन धर्मत्वेन प्रामाण्याद्यनुमेयमित्याशंक्याभिप्रायं दूषयति। धर्मेति। वैदिकानुष्ठि
तत्वे व्यतिक्रमादावनैकांतिकमिति भावः। धर्मबुद्ध्या वैदिकानुष्ठितत्वहेतुमात्मसिद्धेन धर्मत्वेनाष्टकादी
नामपि वेदमूलत्वं तेन च प्रामाण्यं साध्यमिति सिद्धांततावदाह सिद्धांतस्त्विति। तत्रोक्तहेतोर्वेदमूल
त्वसाध्यव्याभिचारो शिष्टेर्लब्धुं दुरस्याति तर्केण। धर्मेति। उक्तव्याभिचारं हेतोः परिहरति व्यतिक्रमेति रागेति
तत्तस्य धर्मबुद्धिनिबंधनत्वरूपविशेषणाभाव इति भावः। अत एवाविशिष्टहेतोर्न व्याभिचार इत्याह धर्मबु
द्धीति। चारित्र्यस्यानुष्ठानस्य धर्मलिंगत्वाव्याभिचार इत्यनेन संबंधः। धर्मलिंगत्वस्य। धर्मत्वानुमापकत्वं
स्याव्यभिचारोऽनपायः। विशेषणमिति परिहरति अगरत्यमारोति। रागादिकारणानतरादर्शनेन धर्म
बुद्ध्येकनिबंधनत्वादित्यर्थः। अनेन सौत्रकारेणाग्रहणाद्यत्वेन व्याख्यातं। बाधं दुरस्यातेस्तातेति। ध

र्मत्वाभावबोधकश्रुतिस्मृत्यदर्शनादित्यर्थः । अनेन न तेषु दर्शनाद्विरोधसत्त्वेऽपि स्मृत्यो यो व्याख्यातः । एतेन
यदुक्तं शि॰ष्टाचारत्वेन प्रामाण्ये वेदमूलत्वे वा साध्ये व्यतिक्रमसमानकर्तृकत्वेन सत्प्रतिपक्षत्वं तन्निर
स्तं । तत्र धर्मबुध्या निबंधनेनस्योपाधेः सचितत्वाद्दृष्टकार्येव्यभिचाराच्च । यत्तु आतिस्विकरूपेणानिबद्ध
त्वाद्वेदमूलत्वमिति तत्र हेतोरन्यथासिद्धत्वाद्दृष्टप्रयोजनकतामाह । मन्वादिभिस्त्विति । लोभलाघवविवेकलो
पवान्तुमानिभिः दोषोंधपरंपरापत्तिरवेदमूलत्वे वा फलितमाह तस्मादिति । वेदमूलत्वाभावो स्फुटार्थः ॥ ॥
तेषु ॥ ॥ पूर्वाधिकरणवार्त्तिकरीत्या संगतिमाह आचारेति भाष्यरीत्याप्रमाणबलाबलप्रसंगा
त्संगतिर्बोध्या । ननु भाष्योदाहरणाद्वेषणमयुक्तं मार्यम्लेच्छाविप्रतिपन्नोदाहरणपरत्वेऽपि भाष्योप
पत्तेस्तत्राह । भाष्य इति । तुल्याचारा यम्लेच्छविप्रतिपन्नपरत्वे आर्यप्रसिद्धेः स्वरूपप्राबल्येनैव सिद्धातेः
स्याद्वाक्यशेषानुधावनेनेति भावः । पूर्वप्रकृतत्वादिति । यद्यपि भाष्ये आचाराधिकरणं नास्ति तथापि
स्मृत्यधिकरणादौ स्मृतितुल्यतया आचारस्यापि प्रकृतत्वादिति भावः । यत्र यवमयश्चरुर्भवति वारा
हीउपानहावुपमुंचतो ... विरुद्धा प्रतिपत्तिः । केषांचिद्दाक्षाः शेषस्य पत्रान्यार्या ओषधयो म्लायंते

अथैते मोदमाना इवोत्तिष्ठंतीत्यस्य वराहं गावोनुधावंतीत्यस्य चानुगुणाय वशाह्वस्य दीर्घशूकेषु
प्रतिपत्तिः अन्यौषधिम्लानिकाले हि वसंतस्य दीर्घशूकानामेव मोदमानत्वात्। एवं वराहं गावोनुधा
वंतीति वाक्यशेषस्यानुगुणं सूकरे प्रतिपत्तिः गावो हि वराहं चतुष्पात्त्वेनानुकुर्वंति न वत्समनुध्यागानुधाव
न्तीति केषांचित्तन्न्यायमनुगुणाय वशाह्वस्यापि यवगुषुप्रतिपत्तिः स्येन शरत्काले नानावर्णसंत्वेस्य रूपसुगंधस्या
प्यभावात्। एवं वराहशाह्वस्य वायसे प्रतिपत्तिर्गवां वायसानुकरणाद्यसंभवात्। तत्रेति यवादिशब्द
विषय इत्यर्थः। विप्रतिपत्त्योरिति शेषः। ननु यवादिशब्दा उदाहृता इत्याशंक्याह यवादीति। ननु न्या
यमात्रे ज्ञाते यदन्यदुदाहरणमस्फुटं तत्राह अन्यस्यापीति। सर्वत्रादर्शनं दुर्निरूप्यं तत्राह संदिग्धेष्वि
ति। ननु तत्रोक्ताः शंकेत्यत्राजननसाधनं किमिति संशये जोवेघ्रत्तमित्यनुष्टेयधर्मनिर्णय इह तु
शब्दार्थनिर्णयस्तन्नगतार्थता तत्राह। गतन्यायत्वादिति। निर्णयभेदेपि न्यायसाम्यान्न पुनरुक्तिभावः। बाधकेम
प्याह। वाक्यशेषाच्चेति। प्रसंगादिति। द्वयोरप्यार्थ्यसिद्धित्वादिति भावः। तुल्यबलत्वेन पूर्वपक्षमाह
लोके तिशब्दार्थस्य लोकप्रमाणगम्यत्वादित्यन्वयः। लौकिकव्यवहारगम्यत्वादित्यर्थः। शास्त्रार्थस्य

शा॰दी॰ ३९ पदवाच्यस्तूभयोरार्यम्लेच्छयोः क्व तत्पर्यवत्त्वं क्व तो विशेषस्तत्राह शास्त्रार्थेति। शास्त्रीयवाक्यार्थ
मत धर्मादीनामेव विशेषं दर्शयन् श्लोकस्य चतुर्थपादं व्याचष्टे य इति। धर्मे इति। अधर्मस्याप्युपलक्षणं।
शास्त्रेष्वभियोगः वाक्यार्थज्ञमित्यनुकूलशाब्दन्यायनैपुण्यं। तच्च न्येष्वप्येव इत्यर्थः। पदार्थनिर्णये चार्या
39 र्याणां म्लेच्छानां विशेषं दर्शयन् द्वितीयपादस्य व्याचष्टे व्यवहारेति। सचेति। व्यवहारस्थलस्येत्यर्थः प्रमाणेति॥
व्यवहाररूपपदार्थनिर्णायकानि विशेषाणीत्यर्थः। द्वयोरिति। आर्यम्लेच्छसामान्याभिप्रायानन्वायेप्रसि
द्धेरितः कालादारभ्येयमित्यवधेरस्मर्यमाणत्वेनानादित्वात्तयैव विज्ञातपदार्थनिर्णय इत्याशंक्याह
यचेति। आर्येष्विति आर्यव्यवहारेष्वित्यर्थः। एवं म्लेच्छेष्विति। म्लेच्छव्यवहारेष्वित्यर्थः। धर्मार्थविज्ञप्तिसि श्रि५
द्ध्यर्थं शास्त्रार्थेऽन्वपदार्थे [illegible] पाभियोगस्यापेक्षणादन्यथात्वाद्वा इति शास्त्रवाक्यार्थविज्ञप्त्या धर्मादिवि
ज्ञप्तिप्रसंगात् तयोरणामेव च पदार्थतत्त्वे अभियोगात्तत्र सिध्येवतन्निर्णय इत्यभिप्रेत्य सिद्धान्तश्लोकेन स श्रीराम:
मर्थयन्नाह [illegible] इति। रूकतेति। व्यवहारोपयिकपदार्थज्ञानमात्रजनकतेत्यर्थः। मात्रपदेन परायाविज्ञप्ति ३९
तिर्व्यवच्छिद्यते अपि अभियोगराहित्यद्योतकः। कथं हि तत्र तत्त्वावधारणं तत्राह अपि विज्ञातइति॥ ॥

अभ्रान्त इत्यर्थः। शिष्टेष्विति। एवं व्यवहारेषु। ननु म्लेच्छव्यवहारो बोधकत्वान्यथानुपपत्त्या शक्तिमाक्षिपतीत्या
शंक्य तदाक्षिप्तशक्तिस्वीकारे नानार्थत्वप्रसंगो बाधक इत्याशयेनाह। न तावदिति। तावच्छब्दः क्रमार्थः।
अनादित्वसाम्यमप्यनुपदमेव निरसिष्यत इत्यर्थः। अदृष्टेति। प्रमाणेन न गत इत्यर्थः। नानार्थत्वमिष्टमित्य
त आह शब्दप्रयोगेति। प्रकरणादिना न्यूनतावधारणात् तदभावे लिङ्गि कयह गाम् इत्यस्याशंसामाह कदाचिदि
ति। अदृष्टेति। एकपदप्रयोगे हस्तिग्रहणे वृक्षार्थत्वमाह कप्रमाणस्य प्राप्तप्रामाण्यत्यागोऽप्राप्तप्रामा
ण्यस्वीकारश्चेति द्वौ दोषौ। पुनः प्रयोगे वृक्षग्रहणे तस्यैव प्रमाणस्य त्यक्तप्रामाण्यस्वीकारः स्वीकृतप्रा
प्रामाण्यत्यागश्चेति द्वाविति चत्वारो दोषाः। तथाह स्पष्टतयाह कप्रमाणस्य प्राप्तप्रामाण्यत्यागो
ऽप्राप्तप्रामाण्यस्वीकारश्चेति द्वौ दोषौ। पुनः प्रयोगे हस्तिग्रहणे तस्यैव प्रमाणस्य स्वीकृतप्रामाण्यत्या
गः त्यक्तप्रामाण्यस्वीकारश्चेति पर्यायत्रयेणाष्टौ दोषाः स्युरित्यर्थः। कातत्वीयानार्थप्रयोगयो प्रमाणः
गेति तत्राह एकत्रेति। कथं तर्हि हस्तिन्यपि तस्य मुख्यत्वाभिमानस्तत्राह गौणेऽपीति। पाणिन्यस्याना
मिति। अज्ञातगौणत्वानामिति शेषः। अन्येभ्यः अज्ञातगौणत्वेभ्य एव अभिमानेति। भ्रमेत्यर्थः॥

एवं चावधश्यस्मरणेपि म्लेछव्यवहारस्य युक्तितः साधित्वमेवेति भावः। ननु मेषधवादिवत्तानार्थत्वमेव
किं न स्यात्तत्राह। नचेति। विशेषमुपपादयति शास्त्रस्याइति। धर्मेति। धर्मस्याभिज्ञानिरज्ञाप्तिः। अधर्म
स्य विप्लुतिः प्राप्तिस्तदभावेऽविप्लुतिस्तल्लाभेवृथैत्यर्थः। एकद्रव्यसाध्यादृष्टस्य द्रव्यान्तरेणानुत्पत्तेः
शब्दार्थविषये धर्मविप्लवापत्तिरेवाचकशब्दप्रयोगादपशब्दप्रयोगनिमित्तपापप्राप्तिः साप्यत्रेतिभी
त्याशिष्टाः पदार्थेन तत्परिपालयन्तीत्यर्थः। म्लेछेषु नेवमित्याह। म्लेछानिति। यथाकथंचित्तत्रापशब्दे
ऽपि प्रयोजनेति। धर्माद्यविप्लुतिलक्षणेत्यर्थः। अविप्लुतिसिद्धावपीति। पदार्थतत्त्वेत्यादिः। अत एव पु
दार्थप्रत्यायकत्वादार्यव्यवहारवदनार्यव्यवहारोपि पदार्थतत्त्वनिर्णायक इत्यनुमीयत इत्युपदिष्टाः। नाश
कनीयमित्याशङ्क्याह। तेनेति। यत्नाभावेनेत्यर्थः। तथा चाविप्लुतियत्नवत्त्वकेतुकत्वमनुमानेउपाधि
तिभावः। फलितमाह इत्यार्येति। उपसंहरति। इतिपीस्थितेति। ननु तर्हि किं भाष्यमुपेक्षणीयं नेत्याह भाष्यम
पीति। विमागो। विमतेति। भाष्ये हि कः पुनरत्र निर्णयः। शास्त्रस्थानां समशब्दार्थः के शास्त्रस्थाः शिष्टा इत्या
दिना आर्यप्रसिद्धिप्राबल्येन सिद्धान्तकथनादार्यम्लेछव्यवहारविमतिपरत्वमवसीयते इति भावः। ननु के श्री एमः ४०

प्राबल्येन सिद्धांतकथने वाक्यशेषोपपत्त्या मोऽनुपयोगादयुक्त इत्यत आह। वाक्येति। प्रयोजनं पूर्वपु
क्षे शोल्वाहिशिष्टानाह स्त्यादौ पाल्माप्रयोगेपि नापशहत्वप्रयुक्तं प्रायश्चित्तं। सिद्धांते तु न तथा। एवं बैल्वो
दुम्बरो वैश्यस्य दंडा इति गौतमस्मृतौ हस्तस्य श्लिष्टं दंडेन सह पीलुहेक्षदंडस्य विकल्पः पूर्वपक्षे सिद्धांते तु
पीलुहेक्षदंड एवेति॥ ॥इदानीमाचार्योक्तं वृत्तोकांतरे दर्शयन् स्मृत्याचारविरोधे वा साम्ये वैषम्ये स
माधे। समा विप्रतिपत्तिः स्यान्मूलसाम्याद्द्वयोरपीति वार्तिकप्रथमपादं स्वत्रस्थानीयत्वेन लिखति।
स्मरतीति। यत्रेत्यस्यादिष्विपत्यनेन सामानाधिकरण्येनान्वयः आदिपदेन पर्युषितभोजनादिग्रहः। वि
रोध इति। मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव त्यक्त्वा चांद्रायणं चरेदित्यादिनिषे
धादिति भावः। अनुल्येति। स्मृत्याचाराणामित्यादि। ननु न स्मृत्याचारयोः समबलत्वं युक्तं स्मृतेः साक्षा
च्छ्रुत्यनुमानेन प्रामाण्यमाचारस्य तु वक्ष्यमाणरीत्या स्मृत्यनुमानद्वारा श्रुत्यनुमानेनेति वैषम्यात्त
त्रापि वैषम्ये समबलत्वे श्रुतिस्मृत्योरपि तदापात इत्याशंकां परिहरन् पूर्वपक्षश्लोकेन संगृह्णाति। बले
ति। श्रुतिस्मृत्योर्बलाबलविशेष इत्यन्वयः। कक्ष्येति। कक्ष्यपा श्रुत्यनुमानव्यवधाने नांतरितं भावप्रधा

श्रा॰ दी॰
४१

नोनिर्दिष्टो ध्यवहितत्वं तेनकारितैः इह स्मृत्याचारयोः एवं तत्र श्रुतिस्मृतिवद्बलाबलविशेषो
नास्तीत्यर्थः अत्र हेतुर्द्वयोरपि। श्रुतिमूलत्वात्। श्रुतिरूपात्मत्वात्। श्रुतिमूलकत्वादित्ति या
वत्। तथाचाचारस्य स्मृत्यनुमानद्वारा श्रुत्यनुमानरूपव्यवधानेन मानाभावात् स्मृतिवद्वेदसाक्षा
च्छ्रुत्यनुमापकत्वात् स्मृत्या समबलत्वं। न च श्रुतिस्मृत्योः समबलत्वापत्तिः श्रुतेः स्वतः प्रा
माण्यं स्मृतेस्तु श्रुत्यनुमानेनेति वैषम्यादिति भावः। श्लोकार्थं विशदयति श्रुत्येति। श्रुती
यते श्रमीयते ये केति स्मृतौ रित्यादिः। एकेन। श्रुत्यनुमानेनान्तरिता प्रामाण्याद्धतोरित्यर्थः। ब
लीयसी स्मृतितद्वत् साद्दिः तत्र। श्रुतिस्मृत्योर्मध्ये स्मृतेः प्रामाण्यं यत्रद्धुक्तमित्यन्वयः। विरोधा
धिकरणे श्रुतिविरुद्धस्मृतीनामप्याचार्यैः प्रामाण्यं कक्षेलत्था घातमाशंक्यो क्तमर्थाभ्यां ननु
द्धानेति। प्रमितिजनकत्वरूपं तु न त्वीक्रियत इति भावः। इह श्रुतिस्मृत्योः विशेषः प्रामाण्य श्रीरामः
एव प्रामाण्यरूपः। एकेति। एकेन श्रुत्यनुमानेनान्तरितयोः अन्तरितप्रामाण्यकयोरित्य ४१
र्थः। अविशेषाद्बलाबलविशेषाभावात्। आचारात् कर्तव्यता स्मृतेः स्वाकर्तव्यतेति वृद्धाः ने

त्वाचरयोः

हृत्येरां तत्रापुरुषस्य महत्त्वं कष्टमित्याशंक्य बोडेशीयुक्तणाय ह राग वद्धिकल्पोपपत्तेरित्याभिप्रेत्य
पूर्वपक्षमुपसंहरति तस्मादिति। तस्मात्प्रामाण्यापादिविशेषाद्धिमित्यर्थः। स्वमात्रमन्यतरेण वाध्येत्यर्थः। वि
प्रतिपत्तिः। उदाहृतस्मृतिरेवप्रमाणमाचारएवप्रमाणमितिविरुद्धनिश्चयपरस्परार्थः। स्मृतेरैकान्तिरि
तं प्रामाण्यमाचारस्यतुद्यतेरितमिति श्लोकेन दर्शयन्नुसिद्धान्तमारभते। स प्रत्ययेति। प्रत्ययोत्र विश्वा
सो वेदतत्त्वज्ञानं चन्तत्रैरागोपाजन्तेतत्साहि गाम न्वादयस्तत्साहितं च कर्माडिष्यतयात्राश्रयतयाचेते:
प्रतीतेसने तु स्मृतेर्विश्वसनीयवेदतत्त्वतत्कर्तृकत्वात्प्रामाण्यं दृढनिश्चय यः साक्षाच्छुत्यनुमाप
कत्वयोग्यत्वाच्चैकान्तिरितं प्रामाण्यमाचारस्यतु प्राकृतजनकर्तृकत्वेन तद्योग्यत्वाद्धीनगत्याश्रयस
नीयते स्मृत्यनुमानद्वारा च यं तान्तरितं प्रामाण्यमिति स्मृतेराचाराद्गुत्कर्षोदर्शितः उत्कर्षान्तरमाह स्मो
पनिबन्धनेति। उपनिबन्धनमितस्ततोविप्रकीर्णत्वपरत्वकरणगतत्व सिद्धवन्निर्देशाकल्प्यत्वादि
नानि रोहिताम्निविधीनुपसंहृत्यतत्र तिपाद्यकर्मणां कर्तव्यत्वपरत्वकरणगतत्व सिद्धवन्निर्देशाकल्प्य
त्वादि—त्वकथनं तद्युक्ते त्यर्थः। अनेन चाचारस्य स्वरूपमात्रेदृष्टपतेनेनतु कर्तव्यताबोधनमीयतइति

ततः स्मृतिनित्कर्षोद्दर्शितः विशेषणद्वयफलमाह नैवेति। अर्थसिद्धमप्याचारापकर्षं स्पष्टमा
ह अनिबंधनादिति। कर्तव्यत्वकथनस्यानिबंधनमपि नास्ति उक्तोपसंयवस्तद्द्वारापेत इति द्योतना
योपोपसर्गत्यागः। एतच्चोपलक्षणमश्वसयजनकर्तृकादिष्वपि बोध्यं। श्लोकं व्याचष्टे। प्रत्ययेते
ति। प्रत्ययपदमुक्तार्थकं। गुणशब्दोपि तद्द्वयपरः चारित्रमाचारः। विश्रंभणीयमिति। विश्रंभो वि
श्वासः। प्रामाण्यनिश्चयः। एतेनाचारस्य द्वारा विश्वसनीयत्वं सूचितं। अघविशेषणस्यैव तात्पर्या
र्थमुक्त्वा तस्यैव तात्पर्यार्थोन्तरमाह। अपि चेति। विप्रकीर्णश्च परप्रकरणगताश्च आदिना सिद्ध
वत्त्वेदे शाखान्तरीयगताश्च श्रुतेय सा सामसुद्धरणेन संकलनेन। स्मरतीति। विमता आचाराः स्मृ
तिमूलकाः श्रुतिस्मृत्यविरुद्धत्वे सति धर्मबुद्ध्या श्रुत्यनभिज्ञकर्तृकाचारत्वात् व्यतिरेकेणादर्शा
दिवदित्यनुमानेनेत्यर्थः। स्मृत्याश्रुत्यनुमानेनेत्यर्थः स्मृत्याश्रुत्यनुमानं तु स्मृत्यधिकरणे दर्शि
तं। एवमाचारस्याद्यविशेषणाभावकृतमपकर्षमुक्त्वा अनिबंधनत्वकृतमाह अपि चेति। विम
र्शमेवाह। अर्थसुखेति। कल्पयितव्येति। विमतो विधिबोधितप्रवर्तनाविषयः अर्थसुखेच्छाद्यहे

तु कृतत्वे सति शिष्टाचारत्वादित्यनुमानतश्चोत्पत्तिर्मूलकल्पनं विधायकस्मृत्यादिकल्पनं। एवं
स्मृत्यविरुद्धानामाचाराणां स्मृतितो ऽविप्रकृष्टत्वमामोप्युक्तानहि रुद्धानां तु तेषां विप्रकृष्टमपि
प्रामाण्यं नास्तीत्याह सर्वेषां चेति। कथं वितविकल्पाश्रयणेनापि संभवात्सुपगमेनोक्ताऽभ्युपगमे
ऽपजातिनचेति। अत्र संभवे हेतुमाह। वक्ष्यतीति। अतिरात्रे षोडशिनं गृह्णातिनातिरात्रे षोडशिनं गृह्णा
तीत्यादिकृतत्वर्थस्य लेतु निषेधेनग्रहणस्य कृतूपकारकत्वाभावो न बोध्यते। किंतु ग्रहणाभावस्य क्रे
तूपकारकत्वमात्रं बोध्यते तेन तत्रश्रुते वैकल्पे एव वक्ष्यते नो विधिनिषेधाभ्यां विरुद्धत्वमावहयोनापादयेता
न्ते तो वैषम्यमत्रेत्यभिप्रेत्य सत्र कृते नविरुद्धत्वया प्रत्यक्षं दर्शयति नहीति। विनिगमकमाह तत्रेति। उपसंहर
ति सिद्धमिति। विहद्वेषु बाल्लादेलौके ऽन्योर्थः प्रतीयते। वेदेन तदभियुक्तेश्च तस्मादन्यादिलक्षणादि
त्यादिना। उनरपि कृतं वर्णक्रान्तरं दर्शयन्न वैवहानिकापादत्वमत्र स्यानोपतेन लिखति। त्रिवृद्वर्हिवा
लादेरिति। विषयसंशयावाह। यत्रेत्यादिना। यत्र त्रिवृदादिशब्दे सुलोके तोऽन्यो वाक्यशेषाच्चान्योऽर्थ इति
नयोः संबंधिनी अर्थगोचरा विरुद्धप्रतिपत्तिस्तत्र संशय इति योजना। विप्रतिपत्तिं दर्शयति। पूर्वेति। लोका

शा०दी०
४३
43

दितिा त्रिवृद्वृन्नु रित्यादिव्यवहारादित्यर्थः। वाक्यशेषान्निति। त्रिवृद्वृहिष्यसमानमित्युक्त्वा उपास्मै गा
यतानर इत्यादीनां स्तोत्रसाधनत्वं भक्तानां नवानामृचामाम्नानाच्छारवांतरे नवभिः स्तुवंतीति श्रवणाच्चे
त्यभिप्रायः। वाक्यशेषाद्दिति। अदितिमोदनेनेत्यस्मादित्यर्थः। अश्वस्य वालू इति। योगादिति शेषः। वाक्यशे
षादिति। यत्नो वै देवेभ्योऽश्वो भूत्वापाक्रामत्स सोमः प्राविशत्। सवालधो गृहीतस्तान्वालानमुक्त्वा वि
वेशा हते वालाः क्वाशा तो प्राप्ताः कार्यो तैः प्रस्तरस्कते रित्यस्मादित्यर्थः। वार्तिके आदिपदसंग्रहीतमाह ए
षत्र्याविति। क्वाशामूलपरो वाक्यशेषो मृग्यः। तुल्यबलत्वमिति। ततश्च तत्त्वादिषु स्यापि तुल्यबलत्वमि
ति शेषः। उक्तेति। वाक्यशेषबलीयस्त्वादिति शेषः। ननु वेदस्य धर्मे प्रमितावंतरंगत्वात्तस्य। सिद्धेः प्राबल्या
त्कथं तुल्यबलत्वमित्यत आह पदेति। पदार्थस्य पदसंबंध इति क्रियहीक्ष धर्मविषये लोकस्य बहिरंगत्वेपि
वदपदार्थसंबंधविषयेनासौ तेतो न्यून इत्यर्थः। ननु वाक्यार्थस्य वाक्याधीनत्वाद्धि स्तु ईशादेव त्रिवृद्वादि
पदार्थसंसर्गरूपवाक्यार्थधीः पदार्थ एव संदिग्धो लोकादिनावधार्यत इत्यर्थः। अन्वयीति। एतदेनाव
हवगम्यत इत्यन्वयः। तस्य त्रिवृदादिपाद्यस्याभिधेयं किमिति। जिज्ञासायामन्यतः लोकाद्वा वाक्यशेषाद्वा

श्रीरामः
४३

रवा वाक्यार्थबोधात्किं लोकाद्यनुसारेणेनेति मुग्धाशंकां परिहरन् श्लोकं व्याचष्टे विधीति। सतिहि पदार्थज्ञाने ४२=

वर्गे न कर्तव्यमित्यर्थः। नेत्रेत्यादिव्याख्यातार्थम्। अधिकं वेति। वाक्यशेषगतपदार्थस्तु तत्रैव पिलोकाधी
नत्वादित्यर्थे न तु तत्र स्याः लोकाधीनत्वे पिण्डदानार्थं निर्णयेन तस्य लोकादन्यत्वमित्याशङ्क्याभ्युपेत्या
ह इत्यर्थेऽहृत्यमिति। सहकृत्तस्यापि पिण्डस्यागत्याच्चाहृत्रिस्त्रीकारात्रितयं बहिष्युवमानं कर्तव्यमिति वा
ऋद्धवकेन कर्तव्यमिति वार्थो वा धात्री हि यवव्रीहिकल्पनानुष्ठानमित्यर्थः। वामेकत्वमिति। विधिनात्वे
कवोमत्वादिति न्यायसिद्धमिति शेषः। विधिस्तुत्योर्विध्युद्देशार्थवादयोः। विषये मातत्रार्थे क्यात्व।
तेन। एकवाक्यतायार्थैकावबध्यभावेन बलीयसीति। विधिस्तुत्योर्भिन्नविषयत्वे विध्यविषयस्य स्तुत्या
नर्थक्यादानर्थक्यप्रतिहतानां विपरीतं बलाबलमिति न्यायेन वाक्यशेषस्य प्राबल्यमिति भावः। यद्य
पि त्रिहविति ऋद्धवकाम्नानं नार्थवादः किंतु ऋद्धवकविध्यर्थं तच्चावाक्येपि संभवति तथापि तस्यात
द्विधिमात्रार्थत्वे विध्युद्देशत्रिहविरित्यस्य वैयर्थ्यापत्तिः। न च त्रैगुण्यविधानेन तत्साफल्यमदृष्टदोषदुष्ट
विकल्पापत्तेरतस्तत्साहितं तत्राम्नानं तस्य ऋद्धवकाभिधायकत्वपरमिति। हापिवाक्यशेषात्त्रि
गीयइत्याशयेन श्लोकं व्याचष्टे यदीति। संबंधः। विधिना सहार्थवादस्याविधेयस्तावकत्वरूपः। ऋद्धव

ग्रा॰ टी॰ प्र॰ कात्स्न्यानस्यविधेयतद्गुणतात्पर्यकत्वरूपइत्यर्थः। तस्मात्उक्तसंबंधाविषयकत्वात्। तदनुगुणगुणान्वाम्न
४४ मेधानुगुणः। नन्वस्याधिकरणस्य दाशमिकेन पुनरुक्तिः। तत्र किंचिद्विशिष्टदिल्सादोत्त्रिवृच्छब्दस्य स्तो,
44 त्रीयानवकार्थकत्वं वक्ष्यत इत्याशंक्यापरिहर्तुमेतदधिकरणसिद्धमर्थमनुवदतीत्येतावदित्यादि। सामिवा
कशेषेतदनुगुणगुणयोर्ग्यात्वइत्येतावदित्यर्थः। एतदुपजीवनेन दाशमिकवक्ष्यमाणमाह यद्वाचेति। अवधारि
तमित्यनेनेरितहोतिपदं द्रष्टव्यो। वक्ष्यत इति। एतन्यायसिद्धरूढिबलाद्यस्ववेतदर्थकत्वस्य तत्र वक्ष्यमाणत्वा
त्तस्य चैतदधिकरणप्रयोजनत्वान्न पुनरुक्तिरित्यर्थः। वर्णशब्दस्य त्रैगुण्यप्रज्ञानुबंधकोभयशक्तत्रिवृच्छ
६ ब्दवेलरूपयदनुदाशमिकं चाधिकरणस्य पूर्वपक्षवदेतदधिकरणप्रयोजनत्वान्न पुनरुक्तिरित्याह। यावे
त्यादिना। वर्णशब्दः स्याल्लाक्षणिकइत्यन्वयः। अपिशब्दात्त्रिवृच्छब्दवन्नानार्थत्वेन प्रसक्तोपि समर्थ
कः। लक्षणाबीजं संबंधमाह। ओदनेति। एतेनैत्रैगुण्यप्रज्ञानुबंधकयोर्लक्षणाबीजसंबंधाभावात्त्रिवृच्छ
ब्दस्य नानार्थकत्वमिति सूचितं। ओदने लाक्षणिकः स्याल्लोशक्त इति किंन स्यादित्यत आह नानेति। श्रीरामः
उभयत्र शक्तिरस्तु तत्राह अन्याय्येति। तेन। ओदनशक्तत्वनिश्चयेन। ओदनवचनत्वमेव ननु लाक्षणि ४४

कस्यालीपरत्वाशक्तेर्लक्षणातो बलवत्वादित्यर्थः। रूढत्वादिति। यद्यपि शीर्षेश्वस्याप्यन्यार्थकोशा
नामश्वकेशेः साहश्यमस्ति तथापि गौणत्वस्य पूर्वोक्तस्य संबंधाधीनत्वात् तदीन्तरसापेक्षत्वे सामर्थ्याभावाद्
श्ववालइति। तद्धि तान्तापन्नेन गौणत्वं एक्षशीर्षा हेतु गौणत्वमन्ताशंका मेवेति भावः। अन्यत्रापि वाक्यशे
षरहितस्थले पित्र्यध्यायोपांत्याधिकरणेन पौनरुक्त्यमाशंक्य परिहरति नचेति। असंदेहादिति। तत्र
यज्ञोः शर्कराउपदध्यादित्युक्तशब्दोक्ताञ्जनसाधनेद्रवद्रव्यमात्रेज्ञाते किं तद्घृतं तैलमन्यद्वेति संदेहे
तेजो वै घृतमिति वाक्यशेषात् घृतनिर्णयः कृतः इह तु न तथा संदेह इत्यर्थः। तदेवाह इहहीति अर्थान्त
रं त्रैगुण्यादि तथा च वाक्यशेषस्य संदेहनिवर्तकत्वे पित्र्यबलाद्विपरीतनिश्चयनिवर्तकत्वेन संभवतीत्यधि
कोशंकानिराकरणाय इदमधिकरणमित्यर्थः॥ ॥चोदितं तु॥ ॥पूर्वोक्तस्य म्लेच्छप्रसिद्धप्रामाण्य
स्यापवादात्संगतिरित्याशयेनाह। आर्येति उक्तमिति। भाष्ये यवादिशब्देषु गतिके पीलवात्वादिशब्दे वि
तिशेषः। कचिदिति। कोकिलादिष्वपि पिकादिपदप्रयोगो लौकिकः एतदेवाधिकरणमूलइति भावः। को
किलेति। पिकशब्दः कोकिलेनेमशब्दोर्द्धसनशब्दः शतछिद्रपरिमण्डलदारुपात्रे तामरसशब्दः पद्मे

शा०दी० ४५ उत्यर्थः। विचारप्रयोजनमाह तत्र यद्दीति तेषामितिः। पिकमालमेतं मतो हि रूपं निधाय स्माद्दिचोदना
४५ गतानामिति शेषः। सापि म्लेच्छप्रसिद्धिः। सैव म्लेच्छप्रसिद्धिरेव। ननु वार्त्तिके म्लेच्छप्रसिद्धेरपि प्रा
45 माण्यमंगीकृत्य तत्स्थानिरुक्तादिप्रसिद्धेश्च बलाबलविचारस्याप्यत्र कृतत्वात्कथं प्रामाण्यमात्रव्यु
त्पादनमेव। आचार्यैस्त्वन्यतः सिद्धमेवत्र संगादत्रोक्तमित्याह। तदत्र म्लेच्छेति। इयमेव निरुक्तादिप्र
सिद्धिरेवान्यतः कृतः किं सिद्धमित्यपेक्षायामाह शिष्टेति। शिष्टाकोपाधिकरणे प्रमाणाहारकोद्ध
लाबलात्वमेयस्वरूपगतमेव बलाबलं ज्याय इत्येतद्व्यवस्थितमित्यर्थः। ततः किमित्याशंक्य तेनैवगता
र्थत्वात्प्रासंगिकमेवैतत्प्रामाण्यव्युत्पादनमेवाधिकरणार्थ इत्याह तेनैवेत्यादिना। ननु शिष्टाकोपेप्र
माणाबलाबलात्वमेयबलाबलं ज्याय इत्युक्तमिह त्वाश्रयबलात्स्वरूपबलाबलं ज्याय इत्युच्यते
ततो भेदादगतार्थता तत्राह प्रायमिति। यो बाध्यबाधकभावो विचार्यते तत्स्वरूपगतं बलाबलं तत्संबध्य श्रीरामः
न्यगतबलाबलापेक्षया ज्यायः स्वरूपापेक्षयान्यस्य बहिरंगत्वादित्येवं न्यायशरीरमुभयत्र समं। तत्त्वन्यत्व ४५
चिन्त्यमाणं कविहाश्रयस्य सत्येतेतिहि भावः। वार्त्तिककारीयो बलाबलविचारः प्रासंगिकमाह भाष्यका

सं इत्यत्रकेमक १

रणोति। अस्य चिंत्यन्त इत्यनेन संबंधः। तु शब्दोऽवधारणे। श्लोके पदार्थानामित्यस्य हृद्वत्समासत्वं। वि
श्रुतिर्भूयसीत्यनुपादयत्र शब्दाङ्गत्वार्थत्वं च दर्शयन् श्लोकं व्याचष्टे पदानीति। पदानाम प्रत्येकं शोनामावा
च्यपरत्वेऽयोगः। निर्विभक्तिकत्वे च विभक्त्यन्तं वैदिकपदवैलक्षण्यं चेत्यर्थानां तु गोणानाघापत्तिः क्वचित्या
दिपदिकमात्रस्याविकृतत्वान्मायईत्वकोऽइव शब्दो वा मालंकारे फलितमाह अत इति। वैदिकपद हृत
त्वेऽभिन्नत्वान्न्लोकाद्युगनपदस्न इदृथानामित्यर्थः। ननु नायं विवक्षोऽप्ययं शिनदविशुभेयं तत्रान्यथाव्यव
हारविप्लवापत्तेः। तन्न्लाद विप्लवस्यैवसाधायमाह नहीति। इत्यर्थे व्यवहारस्य येषाकथं चिदपि संभवादिति
भावः। ननु हि विकाश्चिपदानां न्लेकवशि दार्थत्वागेत्यायेषपिके स्यां विदर्थस्याज्ञसिद्धस्त्वनुष्टा
न च्छेदनानामानयथसंस्थानत्राह निरुक्तादीति। जर्भर्यो दिविदिति भावः। दर्शनादिति। प्रत्यभिज्ञाना
दित्यर्थः। विभक्तभावेऽपि ज्ञातिपदिकाशस्य वैदमदं गेधवत्प्रत्यभिज्ञायमानत्वान्नान्यत्वमिति भावः। अ
विप्लुतानि अनुपभ्रंशरूपाणि अश्लिष्टानीति यावत्। पदाविप्लवे फलितमाह तेषां चेति। पदाना
मित्यर्थः। निःसन्देहं विप्लुतेनार्थेनेत्यन्वयः। ननु पदे कोऽपि प्रीत्यादिवदर्थविप्लवोऽस्तु तत्राह। अ

भा॰ दी॰ ४६ 46

येष्विति। असो नित्योर्थः। यतः नित्यार्थसत्वात्। म्लेच्छेष्वपि विङ्गुतिगौणत्वादिरूपा कल्प्येत तत यासो
नित्योऽर्थ आर्येष्वनास्तीति योजना। निरुक्तादिना प्रकृत्यादिविभागेनार्थकल्पनाया अनियतत्वा
त्ततो नित्यार्थलाभो जैमिनीयादौ त्वगत्या तदनुसरणमिति भावः। फलितमाह। म्लेच्छप्रसिद्ध एवेति।
अर्थो मुख्यार्थेन तेन मुख्यार्थस्यान्यस्याभावेन श्लोकं व्याचष्टे॥ पिकेति। अधिकरणार्थमुपसं
हरति। तत इति। पील्वादिष्वव्यवच्छिन्नमिति। अविरुद्ध इति। निरुक्तादिकल्प्यात् तत्स्मृतत्वाद्बलवद्धेतु
माह प्रसिद्धेति। सत्त्वे म्लेच्छैश्चाहितव्यवहृतमपि वीतयेन ग्राह्यं स्यादिति यावत्। प्रमाणेनार्थव्य
वहारेण विरोधात्॥ ॥प्रयो॥ ॥शंकावसराय भाष्याक्रमाह अत्रेति। कृतु प्रयोगं पादमात्रे
ण स्पष्टं कल्पयन्तीति कल्पा बोधायनीयादयः। सूत्रजसंज्ञापरिभाषादिभिः प्रयोगस्य सूचका
न्याश्वलायनीयादीनि सूत्राणि। नन्विह भाष्ये कल्पसूत्राणां प्रामाण्यमिति हवे पक्षं कृत्वा तदप्रा
माण्यं व्यवस्थाप्यते। तच्च स्मृत्यधिकरणे सर्वस्मृतिप्रामाण्यव्यवस्थापनेन विरुद्धमित्याशंक्य तेन
न्विति। इत्येति। तथा चोक्तरीत्या तद्विरोध इत्यर्थः। आक्रु परिहारमिति शेषः। तत्र। स्मृत्यधिकरणे।

श्री रामः ४६

वेदेत्यर्थः ॥ एतानि कल्पसूत्राणि वैदिकेति । प्रत्यक्षवेदविहितार्थनिबंधनत्वादित्यर्थः ॥ प्रत्यक्षशाखानि प्रत्यक्ष ४१

अपाद्धतया अवेदमूलकतया । शङ्केति मूलं वेदमूलानि तथा च प्रत्यक्षवेदमूलेषु वेदमूलत्वाभा
वपूर्वपक्षस्यानुमेयवेदमूलकत्वमिति । तस्य च कल्पसूत्रेषु प्रवृत्तेर्नैसर्गिकत्वाधिकरणोदाहरणत्वमिति
न तद्विरोध इत्यर्थः । सिद्धान्ताविषयत्वमेव स्पष्टयितुं स्मृतीनां कल्पसूत्रवैषम्यमाह स्मृतेश्चेति । इत
स्ततो विप्रकीर्णत्वं प्रकरणगतत्वं वाक्यशेषगतसिद्धवन्निर्देशान्यथानुपपत्तिकल्पितत्वं चाविरो
हितप्रायत्वे हेतुत्रयं तत्राद्यस्याष्टकादिस्मृतिमूलश्रुतिषु प्रागेवोक्तत्वाद्द्वितीयस्य दर्शपूर्णमास
गतमलवद्वासोव्रतविधानादौ प्रसिद्धत्वात्तृतीयवाक्यशेषगतसिद्धवन्निर्देशकल्पितविधीनुदाहरति । त
द्यथेति । निर्दिष्टमिति । प्रसिद्धवाचिहिरण्यहस्तेनेति शेषः । दीक्षितदक्षिणानयनं जनप्रायण्यमनिनेतरसा
धारणेन मातुमिति भावः । तत्र विधिकल्पनं निमित्तमाह तत्रेति । दृष्टार्थेषु प्रमाणान्तरप्रवृत्ते रस्य च दृष्टप्र
प्रयोजनस्यान्यस्याभावात्तत्राप्राप्तस्य च सिद्धवन्निर्देशः कथंचिदुक्तो विधिं विना नोपप
द्यत इति मानुषीणां सख्यानयनं जनप्रायस्य विधिः कल्प्यत इत्यर्थः ॥ सिद्धवन्निर्देशान्तरमाह त
थेति आदित्यग्रहस्य हि देवताया ग्रहेभ्यो ग्रहणं सादयावारमस्ति । देवा वै यत्ताडुइमं तरायणस्य आदि

रसच रुद्रः आदित्यान्देवानन्यथा कृते देवादिदेवत्यान्यागंगताः तान्देवानुद्दिदेवत्यान् रुद्राय नापितवन्त ४५२५

शा॰दी॰ त्यानन्वाक्रमन्ततो हि देवत्यान्याप्नुयंतन्नान्वभवति त्रैयम्बकन्नन्तस्मादपि वध्यं श्रपन्नेन प्रातिश्रयणं इति
४७ तस्माद्धि देवत्येभ्य आदित्येभ्यो निर्गतत्वात्तद्धि मे देवायतं कुर्वन्नेतस्मिन्नाय हैत रुद्रं विस्मरन्न वन्तेन तस्मादध
47 त्वेपि वध्यम पिशरणागतेन न भवत्यथ यस्मादादित्यैः सह देवतानामादित्यानां हि देवतायस्य हेतु सन्निधा
नाहि देवत्येभ्योयह्यभ्य आदित्येभ्य ग्रहणेन गृहीते निर्गतत्वाच्चनतस्मान्नाव्यतिश्रयणं कृतो इति सिद्धवन्निर्दे
इति शाद्धरेणागतो न श्रपत्यवैणेयोविधिः कल्प्यत इत्यर्थः । सिद्धवन्निर्देशान्तरमाहान्तस्माद्गर्भेणेति स्थावि
ज्ञानोवा एष गृहीतेय ह्यायचणं स्थाल्याग्रह्णातिवायव्येनजुहोतीति विधिशेष स्तस्माद्गर्भेणेत्यादिः ।
आयण स्त्रेयो यहः स्थाल्याग्रहणसमये देवादिरितिमंत्रे एंद्रवायवादिमंत्रवद्देवताविशेषाविज्ञा ये
नाभावाद्विज्ञातोग्रहस्तस्मा न तं स्थाल्याग्रहीसमये देवादिरितस्मा विज्ञातत्वान्न स्थाल्यैव होत
व्यं किन्तु स्थाली गतं सोमं वायव्येनो र्ध्वेण पात्रे एषु नगे हीत्वा जे नजुहुयात्तथा सति वा ममघसे वि
न रित्यादि षुपुवन गृह्णे ग्रहणार्थमंत्रेषु होमार्थमंत्रेषु च समित्रादिदेवताविशेषविज्ञानसत्वाद वि ज्ञा श्रीराम:
नत्वदोषः परिहृतो भवतीति अविज्ञातस्य चदोषत्वतस्माद्गर्भेणास्य नेमोक्षा गर्भिणीवधे गर्भ ४७

स्यविशेषतोज्ञानाभावाद्दृष्टहाभवतीत्येवं सिद्धवन्निर्देशात्तद्धेब्रह्यहेत्याद्यं तत्कार्यमितिहत्याग
र्भेमविज्ञातमेतदेवव्रतंचरेदितिस्मृतिमूलंकल्प्यत इत्यर्थः। अतएवेति। तिरोहितविधिमूलत्वादेव
त्यर्थः। एवअष्टकादिषु। प्रत्यक्षेति। अस्मदादीन्प्रत्यक्षेऽश्रोतत्वमिति। प्रसिद्धमितिशेषः। ननु स्मा
र्तेश्रौतविभागस्यतिरोहितानितिरोहितविधिमूलकत्वानिबंधनत्वेगौतमादिकृतिविरोधः स्मृत्याहमगाहेस्यप्रत्य
क्षश्रौतत्वंप्रत्यक्षश्रुतिमूलकत्वनिबंधनमुक्तंतत्स्मार्तत्वनिसानुमेयश्रुतिमूलत्वनिबंधन
मितिगम्यतेतत्राह इममेवचेति। तिरोहितविधिमूलकत्वेलक्षणमेवगामित्रत्यगाहेस्यप्र
त्यक्षशब्दःप्रत्युक्त इत्यर्थः। गाहेस्थ्यस्येति। स्मृतौश्रेष्ठमितिशेषः। अनुमेयत्वमिति। नित्या
नुमेयश्रुतिमूलत्वरूपमित्यर्थः। आभिश्रेत्येत्यनुषंगः। तदनभ्युपगमादिति। भाकः। तदनभ्युपगमे
हेतुप्रागुक्तंस्मारयति। अथेति। कश्चित्कल्पितविधिमूलकत्वमस्तीत्यत्रगमकमाह अतए
वेति। कल्पितविधिमूलकत्वादेवेत्यर्थः। स्मृतेः स्मृत्यर्थस्य अननुष्ठानविरोधाधिकरणोक्तमनु
पपद्यतइतिशेषः। नवकल्पितविधिमूलकत्वेप्रत्यक्षश्रुतिविरोधेपिविकल्पकत्वाविशेषा

त्वात्यक्षविधिमूलकत्वदेऽनुष्ठाने किं न स्यादित्याशंक्यान्याभासेनाविधिकल्पनाशंकयाऽनु
ष्ठानमुपपादयितुमतः शङ्कार्थं तावदाह स्मृतेर्योहीति ॥ किं तावदेतत्त्र आह । कल्पनाचेति । अनुपप
न्ना । आभासरूपा भवतीत्यर्थः । नेतु कल्प्या नो याऽत्र प्रत्यक्षश्रुतिमूलत्वसंभावनयाऽनाभासत्वधीः
किं न स्यादित्याशंक्य तर्हि प्रत्यक्षश्रुतिविरोधवत्स्थत्युतर संभावनाभ्याविप्रतिपत्तिस्संभवतीत्याह ने
नेति । अविरुद्धविषयत्वादिति । विधिकल्पनामात्रदृष्टान्तः प्रदृष्टाःप्रवर्तितेन । आघतेषु निशोधितिस्ता
ये प्रातरिस्यर्थ दृष्टा प्रवृत्ते स्यनुषंगः । विचिकित्सा भ्रशयः नन्वेवं विवेकि स्मातेः किं पाक्षिके मापि स्मृ
त्यर्थस्यानुष्ठानं स्वीकार्यमेत्याह यावदिति । एवं स्मृतीनां कल्पसूत्रवैलक्षण्योपपादनस्य फलमा
ह तेनेति । अनुमेयश्रुतिमूलकत्वसिद्धांतस्य योग्यत्वेनेत्यर्थः । तत्र । स्मृत्यधिकरणे । नेति प्रत्यक्षश्रु
तिमूलकत्वादिति भावः । भवतु वा कल्पसूत्राणामपि तत्पक्षधिकरणविषयत्वं तथापि न विरोधः ॥ स्वातं
त्र्येण प्रामाण्याभावपरत्वात्तद्भाष्यग्रन्थस्याशयेनाह । किं चेति । इतोऽनि । चिंतेत्यनुषंगः । नो हि स्मृतीना
मपि तथैवेह विचारः स्यादित्याशंकेऽत्रापस्यापक्षांतरमाह यद्वेति । निराकरणमिति । क्रियत इति ।

शेषः। क्वाचित्कारस्यापि मतं प्रसमाह-

कः। अत्र गणपरिग्रहे स्वपक्षे मोक्षं च हेतुमाह। तेषां मीमांसकानामिमौ विरोधाधिकारस्यापि॥ वेदेतानीति यद्यपि वेदपक्षास्ततः कार्यवत्त्वात्प्रमाणमभिमतास्तथापि तत्र केचिदित्युक्तिः। वराहीति। कल्पसूत्रमन्त्रादिग्रन्थानां शास्त्राणां वेदार्थरूपाणामित्यर्थः। सह विचारहेतुः। समानेति। एवं च पिकादिशब्दार्थनिर्णये म्लेच्छप्रसिद्धेः स्वातन्त्र्येण प्रामाण्यवद्वेदेष्वपि स्वातन्त्र्येण प्रामाण्यमित्युपस्थानोत्संगतिर्बोध्या। अपौरुषेयत्वे वेदत्वात्तत्स्वातन्त्र्येण प्रामाण्यं पौरुषेयत्वे तन्मूलत्वेन फलकूटिभावः। शाक्यादिग्रन्थानां प्रामाण्यस्य सर्वथाप्यनभ्युपगतत्वेन स्वतः प्रामाण्यदूषणपादमित्यर्थत्वात्तत्र वादानुपपादयति। तत्र व्रातीति। एतेभ्यः शाक्यादिग्रन्थेभ्यः स्वत इति प्रामाण्यं स्वतन्त्रस्य तर्कपादे स्थितत्वादिति भावः॥ दृष्टिदृष्टस्वतः प्रामाण्यं तदनुगुणत्वादित्यर्थः। अपौरुषेयत्वमिति। ततश्च वेदत्वात्तत्स्वातन्त्र्येण प्रामाण्यमिति शेषः। अविगीतमिति। अबाधितमित्यर्थः। वैदिकपरिग्रहादिति भावः। तत्तस्मात्प्रामाण्यात्। एषां मन्त्रादीनाम् इतीति इति विमर्शसत्तेत्यर्थः। न्याय इति लाघवादिति भावः। तस्मात्प्रामाण्यात् एषां मन्त्रादीनां इतीति इति विमर्शसत्तेत्यर्थः। ततश्च वेदत्वात्तत्स्वातन्त्र्येण प्रामाण्यमिति शेषः। अपौरुषेयत्वमिति।

ग्रा·टी·
४२
49

अत्रापि पूर्ववत्तच्छेषो बोध्यः। पठितेऽपि पठितस्य पाठः पाठपरंपरेति यावत्तेन तत्प्रत्यक्षो यो वेदस्तदर्थोप
निबंधनात्। ननु प्रत्यक्षवेदार्थोपनिबंधनादेवेतरार्थं तु ध्याविरचितत्वस्यं पौरुषेयत्वमेव किं न स्यात्तत्रा
ह नहीति। नन्वपौरुषेयत्वे बोद्धादिसमाख्या उपपन्ना तत्राह वृद्धेति। प्रवचनामध्ययनं नन्वनकेव
लं समाख्या किं तु लोके मन्वादयस्तत्कर्तारः स्मर्यंते तत्राह तन्निमित्तेति। प्रवचननिमित्तेत्यर्थः न
न्वेवमपौरुषेयत्वे वेदस्य विच्छिन्नाध्ययनपरंपरा स्यादित्याशंक्य प्रमाणेनेत्याह भवतीति। अत्रापौ
रुषेयत्वसाधके अविच्छिन्नाध्ययनप्रयोगोऽनुमानं बोद्धेति। आदिना कल्पमन्वादिस्थानत्रयसंग्र
हः। सिद्धसाधके अविच्छिन्नाध्ययनप्रयोगोऽनुमानं बोद्धेति। आदिना कल्पमन्वादिस्थानत्रयसंग्रा
हः। सिद्धसाधनवारणाय सर्वमिति हेतौ बोद्धेत्यत्रादिपदं द्रष्टव्यं। बोद्धाद्यध्ययनत्वादित्यर्थः रघुवं
शाद्यध्ययने व्यभिचारवारणाय बोद्धेति भागासिद्धिवारणायादिपदं। कल्पानां तु विशेषमाह कल्पा
नामिति। नित्यता अपौरुषेयता। निषेधविधिविषयत्वमुपपादयति अयत इति। इतिहासपुराणनाम
प्यपौरुषेयत्वमिष्टमिति भावः। कथमिति। नित्यानित्यसंयोगविरोधादिति भावः। कल्पानामपौरुषेयत्व

श्रीरामः
४२

५०

ॾ

मुपसंहरतितस्मादिति। तदर्थमेवाह नित्येति। स्वातंत्र्यमपौरुषेयत्वं अत्रापि पूर्ववच्छेषो बोध्यः। ननु
२९ पौरुषेयत्वमसिद्धं तत्राह स्पष्टं चेति नन्वकर्तृस्मृतिः प्रवचनप्रयुक्ता भ्रान्तिरित्युक्तमित्यत उक्तं दृढेति।
मन्वादिग्रंथेष्वेव मन्वादिकर्तृत्वस्योक्तत्वान्न भ्रान्तिरिति भावः। दार्ढ्यमेवोपपादयति। पुरुषेति। एवं च
ग्रंथेष्वेव कर्तारस्तद्ग्रंथप्रणेतारः पुरुषपरंपरया स्मर्यंते मनुनेदं कृतमापस्तंबेनेदमित्येवं निबध्यंते
परंपरयेति। ग्रंथभेदेन कर्तृणां बहुत्वमात्रे तात्पर्यं न तु जन्यजनकभावाभिप्रायेण। अथवाकर्तृस्म
र्तार एव पुरुषाश्रयणाद्विवदविच्छिन्ना इत्यर्थः। काठकेति। यथा काठकादिसमाख्या प्रवचनप्रयुक्ते
त्यन्यथानीतान याः स्मर्यमाणाः कर्तारः प्रवचनप्रयुक्तास्तत्कर्तार इति स्मर्यंत इति नेतुं न शक्यंत इ
त्यर्थः। शोभ्रोक्तत्वे हेतुः ग्रंथेष्वेव कर्तृस्मरणं। अस्मदादिवधिस्मार्त्तपुरुषाविच्छेदो वेत्युक्तमेव स्पष्टयति। ५
नत्वहीति। मात्रपदेन कर्तृस्मरणाव्यवच्छेदः। अन्तरिति। एवकारो भिन्नक्रमः। एषेव ग्रंथेष्वित्यर्थः। स वे
षां स्मदवधीनां यत्न्नक्तं मंगानां वेदतत्स्मरणं जदन्यथयति षडिति। यच्चोक्तं प्रत्यक्षवेदार्थप्रणयन
व्यर्थमिति तत्राह नानेति। अनपेक्षैः पुरुषैरिति शेषः। तादर्थ्येन तात्पर्येणास्मत्यर्थोपसंहारार्यत्वेनत्र

शा॰दी॰ ५० 50 नित्यत्वे नित्यविधिविषयत्वानुपपत्तिं परिहरन्ति। एवंविधाश्चेति। केनचित्क्रियमाणा इत्यन्वयः। क-
ल्पनात्प्रयत्नात् नित्यया नित्यवेदार्थकल्पनरूपयोगनिबन्धनत्वेन नित्यया उपसंहरति तस्मादि-
ति। स्वातन्त्र्येणोत्पन्नेन मूलश्रुत्यधीनेन तु प्रामाण्यमिष्टमिति दर्शितं शाक्यादीनां तु सर्वथाप्यप्रामाण्य-
मेवेति विशेषमाह शाक्येति। कल्प्यादिष्विति इत्यपि प्रामाण्यं न निरंकुशमित्याह कल्प्यादिष्विति। अवि-
शेषादिति। व्याख्यातमिदं विरोधाधिकरणे भगवत्सौकिं तत्प्रत्यक्षशास्त्रं यद्विरोधादप्रामाण्यं तदा-
ह संनिहितं चेति। चकारात्तन्यायविरोधो गम्यते। चतुर्धाकरणेनयेनयोश्चतुर्धाकरणस्यानिरमिष्य-
माणत्वादिति भावः। न्यायविरुद्धं वचनांतरमुदाहरन्ति। तथेति। अग्नीषोमीयपशौ पशुमालभ्य पुरो-
डाशं निर्वपतीति पशुयागे याद्देवतानां देवताकपुरोडाशयागोंगत्वेन विहितः सवनीयपशावपि तथैव
चोदकेन नित्यं प्राप्तः स कश्चित्कृतः कश्चिदकृत इति विकल्प्यत इत्युच्यते। इदं च विकल्पवचनं द्वादशा- श्रीरामः
ध्याये छिद्रापिधानार्थत्वात्पुरोडाशो न स्यादन्येषामेवमर्थत्वादित्यधिकरणे सवनीयपशौ पशुपु- ५०
रोडाशयागस्यानित्यत्वप्रतिपादनात्तत्र पूर्वपक्षमूलमित्यर्थः। कुत इत्यपेक्षायां तत्पूर्वपक्षोक्त हे-

नोरेकत्वस्तत्र कारेलपन्यासादित्याह । अन्यत्रेति । अन्यत्राग्नीषोमीयपशुयागगतपशुपुरोडाशयागे ।
ऽथो पशोरेव छिद्रमपिदधातीति वपोद्धरणानन्तरप्रयुक्तछिद्रापिधानार्थत्वश्रवणात्कृत्वा हि हि च छिद्रापिधान
स्यानुसवनं सवनीया निरूप्यन्तेऽपिहितस्य छिद्रताया इति सवनीयपशुरोडाशैरेव सिध्यद्वगमान्न तदर्थ
पशुपुरोडाशयागः कर्तव्य इत्यर्थः । अत्र योक्ता छिद्रापिधानस्य प्रत्यक्षबाधितत्वात्तद्वचनस्यार्थवादत्वा
द्देवतासंस्कारार्थ एव पशुपुरोडाशयागः । अकृताविनो हापि देवतासंस्काराविलोपार्थं नित्यं कर्तव्य एव स
वनीयपशाविति सिद्धान्तयिष्यमाणत्वात्स्यन्यायाभासमूलत्वमित्यर्थः । यावदिति । अर्द्धमन्तर्वेदि मिनो
त्यर्धं बहिर्वेदीत्यत्र वाक्ये अन्तर्वेदि बहिर्वेदिलक्षितो देशविशेषो यूपमानांगत्वेन विधीयत इति तन्नीत्याधिक
रणसिद्धान्ते हि तन्न यूपावटदेशस्य वेद्यात्मकत्वमनपेक्ष्यमिति वक्ष्यमाणत्वात् यूपैकादशन्यायाव यूपव
देशं वेदिमानवचनमापस्तम्बस्य तदधिकरणपूर्वपक्षे मूलमित्यर्थः । जाघनीमिति । पश्वैकादशिन्या
मित्यादिः पूर्वपक्षेणेति । हृदयाद्यवत्तानि प्रान्त्य जाघनीत्र निपत्य र्थनारास्तो संपाजानां सर्वजाघनीनां इति

श्रा·टी·प्र·
५१
51

पत्नीलक्षणसंस्कारादिलोपार्थमग्निभिः पत्नीसंयाजाः कर्तव्या इत्येवं पूर्वपक्षेत्यर्थः। कृतत्वापेक्षायां
तत्पक्षश्रुतिविरोधादित्यभिप्रेत्याविरोधिशास्त्रमाह तत्रेति ननु ग्रहैकत्ववज्ज्ञापन्येकत्वमप्यविव
क्षितमतः सर्वज्ञापत्नीनां प्रतिपाद्यतेत्याशंक्याह विवक्षितमिति। उपादेयेति। दर्शपूर्णमासयोराज्ये
न सह ज्ञापन्या विकल्पितत्वात्तत्र च तस्याः प्रतिपत्त्युपसत्त्वाद्गुणभूतत्वात्तत्रैव पश्चादपि विकल्पेन ज्ञा
ज्यो ज्ञापन्येति वा केन गुणभूताया एव तत्स्या नियमनेनाप्रतिपाद्यत्वादुपादेयगतसंख्याया विवक्षित
त्वाज्ज्ञापत्नीबहुत्वे यया कयाचिज्ज्ञापन्या पत्नीसंयाजाः कर्तव्या इति सिद्धांतयिष्यत इत्यर्थः। चमसे
ति। ग्रहं संमार्ष्टीत्यत्रैकत्ववद्ग्रहत्वमप्यविवक्षितं तत्तस्माच्चमसेष्वपि सम्मार्गः कार्य [redacted]
इत्यर्थः। चमसेति। ग्रहं संमार्ष्टीत्यत्रैकत्ववद्ग्रहत्वमप्यविवक्षितं तत्तस्मात् इति पूर्वपक्षं कृत्वा ग्रहत्व
स्याविवक्षितत्वप्रतिपादनेन चमसेषु सम्मार्गो न कार्य इति चमसाधिकरणे सिद्धांतितं। तदधिकरणा
पूर्वपक्षमूलं। पुरोडाशं पर्यग्निकरोतीत्यत्रापि पुरोडाशत्वस्याविवक्षया सर्वहविःषु पर्यग्निकरणावच

श्रीरामः
५१

नमित्यर्थः। अस्मिन्नाकेषु रोडाशत्वमवयंविगक्षितमित्यत्र सोऽत्र व्यवहारं लिंगमाह पशुरिति प
येग्निकरणं सर्वहविरंगं चेत्य शोः पुरोडाशविकारत्वे पुर्येग्निकरणरूपहेतुप्रतिपादनमसुक्तं स्यान्नस्नुह
विंत स्याधारणे पुरोडाशमात्रविकारत्वे हेतुत्वासंभवादित्यर्थः। प्रत्यक्षशास्त्रविरोधे कल्पसूत्राणाम
प्रामाण्यमित्यत्रैतदधिकरणगुणसूत्रसंगतिमाह तदिदमिति। सर्वस्मिन्नपि पूर्वपक्षे दर्शयागः कर्त
व्यः सर्वस्मिन्नप्यपरपक्षे पूर्णमासयागः कर्तव्य इति कल्पसूत्रे प्रतिपादनादमावास्यायाममावास्यया य
जेत पौर्णमास्यां पौर्णमास्या यजेतेति प्रत्यक्षशास्त्रसद्भावाच्चेत्यर्थः। नतस्मात्र प्रत्यक्षशास्त्रविरो
धे [redacted] सूत्रकारैरेवतेषामप्रामाण्योक्तेस्तत्साम्यादविशे
षाद्दुर्भेवेत्यादावप्रामाण्यमेवेत्यर्थः। सर्वे प्रयोगशास्त्रकल्पसूत्रं प्रमाणमिति चेन्न॥ ॥अत्र॥ ॥सं
गतिं वक्तुं वृत्तं कीर्तयति स्मृतीनामिति। स्मृतीनां श्रुतिविरोधेऽप्रामाण्यं विरोधाधिकरणेऽप्याचाराणां श्रु
स्मृतिविरोधेऽप्रामाण्यं स्मृत्याचारविरोधे त्वत्रेदाह प्रयोगरूपाचाराणां परस्परविरोधेऽन्यायं प्रयो
गरूपाचारस्याप्रामाण्यं यववराहाधिकरणे प्रतिपादितं तेषामविरोधे प्रामाण्यं स्मृतिशिष्टाकोपपिकने

साधिकरणेषु प्रतिपादितं कल्पसूत्राधिकरणे च स्मृतीनां वेदवत्प्रामाण्यं निरस्तमित्यर्थः । सं
गतिमाह इदानीमिति । केषांचित्तु होलाकादीनां स्मृतीनामिति । ग्रन्थानां स्मृतीनां चेत्यर्थः । व्यवस्थे
ति । व्यवस्थाया पूर्वपक्षं कृत्वाऽव्यवस्थाया साधारण्येन सिद्धान्तयत इत्यर्थः । एवं च विषयपरिशोधने
न तत्प्रामाण्यस्य स्थिरीकरणात्प्रामाण्यस्य स्वातन्त्र्याभावस्य चासत्त्वे व्यवस्थाव्यवस्थाविचारस्तु प
पत्त्येऽप्यसंगतिरिति भावः । पूर्वपक्षबीजं दर्शयति । होलाकोदय इति । होलाकावसंतोत्सवः । आर्कं च क्ष
पूजाहयोदाक्षिणात्येभ्यो तद्गणप्रज्ञादयः प्रतीच्योदर्चनापूर्वकं वृषभधावनरूपवृषभयज्ञादय उदीच्ये
रित्यादेशत्वार्थः । गत्यारण्णीति । कपालेभगालमिति ब्रूयादृभश्रृंभश्रमिति ब्रूयादित्यादिस्थमोविशेष
प्रतिपादकानीत्यर्थः । कैश्चिदिति । गोनमर्योऽभिलोपे । छंदोगैरेव नासिष्ठं बाह्वृचैरित्यादीत्यर्थः । स्मृ
त्य इति संतितत्रेति शेषः । कश्चिदिति । स्मृतिगृहीत्यर्थः । ननु स्मृत्याचाराभ्यां कर्तव्यतामात्रग
म्यते न तु व्यवस्थेति कथं पूर्वपक्षस्तत्राह तत्रैव लिंगेति स्मृत्याचाररूपलिंगेनेत्यर्थः । लिंगिकर्तव्यता
श्रुतिरूपं । ननु नायं नियमः । विनापि धूमसंयोगेन वह्निदर्शनात्तत्राह स्मृतीति । तथा च विषमो दृष्टांत

यदि स्यालस्यादिनिमित्तमितरेषामनाचरणं न तदा स्यादपि साधारण्यानुमानं यतो नियमेन भाव्याद्यभिमानिनामाचरणमितरेषां वानाचरणं
न तत्साधारण्यानुमानेऽवकल्पते एवं प्राप्ते ॥ मूलं ८

इति भावः । ननु लिंगस्य पक्षधर्मता तावल्लिंगिनः पक्षसंबंधमात्रं सिध्यति नान्यसंबंधाभाव इत्यत्राह नही
ति । विना प्रमाणमन्यसंबंधकल्पनमशक्यमिति भावः । न चार्थापत्तिस्तत्कल्पिकेत्याह व्यवस्थितेति ॥
प्रस्तुतबाधकमस्तीत्याह यदि चेति । तथा च केषांचिदनाचरणं न स्यादिति भावः केषांचिदनाचरणमन्य
थासिद्धमित्याशंक्याह । यदि चेति । तथा च केषांचिदनाचरणं न स्यादिति भावः केषांचिदनाचरणमन्यथासि
द्धमित्याशंक्याह । यदि हीति । अनाचरणमालस्यादिनिमित्तं यदि स्यात्तदा बाधकाभावेन साधारण्यानुमानं स्या
दपीति योजना । अनुमानमिति । ननु तथानाचरणस्यालस्यादिनिमित्तकत्वं साधारण्यानुमानं च संभवती
ति शेषः । कुत इत्यपेक्षायामाह यत इति यज्ञाद्यस्तद्धेतुः प्रसिद्धपरः । अनाचरणमिति नियमेनेत्यनुषज्य
ते । साधारण्यानुमाने इतरेषामनाचरणं न स्यात्तस्यालस्यादिनिमित्तकत्वे नियमेनानाचरणं न स्या
दालस्यादेरनियतत्वादित्यर्थः । अत इति । नियमेनानाचरणस्य साधारण्यस्मृत्यनुमानेऽनुपपत्तेरित्यर्थः
न तदिति । तस्यालस्यादिनिमित्तत्वेनाप्युपपत्तेः साधारण्यानुमानेऽगतत्वाभावादित्यर्थः । विशेषेति । व्यवस्थित
विषयत्वे प्रमाणाभावमात्रेणेत्यर्थः । सर्वेति । अग्निहोत्रादिवदिति भावः । विशेषणादिति । अनुमि

गा॰ प्र॰ ५३ 53

नश्रुतेर्यत्किंचिद्विशेषणविशिष्टपुरुषविषयत्वे व्यवस्थास्यात्तच्चनोपपद्यत इत्यर्थः। पूर्वपक्षोक्तमनू
द्यनिराकरोति नस्तवाद्वैव्याचष्टे यदित्यादिना।। विधिनैवेति। होत्राकादयः कर्त्तव्या इत्येवंरूपेणैवेत्यर्थः। नस्व
स्मिन्होत्रादेः साधारण्यविधिव्यतिरिक्तं प्रमाणं मृग्यत इति भावः। व्यवस्थायामेव ब्राह्मणो बृहस्पति
सवेनेत्यादिवत्प्रमाणं वाच्यं। न चैतदस्तीत्युत्तरार्धं व्याचष्टे व्यवस्थेति। ननु लिंगव्यवस्थैव प्रमा
णमुक्तमित्याशंक्य प्रमाणाभावमुपपादयति। तथाहीति। तत्र स्मृतिलक्षणलिंगस्य कीदृशी व्यवस्थाभि
मता। किं व्यवस्थितविषयत्वरूपो न पाठव्यवस्थारूपो वा। आद्यमाह स्मृतयइति विरुध्यन्तीति। धर्मानिति शेषः।
साधारण्येन विधाने हेतुमाह। न चैते धिकि चरणः शारदी स्मृतीनामसौ साधारण्येपि श्रुतिकल्पने व्यवस्था
या किं न स्यात्तत्राह स्मृत्यनुसारीति। द्वितीयमाह पाठेति। तच्चरणत्वात् छंदोगशाखित्वात्तत्तच्छान्याया
सिद्धा पाठव्यवस्थेत्यर्थः। धर्मत्वं धर्मविधायित्वं न शाखामात्रिकमित्यर्थेन साधारण्येन विधानादिति भावः। श्री राम: ५३
न त्वेवं नान्यथासिद्ध्या आचारव्यवस्थया व्यवस्थितश्रुत्यनुमानं स्यादित्यत्राह। आचाराणामिति। होत्राका
दीनामित्यादिः। आकृतीति। ब्राह्मणो बृहस्पतिसवेन यजेतेव जातिः वैश्वामित्रो होता तत्र वैश्वामित्रवद्ध

क्तिः शुक्लो होतेत्यत्रैव गुणाः अन्यत्र नांगानि ऋत्विज इति वत्तं स्थानं वा नास्तीत्यर्थः। क्रिया यथा आहिश
त्रुः। यावतोऽश्वान्प्रतिगृह्णीयादित्यत्रैव क्रियापि नास्तीत्यर्थः। समाख्येव विशेषणमित्याशंक्याह अ
न्येति। केषांचिदिति। देशान्तरादागतानामित्यर्थः। उपसंहरति तस्मादिति नियमेनानाचरणात्तु केषांचि
त्सर्वेजेषु क्वचिदालस्यादिना अनाचरणेन स्मृत्यादेरकर्तव्यत्वभ्रमात्स्मृत्यादेरप्रतिष्ठैवेत्यर्थः। सिद्धमे
वेति भावः। मूत्रेऽनुमापकस्य व्यवस्थितत्वाद्व्यवस्थासंयुक्तमेव श्रुतिरूपं प्रमाणमनुमेयं स्यात्॥ ॥प्रयो
॥ ॥आगतार्थत्वमाह स्मृतीत्यादिना। स्थितमिति। स्मृत्याचारविरोधे वेति वर्णपीलादिविषय एव णीके के६
वेति शेषः। इदानीमिति। व्याकरणस्मृतेः प्रयोगमूलत्वात्प्रयोगरूपाचारान्तर्भावं ल्यामिति शंकानिरा
सान्तर्गतार्थनेति भावः। नेतीति पूर्वपक्षकोटिः व्याकरणानुगतानां गवादिशब्दानां हन्तनुगतानां गाव्यादिश
ब्दानां प्रयोक्तव्यत्वे हेतुः साधव इति। असाधव इत्यप्रयोक्तव्यत्वे। अशक्तिजत्वफलमपभ्रंशा इति। फ
लफलिभावं स्वयमेव दर्शयति। मूलसंभव इति। प्रयोज्यत्वाप्रयोज्यत्वचिंताफलचिंता अधिकरणेनु
प्रमाणाप्रामाण्यचिंतापरमेव अतो नाध्यायपादेवासंगतिरित्याशयेनाह तेनेति। श्लोकोक्ता

हेतवः स्वयमेव व्याख्यास्यंते। अर्थेति। अर्थप्रत्ययाविशेषादित्यर्थः। नेति। गवादय एव साधवः प्रयोज्यास्त्र
न तु गाव्यादय इति व्यवस्था नास्तीत्यर्थः। तत्र व्याकरणसाध्यनियमद्वयोक्तिपूर्वकं तन्निर्मूलत्वमुपपा
दयति। नियमेत्यादिना। एतद्द्वयं प्रयोगः साधुत्वं चेति द्वयमित्यर्थः। यद्वा नियतं कर्तुमित्यर्थः। तत्राद्यनि
यमाद्याक्षिप्तमुपपादयति तत्राहीत्यादिना। स हि किमुच्चारणकार्यार्थमुतोच्चारणाश्रितादृष्टार्थं का
र्यमप्यर्थधीहेतोरदृष्टस्याद्यनियमानर्थक्यं वक्ष्यन्नंगीकरोति अर्थेति। द्वितीयं निरस्यति नेति। दृष्टसं
भवे ऽदृष्टाकल्पनादिति भावः। तर्ह्यर्थधीरूपकार्यायैव नियमोऽस्त्वित्याशंक्याऽसाधुभ्योऽप्यर्थधीरुदेतीत्युत्त
नेति। विकल्प्याद्यमाह अर्थश्चेति। अनर्थक इति असाधुभ्योऽर्थप्रतीतेरनिवार्यत्वादिति भावः। द्वितीयमाद
यद्दूषयत्यथेति। अर्थवशादिति। गाव्यादिभ्योऽर्थप्रतीत्या◻याभावेन तत्प्रयोगाप्रसक्त्या गवादिसाधुत्वप्रयो
गनियमद्वयफलगाव्यादिव्यावृत्तेः स्वतःसिद्धत्वादित्यर्थः। उच्चारणाश्रितादृष्टार्थमित्याद्यद्वितीय
मादत्ते अथेति। अदृष्टार्थमपीति। दृष्टार्थभोजनाश्रितप्राङ्मुखत्वादिनियमवदिति भावः। दूषयति तत्रे
ति मूलेति। अदृष्टार्थत्वं ज्ञातत्वाहि तन्नियमशास्त्रं प्रयोगेणवान्तरेण ज्ञानं न संभवतीति मूलाभावादित्यर्थः

तर्हि श्रुतयएवमूलं तत्राह नचेति अप्रतिष्ठितानामिति। नित्यानुमेयवेदमूलत्वनिराकरणादिति भावः। ननु गो
शब्दमेवप्रयुंजीत न गाव्यादिकं अश्वशब्दमेव नाश्वशब्दमित्येवं प्रतिपदं वेदस्याम्नानि न कल्प्यंते किं त्वेकेन धर्मेण
सर्वान्क्रोडीकृत्यैकमेवाम्नानं कल्प्यत इत्याशंक्य निषेधति नचेति। यद्यपि शब्दः शब्दः सुशब्दः परो नापशब्द इति स्मा
रस्मात्तथापि यया स्मृत्या दूषयति शब्दत्वादिति वर्णितादितरस्यांतरसामान्यमपि नासाधारणमित्याह नचेति।
अनेन शब्दाच्चत्वाद्यनुगमाभावेन होलाकाद्यव्यवस्थावत्वयोग्यव्यवस्थेति संगतिः सूचिता। इदानीं शब्दश
ब्दः सुशब्दपर इति ग्राकते साधुत्वमिति। किमिदं जातिरूपमुपाधिरूपं वेति विकल्पयति किमिति। नाद्य इत्याह न
हीति। अतो न जातिविशेषः। जातित्वे योग्यवृत्तिजातित्वात्सत्त्वक्षत्वापत्तिः। अतएव नानुमानादिगम्यजा
तिनापीति भावः। द्वितीये किं तद्वाचकत्वं वाच्यनादित्वं वाच्यदृष्टजनकत्वं वेति विकल्प्याद्यं दूषयति वाचकत्वमि
त्यादिना। ननु शक्तिभ्रमात्प्रयोगाद्युपपत्तिस्तत्राह नहीति। अन्यथापि निगमकाभावेनैव परीत्यस्यापि संभ
वादिति भावः॥ ननु गवादेर्गाव्यादिशब्दो गोणो लाक्षणिको वास्यादिति तत्राह नचेति। यद्यप्येवमपि साधुत्वाप
त्तिस्तथापि न स्ववाचकानामित्युक्तिखंडनमात्रमिदं। यद्वराहाधिकरणेनागतायत्त्वस्फोरणायोपन्या

स्यानिरस्तं। एतेन मुख्यार्थाभावेन लक्षणाया अपि मुख्यपूर्वकत्वादिति भावः। अनन्यथासिद्धप्रयोगाद्विशो
नगाव्यादीनां वाचकत्वं सिद्धमित्याह तेनेति। तत्फलमाह इतिहेनेति। नियन्तुमिति गवादय एव साधव इति न
एव प्रयोज्या इति च नियन्तुमित्यर्थः। द्वितीयमाशंकां दूषयति अनादित्वमिति। संबन्धः अर्थेन सङ्केतयितुः। तृतीय
माशंकां दूषयति। अदृष्टेति। न संप्रदायाभावे योग्यतया दुर्ज्ञानत्वात्कृतेन रूपेण नियमः शास्त्र इत्यर्थः। न च वे
दान्तज्ञानमित्याह वेदेति। असंभवादिति। अनन्तवेदवाक्यकल्पनानुपपत्तेरित्यर्थः। नन्वदेवाः केचिदनु
गतमुपलक्षणमस्त्वित्याह उपलक्षणेति। एवं चागत्या ऽदृष्टसाधनत्वरूपसाधुत्वमेवोपलक्षणं वाच्य
तथाचादृष्टसाधनमदृष्टार्थं प्रयुंजीतेत्युपलक्षणस्य प्रमेयस्यैक्यादानन्त्याप्रयापत्तिरित्याह तत्रेति। श्लो
कोक्तनिर्मूलत्वहेतुसमर्थनफलमाह तस्मादिति। श्लोकोक्तद्वितीयहेतुमाशयोपपादयति परस्परेत्या
दिना। विगानात्तद्विरोधात्। मन्यत इति। अन्यथा सति प्रयोजने तदभिधानापत्तेरिति भावः। ननु न भिहितमपि
प्रयोजनं पाणिनेरभिमतमन्यथा तस्याविचार्यकारित्वापत्तेस्तच्च प्रयोजनं वार्त्तिकभाष्यकारोक्तमेवेत्याशं
क्य तयोरपि विरोधमाह तयोरपीति। अथवा पुनरस्तु ज्ञाने धर्म इति साधुशब्दज्ञाने धर्म इति भाष्यकारवचना

च्छस्य पूर्वके प्रयोगेऽभ्युदयस्तत्तुल्यं वेदशब्देनेति ज्ञानपूर्वकप्रयोगो धर्म इति वार्त्तिककारवचनाच्चनयोरपि
मिथो विगीतत्वमित्यर्थः। द्वितीयं हेतुमादायोपपादयति निष्फलत्वमिति। अवाप्यते इति। अध्येतृभिरिति शेषः।
शंकते धर्म इति। अवाप्यत इत्यनुषंगः। एतच्छास्त्रनियमितो दृष्टसाधनशब्दप्रयोगद्वारेति भावः। दृष्टमपि त
त्रापीति। धर्मेपि प्रमाणत्वाभावादव्यहेतुः। पूर्वेति। साधुस्वरूपप्रयोगनियमयोर्मूलाभावेनेत्यर्थः। एत
दूषणमाद्यहेतुनैव गतार्थमित्यरुच्या फलान्तरमाशंक्यापरिहरति। नचेति। देवा अइउड्डउ इत्याभानत्याभवे
त्यादौ लोपागमविकारादिज्ञानेन वेदस्य रक्षा न व्याकरणस्य प्रयोजनं वेदतदर्थाभिज्ञगुरुशिष्यपरंपर
यैव तत्सिद्धेः। एवं सौर्यं चरुं निर्वपेत् सूर्याय जुष्टं निर्वपामीत्यादौ होनत्वप्रयोजनं मीमांसायाः ऽग्नय इत्यस्य
स्थाने सूर्यवाचकचतुर्थ्यंतशब्द ऊहितव्य इति सिद्धेर्नादृष्टाशीहस्यमत्यपित्यस्य लोकत एव सिद्धेः एवं
ब्राह्मणेन षडंगो वेदोऽध्येय इत्यागमोपि न तत्प्रयोजनं उक्तस्मृतिरूपागमे षडंगग्राह्यस्य श्रुतिलिंगादिष
ट्प्रमाणरूपवेदावयवपरत्वोपपत्तेः। अत्र प्रयोजनशब्दः प्रयोजकपरः। न तथा च व्याकरणाध्ययन
प्रयोजक इत्यर्थः। एवमनेकोत्सर्गापवादजटिलस्य व्याकरणस्यातिगुरुत्वेनैकेन लक्षणेनानेकशब्दज्ञा

नात्मकं लाघवमपि प्रयोजनं न सिध्यतीति। एवं स्थूलपृषतीमनड्वाहीमालभेतेत्यादौ स्थूलपृषच्छब्दे पूर्व
पदप्रकृतिस्वरेण बहुव्रीहिरेव न तु कर्मधारय इति ज्ञानमपि न तत्प्रयोजनं स्वरज्ञानायात्तु सरणीयात्स
म्प्रदायादेव तन्निश्चेरित्यर्थः। वस्तुर्थहेतुं विवृणोति वेदेति। उक्तमिति। कलिना दृष्टमित्यर्थे ढक्प्रत्ययेन का
लेयशब्दः। वामदेवेन दृष्टमित्यर्थेऽप्यनेनैव प्रत्ययेन वा वामदेव्यशब्दो व्युत्पादित इत्यर्थः। तेनेति।
रजोधर्मेणाभिर्द्विवर्णयोः संगमे सति वामे उत्तमं वसुधनं जातं तच्च देवतासंबन्धि जातं तेन देवा
मदेव्यं सामेत्यर्थः। पंचमं हेतुं व्याचष्टे पदेति। अर्थेति। अर्थबोधाय प्रयुक्तानामित्यर्थः। शक्तिज्ञा
नसिद्धेः शब्दार्थसंबन्ध इति वार्तिक इति शेषः। तथेति। अर्थवत्त्वेनेत्यर्थः। प्रदेनेरर्थमसहायं समाप्ति माहेय
थोक्तमिति। ब्राह्मणकं बलशब्दे ब्राह्मणोऽधात्वस्य कस्मिन्नर्थेऽन्नास्मिन् मम र्थस्तत्र भाष्यादौ समासप्रदाना
मानर्थकोक्तेः तथा देवदत्तगामभ्याज शुक्लां दण्डेनेत्यादौ देवदत्तादिशब्दानामप्यनर्थका इत्यर्थः। शक्तेति प
स्पष्टारणेति। पदरूपाभ्यवहारेणेत्यर्थः। अतेनेति। वाक्यमर्थं न उ मन्यदेवेति म्लेच्छा मा भूदिति भावः। पूर्वपक्ष
मुपसंहरति तत इति। गाव्यादिशब्दानां वाचकत्वाभावेऽपि प्रयोगस्य वक्तुरशक्तिजत्वेनार्थप्रत्ययस्य।

च शक्तिमत्त्वेऽरोपपन्ने स्तेषां साधुत्वाभावान्न प्रयोज्यत्वमिति सिद्धान्तयति प्रयोगेति। गवादिष्वज्ञा
व्यादीनामपि वाचकत्वस्वीकारे बाधकमाह एकस्येति। न चाविनिगमनमित्याह। अभियुक्तेति। न
त्वस्मृतेर्निर्मूलत्वमित्याह स्मृतेरिति। न चैवमंधपरंपरान्याय इत्याह प्रत्यक्षेति। गवादीन्येव साधू
नीति नियमे कर्तव्ये गवादिशब्दस्वरूपांशे प्रत्यक्षनिवेशादेतादिवाचकत्वरूपसाधुत्वांशे च सर्वका
लवृत्तित्वरूपस्यानादित्वस्य तत्तत्कालीनपुरुषप्रत्यक्षत्वाद्बोधकत्वरूपवाचकत्वस्य च सर्वप्रत्यक्षत्वा
दुक्तं प्रत्यक्षमहत्वतस्मरणेति परंपरया साधुस्वरूपनियमः सुकर इति भावः। नन्वेवं स्वरूपनियमस्य व्याकर
णसाध्यत्वेऽप्यदृष्टार्थप्रयोगनियमस्य न तत्साध्यता मूलाभावादित्यत्राह प्रयोगेति। उपसंहरति
तस्मादिति। नियमद्वयस्य व्याकरणसाध्यत्वादित्यर्थः प्रमाणेति। व्याकरणस्येति शेषः। अनेन नि ते४
र्मूलत्वहेतुर्निरस्तः। एतदेव प्रपंचयिष्यन्नियमद्वयमनुवदति गवादय एवेति। धर्मोपेत्यनेनार्थप्रतीते
रसाधुभ्योऽपि सत्त्वान्नियमानर्थक्यमिति निरस्तं प्रतिपाद्यते इति। तत्र स्वरूपनियमः साक्षात्प्रयोग
नियमस्तत्कृतान्यथा गतेति भावः। न चानयोर्मूलाभाव इत्याह द्वयोरिति। संभवान्तं वक्ष्यमाणरीत्ये

प्रा॰ दी॰ प्र॰ तिभावः । आमाएवमिति व्याकरणस्येति शेषः । तेनाव्यवहितानंतरं निर्दिष्टप्रयोगनियमेन मूलमुपप
५८ द्यते तथा हीति प्रत्यायितेति । विश्वसितेत्यर्थः । तथा च व्याकरणं प्रमाणमभियुक्तप्रणीतत्वात्तत्त्वान्वादि
57 स्मृतिवदिति प्रयोज्यमिति भावः । न च हेत्वसिद्धिरित्याह ऋषीति । अविस्पष्टासहेतुदोषानुपलंभादिति भा
वः । स केवलं प्रयोगनियममूलवेदेन मानं प्रत्यक्षमप्यस्तीत्याह प्रत्यक्षमिति । किं चेति चकारार्थः । अ
नुमानेनैरपेक्ष्यार्थ एवकारः । वचनमिति । प्रयोगनियममूलमिति शेषः । तदेव वचनमाह तस्मादि
ति । न म्लेच्छितवै नम्लेच्छितव्यं । अपशब्दनिषेधं च साधुशब्दनियमोऽर्थात्सिध्यति । अयं च निषेधः प्र
करणाज्ज्योतिष्टोमांगमतो व्यवहारे भाषाप्रयोगेऽपि न दोषः । महाभाष्ये सर्वस्यापशब्दनिषेधस्य क्र
त्वर्थत्वोक्तेः । गाव्यादीनामपशब्दत्वं च वक्ष्यत इति भावः । आहिताग्निरिति । अन्वाहिताग्निरित्यर्थः ।
ततश्चाग्न्यन्वाधानानंतरं कर्ममध्ये यश्शब्दप्रयोगे इदं प्रायश्चित्तं विधानं चेति । मूलमिति शेषः । मूलां श्री प्र॰
तरमाह उतेति । उतत्वः पश्यन्नददर्श वाचमुतत्वः शृण्वन्नशृणोत्येनां । उतो त्वस्मै तन्वं विसस्रे जायेव ५८
पत्य उशती सुवासा इत्यस्मिन्मंत्रे । त्वः कश्चित्पश्यन्नपि अशृण्वन्नपि । उशती कामयमाना ।

हर

ज्ञायापत्यइवतस्मैकस्मैचित्तन्वांतनुंविसस्रेउतोविवृणोत्येवनिंदापरेतिमूलमितिशेषः । तथाच
नानामूलश्रुतिबलात्प्रयोगनियमविधिः कल्प्यतइतिभावः । यदभिप्रायेणधर्मापेक्षयुक्तंतत्सदृष्टां
तंविवृणोति । दृष्टेति । भोजनेति । आयुरादिफलायेत्यादिः विधीयतइति । व्याकरणानुमितेपतत्प्रा
गुक्तंप्रशंसानुमितेनवा । एकशब्दः सम्यक्ज्ञातः सुष्ठुप्रयुक्तः । स्वर्गेलोकेकामधुग्भवतीतिश्रुत्यक्षे
णवाशास्त्रेणाभ्युदयायविधीयतइत्यर्थः । तस्मात्स्वर्गप्रशस्तत्वोक्तमयुक्तमित्याह नप्रयोगेति । प्र
योगोत्पत्तेः प्रयोगनियमस्यतन्नियामकव्याकरणस्यवाऽशास्त्रत्वान्मूलश्रुतिराहित्यादव्यव
स्थितियजनेत्यर्थः प्रकारांतरेणप्रयोगोत्पत्तेः शास्त्रीयत्वमाह सत्येत्यादिना । किंचेतिचार्थः । अवि
गीतमविप्रतिपन्नं । ननुसत्यंवदेन्नानृतंवदेदितिशास्त्रसत्यानृतशब्दयोरर्थविषयत्वान्नगोगाव्या
दिशब्दवदनवर्जनयोरुपलम्भः । अन्यथैकशब्दस्यद्व्यर्थतापत्तिरित्याशंक्यसत्यत्वंनामदृत्याप्रबा
धितार्थबोधकत्वंतच्चगोरित्यमितिशब्देऽर्थस्यगोरबाधितत्वादर्थविषयसत्यत्वंगोशब्दस्यशक्त्या
प्रतिपादकत्वाच्छब्दविषयसत्यत्वमित्युभयमपिनिरुक्तरूपेणैकस्यैवसत्यशब्दस्यार्थः । गाव्यादी

र्थाभावाद् ३

अत्र त्वर्थबाधेः बाधितार्थान्तरत्वं गावीशब्दस्य हत्यभावाच्छब्दान्तरत्वमुभयोर्निरूढबोधकत्वा
भावश्चत्वेन एकस्यैवान्तरशब्दस्यार्थोक्तेः सत्यं वदेत्यत्रान्तं वदेदित्यत्र सत्यानृतशब्दयोर्नानेकार्थ
ताप्रतिशेत्यभिप्रेत्य सत्यशब्देन विधीयमानं सत्यशब्दसमत्यर्थम संघचेति द्वेधा विभजते न चेति ततः
किं तत्राह तत्र यथेति। यथावस्थितेति। अबाधितेत्यर्थः। अर्थसत्यता या धर्मोर्थत्वसा सर्वसंप्र
तिपत्तेरदृष्टांतादृष्टांतिकमाह नथेति। यथावस्थितेत्यस्यैव व्याख्या अविलुप्तेति। कृत्रिमादित्यर्थः।
शब्दान्तरस्या धर्मार्थत्वमपि संभवति प्रत्यार्थान्तरदृष्टांतेनाह यथा चेति। शब्दान्तरस्वरूपं दर्शयति
अन्यरूप इति। गोरूपे वाचके स्थिते गावीरूपप्रयोग इत्यर्थः। उपसंहरति हेतेति। अत्रानेन शब्दक
ल्पना मायादिनां वारयति। द्वाभ्यामिति। न चैकेनेतरस्मिन्दुरूभयोरेवार्थेश्वंसं साधुप्रयोगनियमफल
स्याभ्युदयस्यानिष्टाद्दशायामसाधुप्रयोगवारणाय तन्निषेधस्याभ्युदयफलार्थत्वबोधनाय साधु
नियमविधानस्य चावश्यकत्वादिति भावः। न नु सत्यं वदेदित्यादिशास्त्रे सत्यानृतवदनविधिनिषेध
प्रतीतेः कुतः साध्वसाधुत्वोपलक्षितविधिनिषेधसिद्धिस्तत्राह साधुत्वेति। उपलक्षण इति। विधे

यन्निषेधसंग्राहकेऽत्यर्थः। न च साधुत्वासाधुत्वे दुर्वचे इत्याह अनादीति। अत्र वाचकत्वं ज्ञापक
त्वं विवक्षितं। न च गाव्यादौ गतमतो नादीति। अनादित्वमात्रं डुमादिस्तोमे गतमतो वाचकत्वमि
ति। यदि तु वाचकत्वं शक्तिजत्वं तदानादित्वं न देयं शक्त्यभावादेव गाव्यादिवारणात्। न च देवद
त्तादिपदे षष्ठीत्यव्याप्तिः। नामकरणगतस्वजनेषां शक्तिस्वीकारेणालक्ष्यत्वात्। पूर्वपक्ष्युक्तमनूद्य दूष
यति यत्त्वित्यादिना। वाचकत्वं शक्तत्वं ज्ञापकत्वं वा नाद्यः। अवाचकत्वे पतत एव गोण्यादिलक्षणयोरसंभवे
ति गोशब्दे प्रयोक्तव्ये शक्तावगावीप्रयोगस्य गोशब्दशक्तिजोपमितिज्ञानतस्मात्तोऽर्थप्रत्ययस्य च सं
भवादित्याह यद्यपीति। अमीषां गाव्यादीनां। वाचकेति। वक्तृकरणपाटववज्जन्यतयेत्यर्थः। मूलेति। ग
वादीत्यर्थः। नहि किंचिद्बालानां तेषु वाचकत्वव्यवहारस्तत्राह अशक्तिजत्वेति। बालाव्युत्पित्सवः। त
त्रैवेति। गावीमानयेति श्रुत्वा आनीतेन गावि गावी शब्दे चेत्यर्थः। द्वितीये ज्ञापकत्वमात्रेण साधुत्वकथित
नादित्वविशेषितं तच्च न गाव्यादौ सिद्धमत्य शक्तिजत्वेनाप्युपपत्तेरित्याह इत्येवमपीति। इति हेतोः। स
र्वेषां गोगाव्यादीनां। अविच्छिन्नेति। अनादिबोधकत्वमित्यर्थः। ननु शक्तिजत्वकल्पनेऽलघी

क्तिजत्वं वाकल्प्यं शक्तत्वरूपवाचकत्वं वाकल्प्यं कोऽत्र विशेषः स्यादत्राह संभवतीति। सतिसप्तमीयं दृष्टत्वादृश 

भा॰प्र॰ ५२ 59 यत्सीश्चान्यथा शब्दद्वयस्यापि शक्तिकल्पना गौरवादिति भावः। दोषान्तरमाह प्रयोगेति विकल्पापत्तौ हे
तुमाह वाच्येति। तमेवोपपादयति सास्नेति कर्म कर्मेकारकं अयं कर्मकरणभावः। वाच्यवाचकभाव इति
यावत्। तथा च गावीशब्दप्रयोगे गोशब्दस्य स्वीकृतवाचकत्वत्यागः अस्वीकृतवाचकत्वस्वीकारश्च इति गो
शब्दे द्वौ दोषौ। पुनर्गोशब्दप्रयोगे त्यक्तवाचकत्वस्वीकारः स्वीकृतवाचकत्वत्यागश्च इति तत्रैव द्वौ दोषाविति
गोशब्दे दोषचतुष्टयं। एवं गावीशब्देपीत्यष्टदोषापत्तिरिति भावः। प्रयोगनियमे मूलमुपपाद्य साधुस्वरूप
नियमेप्युपपादयति। वाचकरूपेति। श्लोकव्याख्याने नैव व्याख्यातप्रायं। इदानीं द्वितीयं सर्वोपक्षहेतुं नि
रस्यति। न च विगानादिति। स्मृत्योर्मिथो विरोधेपि विरुद्धश्रुतिद्वयानुमानं संभवात् उभयप्रामाण्योपपत्तेरि
ति भावः। तृतीयहेतुं निरस्यति फलमिति। धर्माधर्मप्राप्तिपरिहारार्थं यावुपादानपरित्यागौ तद्रूपयोगिशब्दा
पशब्दज्ञानं फलमित्यर्थः। अन्वाचयफलमाह रक्षेति। व्याकरणादपि रक्षादेः संभवात् षडंगशब्दस्य प्र
सिद्धेर्वेदशब्दसमभिव्याहाराच्च शिक्षाद्यंगपरत्वमेवेति भावः। चतुर्थहेतुमशक्तो दूषयति वेदेति पंचममपि तथै
व दूषयति एवमिति प्रयो लोकवेदाधिकरणस्याकृत्यधिकरणोपोद्धातत्वेन व्याकरणाधिकरणेनासंग

श्रीराम: ५९

तत्वादाकृत्यधिकरणस्यैव तत्संगतिमाह व्याकरणमिति। आकृतिर्जातिः लोकवेदाधिकरणस्याकृत्यधि
करणोपोद्घातत्वं दर्शयति तत्रयदीति। अन्यत्वे लौकिकविषयमिदमधिकरणमुत वैदिकविषयमिति विकल्पं
स्यापि घेनारंभमुपपादयति तथापीति अनर्थकं वेदार्थानुष्ठानानुपयोगादिति भावः। द्वितीयेऽर्थवत्वेप्यनारंभ
मुपपादयति। वैदिकेति। पदपदार्थसंबंधग्रहस्योत्तमवृद्धादिव्यवहाराधीनत्वात्तदभावेऽनुपपत्तेरिति भावः।
अनन्यत्वे आरंभसाफल्यमाह अनन्यत्व इति। तत्र लोके पदार्थानामिति। पदानामर्थानां चेत्यर्थः। अन्या
नन्यत्वे अन्यत्वानन्यत्वे। अस्मिन्विचारे पूर्वपक्षमाह तत्र सत्यपीति स्वरेति वैदिकेषु नियतस्वरः देवा
स इत्यादौ वर्णागमश्छांदसः। त्मनेत्यादौ आत्मनेत्यस्याकारलोपः उद्ग्राभं च निग्राभं चेत्यादौ हकारस्य भका
रो विकारः लोके तत्कृतनियतस्वरादीनां विपर्ययः। अध्यायो वेदेऽध्ययनतिथिनियमः। लोके ऽनध्याय
स्तदनियमः। आदिशब्देनोपनीतत्रयोज्यत्वतदभावादिः। यद्यपि पाणिनिना भाषायामपि स्वरोऽनुशिष्टस्तथा
पि शिष्टैस्तदनादरात्तदनाश्रयणकृत इति भावः। व्यपदेशेति। वैदिकत्वलौकिकत्वव्यपदेशोऽत्यर्थः। स्वविति। अलौ
किकेत्यादिः। नन्वेवं पदभेदेऽप्यर्थभेदः कुतस्तत्राहार्थेति। यद्यपि पदभेदमात्रेणानारंभसिद्धिस्तथापि तद

शा॰ स्त्र॰ ६०

60

दर्थभेदोपि तत्साधक इति सोप्युक्तः। पदान्यत्वादिति। संज्ञाधिकरणन्यायेन शब्दभेदेऽर्थभेद औत्सर्गिक
इति भावः। श्रुत्याद्यर्थभेदोवगम्यत इत्याह। उक्तानाइति। ये उक्ता नावहन्निति ते देवानां गोशब्दवाच्या इत्यर्थः। तत्र
च लौकिकवैदिकगोशब्दयोर्वाच्यभेदो देवानामाज्ञानमिदं वैदिकशब्दैरेव व्यवहारोपपत्तेरिति भावः। सिद्धा
न्तिनोप्यत्र संप्रतिपत्तिरस्तीत्याह आख्यातेति अन्य इति वेदेऽर्थ इति शेषः। ननु वर्णौ कोपि स्वरादिभेदाय
दभेदः। सिद्धान्तिसंमत इति शंकते ननु चेति तत्रत्यकारिकां पठति पदेति पदभेदेत्यर्थः। क्रमादि त्रयभेदकृत
पदभेदः परिहारयोग्ये स्फुटः। वाक्यं पदान्तरसमभिव्याहारः यथा बुभुक्षुः पचते इत्यत्र पचत इत्याख्यातेपि ष
ते दाक्षिणां देही त्यत्र शत्रन्तं नाम पदं प्रहातत रोपादानात्। श्रुतिरत्र सामानाधिकरण्यं यथा उद्भिदा यजेतेत्यत्रो
द्भित्पदं कर्मनामधेयं जेस्त्वतो यासामानाधिकरण्यात्तन्नखनित्रं। यद्वा श्रुतिस्त्वतो यादिश्रुतिः उद्भिदेति त्वतीया
श्रुतिबलात्करणभूतकर्मपरमुद्भित्पदं न खनित्रादिपरमित्यर्थविशेषावच्छिन्नपदे भेदस्त्वतो यास्तु
त्यवमेयः। स्मरतिर्व्याकरणं त्वमग्रेस्त्वमित्यत्र इङ् अग्नि गति वृध्योरित्यस्य मध्यमपुरुषैकवचनं न तु ना
म। अर्धाङ्गीकारेण परिहरति सत्यमिति। अंगीकृतमंशमाह योर्थेति ताद्दशाधर्मेनेवाह यथेत्यादिना॥

श्रीराम:
६०

किं इयं रथपर्यायः । प्रातिपदिकांतोदात्तस्वरः प्रकृतिस्वरः पूर्वपदस्य प्रकृतिस्वरत्वे स्थूलपृषतीमित्यादौ बहु
व्रीहौ स्वर्थो वगम्यते वहुव्रीहौ प्रकृत्या पूर्वपदमिति लस्वरस्यं ग्णात् । समासस्येति सूत्रेण समासांतोदात्तत्वे
विहिते तत्रैव स्वार्थहानित्वमवगम्यत इत्यर्थः । अवसाय इति । लोकत इत्यनुषंगः । अनंगीकृतमंशमाह । नैव
मिति । अर्थ उपाधिः प्रयोजकोयस्य सः अर्थविशेषव्याप्य इति यावत् । तथाविधस्य धर्मस्य भेद इत्यर्थः । ननु निय
तस्वरादिरेवताहृशोधर्मस्तत्राह यदिहीति तस्य तथात्वे प्रमाणाभावान्नेहैनार्थोपाधिकभेद इत्यर्थः । नन्व
र्थश्रामित्योपाधिकधर्मभेदाभावे विषमें मात्रभेदात्पदभेदः किं न स्यात्तत्राह यद्यत्र इति । एवं च सतिदेवास इत्या
दौ न पदभेद इत्याह एवमिति । नन्वर्थभेदाभावात्पदभेदाभावेवहृथैका नवगमाजहभेदोपिन स्यादित्यतआ
ह किंचिदिति । स्वरूपसू याद्विशहसाहित्याद्युक्तं भेदं निरस्यति मत्ययीति नास्माभिरपिसर्वेषामभेदः साध्यत
इत्यर्थः । अभेदे पदस्य भिन्नावन्मानां तरमाह पदैक इति पदैकत्वे सत्येव तदर्थावगमः संभवत्यन्यथाव्यव
हारानुपातित्वाभावेनन संभवेदित्यर्थः । यद्वा पदैकत्वसिद्धावर्थैकमपि सिद्धमित्याह पदैक्य इति । तस्य लौकि
कपदवाच्यस्येत्यर्थस्य वैदिकपदादवगमादित्यर्थः । अन्येति यउक्तानैवहतीत्युद्दिश्य गोशब्दवाच्यत्व

शा॰ प्र॰ ६९ विधानमप्रशक्यमुक्तानवूहनस्याप्रसिद्धत्वात् किंतु ईर्षटक्रियाकारि देवगवज्जानीयत्ते नप्रशस्ताइति स्तू
यंते गावो दक्षिणादानापेत्यर्थः। नन्वश्ववालादिपदानामर्थभेदो दृष्टस्तत्राहाश्ववालेति। यत्रार्थवाहादि
गमकमस्ति तत्रैवार्थभेदो नान्यत्रेत्यर्थः। अपोद्धृतोपदर्शः कृतस्तदिदानीमारभत एवं सिद्ध इति। अन्ये
त्विति। नियोगे न विकल्पो न देवगासहसमुच्चितो। संबंधः समुदायो वा विशिष्टो वैकरूपेतरेत्यच्छ्य क्षीमुपक्षि
प्य। गोरित्युच्चारिते सप्रवस्तु निवर्तिभोति नः। जातिर्व्यक्तिश्च संबंधः समूहो लिंगकारके। संख्या च सप्त
मी तेषामष्टोपक्षाद्ययोर्द्वयोरित्यादिना ये बहवः पक्षा वार्त्तिके उपन्यस्ता इत्यर्थः। प्रयोगे [illegible] ति।
प्रयोगात्मवघातानामनुष्ठानानि तेषां चोदनाविधयः तेषां भावात्सत्ताद्यक्तिपेव तत्संभवादित्यर्थः। जा
तौ तदसंभवमाह नहीति। व्यवहारो वहनं नादि। दोषांतरमाह लिंगेति। प्रयोगचोदनाग्रहणं छ्यतिषेध
स्याप्युपलक्षणमित्याशयेन व्याचष्टे व्रीहीनिति। जातावुक्तदोषो नात्रेति विवदन् हितीये श्लोकं व्याच
ष्टे एवं वेत्यादिना। अलिंगत्वादिति। इहमापातनत्तः स्तनकेशवती स्त्री स्यात् लोमशः पुरुषः स्मृत इत्यु श्रीराम ६९
क्तलक्षणस्य स्त्रीत्वादेर्वृक्षादिव्यक्तावपि संभवात्सत्त्वरजस्तमोगुणानामाविर्भावलक्षणालिंग

स्यजात्यवृत्तिसंभवात्। असंख्यत्वादिति।। द्वित्वादिसंख्यायाद्व्यक्षत्वेस्वतोऽसंभवादित्यर्थः ननु
गोपदस्यगोत्वजातिविशिष्टवाचित्वंशुक्लपदस्यशौक्ल्यगुणविशिष्टवाचित्वंहि शेषणभेदेचवि
शिष्टभेदात्नानयोरेकार्थत्वमित्याशंक्याह जातिगुणेतिनविशेषणभेदेपिविशिष्टभेदः गोर्शु
क्लेतिभेदाप्रतीतेरितिभावः एवमिति। देवदत्तपदंसंज्ञात्वाद्द्रव्यवाचीतिभावः। ननुकेवलव्यक्तिश
क्तिपक्षेव्यक्तीनामानंत्याद्यस्यांव्यक्तौशक्तिग्रहस्तस्यामेवप्रयोगः स्यान्नान्यत्रेतिशंकतेकथमि
तिगोशब्दोगोत्वोपलक्षितव्यक्तिशक्तइत्येवंशक्तिग्रहात्तदुपलक्षितव्यक्त्यंतरेपिप्रयोगः संभवती
तिपरिहरतिसामान्यस्येति। पा एवमाकृतिकागोत्वजातिविशिष्टासागोः गोशब्दवाच्या एवमन्यत्रा
पीत्यर्थः। नचोपलक्षणत्वमात्रेणजातेरभिधेयत्वप्रसंगइत्याह यथाचेति। व्यक्त्यानंत्यकृतशक्ति
नानात्वस्यापिनप्रसक्तिरुपलक्षणैकेनशक्तेः क्यादित्याह एकेति। आकृतिविशिष्टेत्युपलक्षितस्या
पिग्रहणमन्यथाशुद्धाविशिष्टावेत्युपसंहारासंगतेः। शुद्धाउपलक्षितेत्यर्थः।। विशिष्टावेतिप्राची
नतार्किकमतेनानास्थयोक्तंसिद्धांतमाहनेत्यादि। व्यक्त्यभिधानेवाधकान्याह आनंत्येति अभा

शा·प्र· वत इति। न व्यक्तिः शब्दार्थ इति शेषः। जात्यभिधाने साधकमाह अनन्वयेति। जातिपक्षोक्तदोषानुद्धर
६२ ति व्यक्त्याकृत्योरिति। वस्त्वेकांत्याभ्युपगमेऽपि नानुपपत्तिरित्याह लक्षणेति। स्वयमेव श्लोकान्व्याचक्षाण
62 स्तत्राद्यं हेतुं विवृणोति नहीति। अनंतव्यक्त्युपस्थित्यसंभवादिति भावः। द्वितीयं व्याचष्टे व्यभिचारादिति। व्य
भिचारमेवाह नियमेति संबंधस्याभिधायकाभिधेयभावरूपस्य गोशब्देन सास्नादिमती सर्वा व्यक्तिरभिधे
यत्यभिधानक्रियाहारकनियमरूपत्वाद्व्यवहारदशायां च सर्वव्यक्त्यानभिधानेन नियमबाधे नोक्तसंबं
धासिद्धेरित्यर्थः। अथवा शब्दार्थसंबंधस्यायमेवास्य शब्दस्यार्थ इति नियतस्वरूपत्वात्तस्य चैकस्यामेव
व्यक्तेरसंभवाद्व्यक्त्यंतरसाधारण्येन नियतशब्दार्थसंबंधासंभवादित्यर्थः। महच्च गौरवमिति तृतीयहेतुं व्या
चष्टे अनंतास्वेति। ननूपलक्षणेऽस्मान्न शक्त्यानंत्यमित्युक्तं तत्राह जातीति। तदेवोपपादयति व्युत्पत्तीति
व्युत्पत्तिः शक्तिग्रहः अभिधानमुपस्थितिः। जातिस्विकेनेति। तद्व्यक्तिरूपेणेत्यर्थः। शक्तिग्रहोपाय श्रीरामः
मात्रमुपलक्षणं तेन त्वभिधेयभेदस्य युक्तं शक्तिभेदं निवारयतीति भावः। तदेव दृष्टांतेन साधयति यथे ६३
थेति। अक्षत्रयं देवदत्त विभीतकरथावयवरूपं। अपवरकं गर्भगृहं। शक्त्यानेकत्वेऽप्येतद्देवशक्तेरनेकश

त्तिविशिष्टविषयकत्वमर्थ पर्यवसायित्वेन व्याचष्टे अपि चेत्यादिना। अव्यपदेश्यं विशिष्यबोधानर्हं। अविशिष्टा निर्विकल्पकरूपा। ननु येन रूपेण शक्तिग्रहस्तेनैव रूपेणोपस्थितिरपीति नोक्तदोष इत्याश येन शंकते अथेति। अर्थेऽप्येवकारः। तर्हि विशिष्टशक्तिवादापत्तेरिति दूषयति नतदिति। अथमिति। नागृहीतविशेषणेति न्यायादिति भावः। विशिष्टाभिधानमेवेति मतमप्युक्तरीत्यैव विशिष्टशक्तिरपि स्यादिति भावः। अस्तु को दोषस्तत्राह विशिष्टाभिधाने चेति। पूर्वतरमिति। उक्तन्यायादेवेति भावः। ननु तत्रेति। अनन्यलभ्यस्यैव शब्दार्थत्वाद्युक्तेस्तल्लक्षणालभ्यत्वान्न तत्र शक्तिः कल्प्येत्यर्थः। ननु र्थं व्याचष्टे किं चेति। संशयेति। गामानयेत्युक्ते कां वा गामित्याकांक्षादर्शनादिति भावः। ननु शाब्दज न्यनिर्विकल्पकोपस्थितिरपि निश्चय एव संशयस्य विरुद्धकोटिकत्वादन्यथा गोत्वोपस्थितेर पि संशयः स्यादिति शंकते नन्विति। वस्तुतः सामान्यविशेषरूपेणाद्वैविध्ये सति तत्र विशेषपर्युदासे सा मान्यमेवापशिष्यत इति तदेव शाब्दार्थः पर्यवस्यति। तदुपस्थिते निर्विकल्पकत्वेऽपि व्यक्तिवि षं किं गोत्वमित्याकांक्षायाश्च दर्शनान्न संशयत्वमित्यभिप्रेत्य विकल्पयति किमिदमिति। ननु

शा॰ प्र॰ ६२ श्री 63

गामानयेत्युक्ते गोत्वोपस्थितावपि कां गामित्याकांक्षायामविशेषइत्याशंक्य गोशब्दार्थस्य गोत्व
स्यानिश्चयेपि तस्य व्यक्तिषु पर्यवसानाद्व्यक्तिसंशयप्रयुक्तेयमाकांक्षा न शाब्दज्ञानेत्यभिप्रेत्य पंचमं
व्याचष्टे। प्रथमं चेति। तथा च प्रथमप्रतीतादेव शाब्दस्यार्थकांक्षाशांतेर्न चरमेप्रतीतस्यार्थेन कल्प
नेत्यर्थः। षष्ठं व्याचष्टे। विचित्रा चेति। खंडः खंडितावयवः मुंडः शृंगरहितः। एवं प्रथमश्लोकं व्याख्याय
द्वितीयश्लोकगतं द्वितीयहेतुं चित्रबुद्धिवृत्तिहेतुत्वादिहेतुस्थत्वात्प्रथमे विवृणोति। एककारेति।
आद्यं विवृणोति अन्वयेति। सति गोत्वे गोशब्दप्रयोगादसत्यश्वादौ चाप्रयोगाच्चेत्यर्थः। जातिशा
कात्वुक्तदोषानुद्धरन्नवशिष्टौ श्लोकौ व्याचष्टे। व्यवहारस्याहिनानेहेति। अत्यंतभेदे अत्यंताभेदे
च खंडो गौर्मुंडो गौरित्यादिवदपर्यायशब्दद्वयसामानाधिकरण्यानुदर्शनाद्भेदाभेदरूपतादात्म्य
मेव जातिव्यक्त्योरिति भावः। ननु भेदे जातिरेव शाब्दार्थोनुव्यक्तिरिति विप्रतिषिद्धं तत्राह तत्र श्रीरामः ६२
सामान्यमिति। अभिन्नरूपेणाशब्दगम्यतानभिन्नरूपेणेत्यर्थः। एवं च सामान्यरूपेण शब्दा
र्थता। विशेषरूपेण व्यवहारांगता चोपपद्यत इत्याह यच्चेति साधयितुमिति विशेषरूपेणेति

शेषः। तादात्म्ये नैव हेत्वंतरमपि परिहृतमित्याह लिंगेति। भेदाभेदयोरेकत्र विरोध इत्याश
ङ्क्याह। यद्यपीति। लाक्षणिकीति। जातेः स्वतो विलक्षणत्वेन व्यक्तिमनपेक्ष्य प्रतीतौ पश्चात्तल्ल
क्षणया व्यक्तिप्रतीतिरिति भावः। लक्षणापि न सर्वत्रेत्याह यत्र त्विति अधिकरणत्वमुपश्लेषा
दिलक्षणं द्रव्यस्यैव न जातेः तथा द्रव्योद्देश्यत्वविशिष्टद्रव्यप्रतिग्रहीतृत्वलक्षणं संप्रदानत्वमपि ना
चेतन जातेरिति भावः। सूत्रे अवहननादिविधिसत्त्वाद्व्यक्तिरेवार्थः। गां पश्येदित्यादौ जातिरप्यर्थः किं
न स्यात्तत्राह अर्थैकत्वमिति। न्याय्यमिति शेषः। कथं तर्हि जातिधीरित्यत्राह। अविभागादिति॥ ॥
इति श्रीचंपकनाथकृतौ शास्त्रदीपिकाप्रकाशे प्रथमस्याध्यायस्य तृतीयः पादः ॥३॥ ॥ वार्ति
ककारोऽतीताधिकरणांतरस्योपयोगमाह। उद्भिदादौ त्यादिना विचार्यसंदिह्येत यथेः। पूर्वपक्षमि
ति। गुणविधिरितीत्यादि। असंगतमिति। प्रामाण्यविषयकत्वादिति भावः। विचार्येति। उक्तमित्या
दि सूत्रेणेत्यादि। पश्चादिति। अपि वेत्यादि सूत्रेणेत्यर्थः। वार्तिककारेण प्रामाण्यविचार पूर्वके
गुणविधिनामधेयचिंतायाः अध्यायार्थत्वाभ्युपगमात्तु हिरुक्तेसुचरितमिश्रमतमयुक्तमित्या

शा॰ दी॰ हतद्वेनेति। अस्यायमर्थः तेतेनिराकृताइत्यनेनान्वयः सर्वमिति अस्य च सर्वोर्थः स्वरूपादिषु धर्मस्य द्विधा
६४ विप्रतिपद्यत इति तथा चायं श्लोकार्थः। धर्मस्य प्रमाणस्वरूपसाधनेषु मध्ये पूर्वं तावत्प्रमाणस्वरूपाभ्यां द्वि
धा विप्रतिपद्यते भाष्यकारः। धर्मे किं योगिप्रत्यक्षं प्रमाणमुत वेदेनेति प्रमाणे तथा किं चैत्यवंदनादिर्धर्म उत
64 यागादिरिति स्वरूपे विप्रतिपत्तिः क्रियते तत्राद्यस्यास्या विप्रतिपत्तेर्द्वयस्य निर्णयः पादेन प्रथमपादेन
क्रियत इति। अमुना। कथंलक्षणो धर्म इति प्रश्नस्यामुनोत्तरं प्रत्ययेन। प्रतिज्ञातः उत्तरं तया स्वप्रयुक्तवे
देनास्तत्र मुखेन प्रतिज्ञातमित्यर्थः। अमुनेति पाठे अमुना ग्रंथेनेत्यर्थः। प्रकारनिरूपणप्रकारमेवाह
विधीति। ननु प्रकारनिरूपणस्य कथं प्रमाणाध्यायसंगतिरित्याह प्रकारेति। निराकरणे हेतुमाह तथा
सतीति। तथा च वार्तिककारैरधिकरणभेदो न क्रियत इत्यर्थः। ननु संमतिरप्रयोजिका युक्तो सत्योमि
त्यत आह नचेति नहीति स्मृतीनां वेदमूलत्वेन वेदप्रकारत्वाभावादिति भावः। फलितमाह तस्मादिति
वक्तव्यमिति ननु प्रथमेपादे प्रमाणे त्रिपादीनत्यकार इतीत्यर्थः। नच कथंलक्षणइति अमुना प्रकारनि श्रीरामः
रूपणमपि प्रतिज्ञातमिति वाच्यं प्रधानप्रकृतत्वार्थप्रमाणस्वरूपनिरूपणस्यैवाध्यायार्थत्वा ६४

त्यकारनिरूपणस्यानुषंगिकत्वेनाप्युपपत्तेरिति भावः। कथं तर्हि दात्तत्ववार्त्तिकोपपत्तिरत्राह तत्रेति·
तच्छेषत्वेनेति चोदनाकार्यधर्मत्वमितो धर्मत्वमस्मादिरूपविशेषणोपस्थापनेनार्थवादादेस्तच्छेषत्वे स्मर-
त्यादेस्तत्कन्मूलकत्वमिति विवेकः। श्रुतिमूलप्रमाणकस्यापि स्मृत्यादेर्धर्मत्वमित्यर्थः मूलश्रुत्यनुमा-
पकतया श्रुत्युपकारकत्वाच्छ्रुतीति कर्तव्यतामध्यानत्वोक्तिः साक्षात्प्रमाणत्वफलमाह चोदनात्विति। इ-
त्यनेनेति इतिहेतोऽर्थवादादेरप्रधानत्वेपि धर्मप्रमाणत्वमविशिष्टं चोदनायाः प्राधान्यात्प्रथम-
पादविषयत्वमुपपन्नमित्यर्थः। अनेनेत्वक्ष्यमाणोन्नतमेवाह चोदनेति। नन्वाद्ये पादे चोदनायाः प्रामाण्यं
त्रिपाद्यांत्वर्थवादादेरित्यर्थभेदादध्यायभेदोस्तु कस्तत्राह त्रिपाद्यांत्विति। प्राधान्याप्राधान्यरूपावा-
न्तरभेदमात्रेणाध्यायभेदकत्वमित्यर्थः। नामधेयपादस्य स्मृतिपादानन्तर्ये निमित्तं। स्मृत्यधिकरणएव दर्शिते-
।वार्त्तिककारीयमधिकरणं दर्शयति। तदिहेति। उद्भिदाद्यधिकरणेष्वप्युदाहरणानितानि सर्वाण्यु-
दाहरणानीत्याह संभवदिति। नेति पर्वपक्षकोटिः असंभवमुपपादयति नेति। नाम्नां नाममात्रबोधः
प्रसूप्तलोद्भेदनकर्तृत्वरूपयोगेन स्वरूपगमेन महत्त्वाक्षाद्वित्वाति यदि कार्यस्य प्राधान्यायत्वात्तेनोया

शा.दी.
६५
65

वगानपासार्थ्ये बाधापत्तेरिति भावः। उक्तमेवार्थं स्फोटह स्वाध्यायमाहदेइत्यादिनावक्तमप्रश्नः। अत्रेह ब्यंरक्षस्वे
न्निमात्रावामंत्रणं वस्यासीत्यादावसंनतानाइषेत्वेत्यादोवंजनत्वे आशीःशभिधानादिकादिशब्दार्थः। उक्तम
वोभावेपिवमंत्रायक्रूपिंजल्पानात्ममेत्यादिवन्मंत्रत्वं स्यान्तत्राह मंत्रेति मन्त्रार्थेति मन्त्रपादयोदोषा
भ्राग्निमाधिकरणेशुस्य ष्टाः नाम्नइति नस्यात्तं धात्वबोधकश्रुत्यादिश्रमाणाभावादितिभावः। मन्त्रमिति
कर्तव्यतात्वेपिनामतत्येवशामाण्यं तत्राह अग्न्यहत्रीति धातुजन्यत्रहत्यधिकत्रहत्यभावादित्यर्थः॥
नामत्वमप्यसंभवीत्याह अश्वमिद्धवाचेति। यो गो षिवानेत्रादौ न कर्मणीति भावः। मुकलमिति। अ
वरुषार्थत्वेध्ययनविध्यनुपपत्तेः फलवदर्थावबोधकत्वानुरुषार्थत्वेन प्रामाण्यं सर्वस्य वेदस्य विज्ञा
नमतस्तदन्तर्गतनाम्नामपिनिर्विवादमित्यर्थः। ननु केन रूपेणानेषां प्रामाण्यं परिशेषात्गुणवि
धित्वेन नामत्वेन वेत्याह तत्त्वादिति तत्रेवेति विध्युद्देशएवेत्यर्थः। न तु विध्युद्देशान्तर्भावस्य प्रत्यक्ष
त्वेपि गुणविधित्वनामत्वयोरनुपपत्ते रूकत्वादानर्थक्यमेवास्त्वत्राह स्वाध्यायेति। अनुपपत्तिपरि
हारस्तु वक्ष्यत इति भावः। अधिकरणार्थमुपसंहरति। एतावदिति। ननु विदंत्वन रूक्तमित्याशंक्याह तदे

श्रीराम
६५

तदिति। सामान्यतः सिद्धमपि विशेषविचारेणाज्ञातज्ञापनाय स्मार्यत इत्यर्थः। सत्त्वे समाम्नायस्य सर्वस्य
धर्मपरत्वमित्यर्थत्वमध्ययनविधिबलादर्थवादाधिकरणोक्तं तस्मादुद्भिदादिकमपि तदर्थं स्यात्॥ अथ
पिवा॥ ॥उद्भिदधिकरणे गुणविधिनामधेयचिन्तायाः संगतिं वक्तुं तन्माह विधित्वेनेति। विधेयं तद्भावेने
त्यर्थः। नहि किमुत्तरचिन्तयेत्यत आह एतच्चेति श्रुतिलिङ्गादिविषय इति तथा चास्याश्चिन्तायाश्चिन्तितत्वामा
एव प्रतिष्ठाहेतुत्वात्संगतिरित्यर्थः। यौगिके इति। योगस्य त्वविज्ञादिवत्कर्मण्यपि सौलभ्यान्नामत्वे ते
षां गुणोपपत्तस्त्वमिति चिन्तायामयमन्य इति भावः। किमेषामिति। स्वार्थैकमात्रानुष्ठानस्य वा फलाय गुणा
विधित्वेन नामधेयत्वेन फलवत्फलिभावः। पूर्वपक्षमाह तत्रेति अत एव यागेन उद्भिदा यजेतेनेति। सूत्रमस्य स
र्थः। ननु व्रीहिभिर्यजेतेत्यादिष्व व्रीह्यादिपदवाच्यानामेव व्रीह्यादिगुणानां विधिदर्शनात् कथमत्र यौ
गिकार्थगुणविधिरुच्यते तत्राह यद्यपीति। गुणस्य विधौ शक्त्याद्युपस्थितिमात्रं तन्त्रं। ननु शक्तिजन्यो
पस्थितिरेव तन्नियमे मानाभावादिति भावः। संभवादित्यनेन लक्षणावादादुद्भिदेह स्याद्यागेष्व

भा॰टी॰ ६६ 66

हस्योर्ध्वतायां धातोर्विदारणोक्षिपः कर्त्तव्ये चप्रयोगाद्द्रवयवार्थस्यास्वभित्त्रादौ सत्त्वमात्रे णाप्रसिद्धिः

सुलभेति सूचितेन नुङ्गिनत्रिपश्यन्त्यकाशयतीति योगात्कर्मण्यपि प्रसिद्धिः संभवतीति तत्राह कर्म

णीति। धातूपसर्गयोः प्रकाशनेशक्त्यभावादिति भावः। नामत्वमस्तु पेत्यापि दोषमाह नामेति यजितः

यजिधातुप्रयुक्तप्रवृत्तिनः तद्विशेष्यत्रयेतिपाद्वतं। नचयजिः सामान्येप्रवर्त्तयति ■ मनुविशेषेनामनुतहि

शेषप्रवृत्तिनानर्थक्यमिति मां मैं विशेषविधायकविधिसमभिव्याहृतयजित एव यागविशेषप्रवृत्तिसि

द्धेरितिभावः। ननु गुणविधावुत्पत्तिदूता यागेनेतिमत्वर्थलक्षणास्या तत्राह नचेति नत्वत्रगुणविशि

ष्टयागो विधीयते येन सामानाधिकरण्येनान्वया ल्लक्षणास्यात् किंतु यागमुद्दिश्य कार्यादितिगु

णः। अत एव न दर्शसंशयोऽपृत्या सेवैयधिकरण्यपक्षकोटिरुक्तेति भावः। यागस्य विधौ म श्रीरामः

त्वर्थलक्षणामनुवादेन दर्भावैवकुमुपपादयति यदि हीत्यादिना। करणत्वादिति समानपदोपात्तफलभा ६६

वनायां करणत्वेनान्वयादित्यर्थः। करणमितीति तृतीयया करणत्वप्रतीतेरिति भावः। ननु यागरूपक

रणोऽङ्गिकरणत्वेनान्वेतुमत्राह करणस्येति। साध्यस्यैव करणांशेऽसमन्वकरणस्य सिद्धत्वान्नयाभदनयेक्ष
णादिति भावः। किमतस्तत्राह भिन्नेति। श्रुत्याद्यन्नाद्दृष्टानां यागानुवादपक्षे लक्षणानेत्याह यद्यपि विधि।
प्रकृते तितोऽके ज्योतिष्टोमानेकरमुद्दिश्य यागान्तरानादिति भावः। ननु नामधेयेन करणत्वेन विहितस्य तस्य न
स्यैवानुवादे कथं तत्र करणान्तरविधिस्तत्राह विधिवाक्य इति पशुकामपदान्वयात्स्वरसात्पक्षान्तरमा
ह तदाश्रित्यवेति। नत्वङ्कृते कर्मेत्यर्थः। यागानुवादेन गुणविधिपक्षे वचनव्यक्तिमभिनयति। अङ्गि
हेति। यागमाश्रित्य फलाय गुणविधिपक्षे तामभिनयति। यागसाधनेनेति। कामेन नित्यद्रव्यबाधा
दधीदुद्भिदेव यागनिष्पत्तेरुद्भिदेति ततो यथा सन्निधानाद्यागसाधनत्वेनावगतमुद्भिदं वा फला
यविधीयत इत्याशयेन यागसाधनेनेत्युक्तिः। ज्योतिष्टोमानुवादेन गुणविधिमाक्षिपन्प्रभाकरमतमुपस्था
पयति नन्विति गुणेति ज्योतिष्टोमसंख्यादीनां सोमरूपेत्यर्थः। नयाव यागस्याप्रसत्त्वात्तदनुवादेन तु गु
णविधिरित्यर्थः। तर्हि नामान्तरेषु यागविधिः स्यात्तत्राह नचेति। सर्वत्रेति। उपवायत इत्याहोतदश्रवणा
पि केवलतिङः तस्य पर्यवसानात्करणादिना कत्र्राद्युपपत्त्याक्षेप इति भावः। न हि कस्मिन्कर्मणि गु

शा० ६७ गाविधिः तत्राह लौकिकेति । दृष्टार्थत्यागादिरूपेत्यर्थः ॥ अफला न ग्रामा मनामत्वं तत्राह सापेक्षत्वेने
ति । लौकिकस्य समानान्तरगम्यत्वादिति भावः । तथा च ग्रामाः पयपूर्वकाः एव कर्तव्या इति आभाकराशयः दूषय
ति नेष इति । कर्मविधायकेन नामापि च यागविधौ दोषमाह । अनेनेति । नामभेदो दोषः विशिष्टविधावा
हमत्वर्थेति । नामनः प्रात्ययानर्थक्यादि लक्षणेत्याशयेनाह यद्वेति ननु लौकिकं कर्मानूद्य गुणविधानेन क
मत्वर्थोपपत्तौ वा वि लक्षणागौरवं मान्तरमेवमूलं वाच्यम् । तत्र स्वसापेक्षत्वाद् ग्रामा एव लक्षणापक्षे
पि स्यादेवेत्याशंकां दूषयति । न चेति । यद्वेति लौकिककर्मणो दृष्टार्थत्यागमात्रस्यादेवतोद्देश्यकत्वाभावेन
यजेतेत्यनेनानुवादायोगान्न मत्वर्थोपपत्तिः । नाप्यक्रमानान्तरापेक्षा गंगाघोषादाविव पदसम
भिव्याहारादेव तत्सिद्धेरिति भावः । ननूद्भिदादिवाक्येष्वेव कर्मविधिस्तत्कर्मणा ज्योतिष्टोमनाम्नेन गुण
विधिरिति वैपरीत्यं किं न स्यात्तत्राह इति कर्तव्यतेति विशेषो भूयस्त्वं च स्यात्कर्मविधानमित्यत्र संबंधः तत्र श्रीरामः
साधकं तान्त्रीयन्यायमाह भूयस्त्वेनेति एकस्य कर्मणो वेदद्वये श्रवणे यत्रांगभूयस्त्वं तत्र कर्मविधिरन्य ६७
त्रांगमात्रविधिरिति तन्त्रसूत्रार्थः । तथा च तन्न्यायेनात्रापि ज्योतिष्टोमनाम्न एव कर्मविधिस्तत्सन्निधौ दा

क्षणीयादीनामिष्टीनामग्नीषोमीयादिपशूनामभिक्रमाद्यङ्गसंस्काराणां स्तोत्रशस्त्राणां च भूयस्त्वमेगा
नमाम्नानान्नत्तूद्भिदादिनामकेषु तत्र सर्वत्र माग्नेयो ऽष्टाकपाल इत्यादिः कतिपयांगाम्नानादित्यर्थः। न
नु तथापि न ज्योतिष्टोमवाजपेयककर्मविधिः आग्नेयादिनामकेष्वनेकगुणोपादानात्कर्म चैकमेवानेकगु
णविध्ययोगात्तत्र नानागुणविशिष्टकर्मविधानावश्यंभावेन तत्कर्मानुवादेन ज्योतिष्टोमवाजपेये गुणवि
धिरित्यायेन्नरित्याशंक्यापपादितं तथापि न लौकिककर्मोच्चारणाहूतमप्रामाण्यमित्याशयेनाह भवतु
वेति। अपि तु उद्भिदादिनामसमुच्चयार्थः आग्नेय इति त्वग्निर्देवता त्वष्टसु कपालेषु संस्कृतः पुरोडा
शो ऽग्निमगमत् स्यादिः कालः एवं विश्वजिति बृहद्रथंतरादीनां साम्नां साकल्यमतिरात्रसंस्थाचैमने
कगुणोपादानमित्यर्थः आदिना त्रिवृदग्निष्टुदग्निष्टोम इत्यादिः शंकते कथमिति। तेषु आग्नेयादिषु प्र
तिबद्धो ऽन्वयति लौकिकं वेति। परिहारं शंकते तेन यदीति। गम्यभावादिति भावः। परिहरति न तन्न इति। ननु
प्रकृत तत्र वैदिकेष्वेव दोष इति शंकते अथ तन्नेति। लौकिकेष्वप्ययं दोष एव न्यायसाम्यादित्याह तन्मह
किं तर्हि न लौकिकेषु नापि वैदिकेषु इति महत्संकटमित्याशंक्याह विशिष्टेति उद्भिदादिनामस्वनुण

शा.दी.
६६

विशिष्टकर्मविधिः स्यादित्यर्थः। उभयथापीति। अत्र क्रतौ गुणविधौ गीकारे आग्नेयविश्वजिदादिषु ज्यो-
तिष्टोमाङ्गिरादिवाक्येषु गुणविधानान्नामधेयत्वं न दध्ने नीकारे पित्र्युङ्गिरादिवाक्ये गुणविशिष्टकर्म-
विधानान्नामधेयमित्यर्थः। एवं श्यामाककरकृतमन्नामधेयं न दध्नं पूर्वपक्षं दूषयित्वा स्वपक्षं पूर्वपक्षे
उत्पत्तिशिष्टगुणप्राबल्यविरोधमाशङ्क्य परिहरति। न चेत्यादिना अविधाने च नैत्यन्वयः। तत्र हेतुमाह
काम्यत्वेनेति। पश्वर्थगोदोहनस्य क्रत्वर्थचमसबाधकत्ववदिति भावः। मन्वेवमपि पूर्वोक्तकर्मणि
गुणविधिपक्षे न पूर्वनिर्वचनेति वाच्यम्। तत्रापि गुणविशिष्टमथोत्पन्नमपि कर्मस्वरूपेण निष्कृष्यानु-
वादेन गुणविधिसंभवादहरं त्येन हस्तामलकन्यायापेक्षयेति भावः। पूर्वपक्षमुपसंहरति तस्मादिति। श्लोके
कर्मेति विवक्षितमित्याशयेन तं व्याचष्टे। फलेनावदिति। फलोद्देशेन गुणो विधीयमान इत्यर्थः। प-
रपदेति। पश्वङ्गित्व इत्यर्थः। अत्यन्तेति। फलाय विधीयमानो विधेयार्पकत्वं न वा द्रव्यार्पकत्वं किंतु
केवलप्रत्ययस्याप्रयोज्यत्वात्तत्प्रयोगार्थमेवेत्यर्थः। दोषान्तरमाह विप्रकृष्टेति। विधेः प्रत्ययसमान-
पदोपात्तधात्वर्थमित्यन्वय यापदांतरार्थविधौ विधिविधेययोर्विप्रकर्षादिति भावः॥ चकारात्स्वरसंबन्धि

श्रीरामः
६६

ध्यानमपि दोषः एवमौत्पत्तिकस्योभयबाधोऽन्यदनीयं निरूढादेर्हविष्वमितिदोषास्तु चिन्ताः एवं द्विती
यं पूर्वपक्षं निरस्याय समाधत्ते अथ यद्विति दूषयति नयापीति धात्वोर्विधेयासमर्पकत्वेऽप्युद्देश्यस
मर्पकत्वात् किंचिदित्युक्तं दोषांतरमाह फलेति नन्वेवं दध्नेंद्रियकामस्य जुहुयादित्यादौ फले व्री
हिभिर्यजेतेत्यादौ च कर्मणि गुणविधिर्नस्यादित्याशंक्य वैषम्यमाह दधीति गतीति नामत्वरू
पेत्यर्थः दध्यादौ गत्वाभावं विशदयति हवेति ननु पिङ्क्तः को किलइत्यादौ प्रसिद्धको किलादिपदसा
मानाधिकरण्यात्मिकादिपदस्येव दध्यादिपदस्यापि प्रसिद्धपजिपदसामानाधिकरण्याद्यागनाम
त्वंस्यादित्याशंक्याह अप्रसिद्धेति नत्र सामानाधिकरण्यं संभवति नात्रेति वैषम्यमिति भावः
उद्भिदादौ गतिं विशदयति। उद्भिदिति। पशुच्छेदनेति। धात्वर्थनाम्ने कार्यत्वादुद्भिन्नयारत्नशलाक
येव मंत्रोयं केनोद्भिन्न इत्यादावुक्तसर्वभिदेराविभावे प्रकाशनेवा प्रयोगदर्शनादिति भावः। ननु
पशुच्छेदनसाधनत्वेन प्रयुक्तामपदाभ्यां ताभ्यामेव कर्मसिद्धेः किमुद्भित्सदस्य कर्मणि योगक

शा.दी.
६२
69

त्यनयासत्यंनात्त्रतेनरूपेणाकर्मबोधः उद्भिदादिनाम्नः कर्मणिप्रकारत्वेन बोधस्वीकारान्न शा
ब्दोपस्थितस्यैव शाब्दधीविषयत्वमित्युक्तनियमस्य संज्ञातिरिक्तविषयत्वेन शाब्दानुपस्थितस्यापि
नाम्नः श्रोत्रगृहीतस्य शाब्दधीविषयत्वसंभवात् पञ्चार्थे यस्य शाब्दस्य योगादिसंभवस्तत्रैस्यैव न३
संज्ञात्वमिति शास्त्रोक्तेः संज्ञात्वसिद्ध्य एव योगकल्पनादिति संक्षेपः। नन्वेवं खनित्रेवा कर्मणो वा
योगोऽस्त्वस्य इत्यादि निगमने त्वत्राह नात्रधात्वर्थेति। कर्मणि योगेन नामत्वे धात्वर्थविधानलाभो
न गुणविधावित्यस्तिविनिगमनेत्यर्थः। ननु तर्हि पाराध्यादिदोषाभावाद्गुणविशिष्टकर्मविधि
रिति तटस्थशंकायामाह विशिष्टविधीति। ननु सोमेन यजेतेत्यत्र सोमवतायागेनेतिमत्वर्थलक्ष
णास्वीकृता तत्राह सोमादाविति। अर्थान्तरे रूढत्वेन नामत्वासंभवादित्यर्थः। लक्षणाप्रसक्तिं
विशदयति उद्भिदिति। ननु पशुफले करणत्वसंभवान्न मत्वर्थलक्षणाप्रसक्तिस्तत्राह करणं श्री एम.
वेति। पशुफलस्य भावनायां कर्मकारकत्वात्कारकाणां च परस्परमसंबंधान्न पशुफलसंबं ६२

घइत्यर्थः तर्हि धात्वर्थभावनाया मेव क्रियायां करणत्वमस्त्वत आह क्रियाचेति धात्वर्थस्य समा
नपदोपात्तत्वेप्यपुरुषार्थतया भावना क्रियायां करणत्वस्य भाव्यत्वायोगादिति भावः तर्हि तस्या
मेव करणत्वमस्त्वत आह नच तस्यामिति अस्तु तर्हि धात्वर्थरूपक्रियायां करणत्वं तत्राह नच धा
त्विति प्रत्ययार्थभावनायाः पशुफलेन भाव्याकांक्षानिवृत्तेः करणाकांक्षायां प्रत्ययसमानपदे
न धातुना स्ववाच्यस्य करणत्वेनैवार्पणात्तस्याः क्रियात्वानवगमादित्यर्थः। करणत्वेनावगतिव
त्क्रियात्वेनाप्यवगमः किं न स्यात्तत्राह क्रियारूपत्वे चेति। करणत्वक्रियात्वयोर्विरोधान्न तथा
वगम इति भावः नन्वु धात्वर्थस्य शाब्दतः करणत्वावगमेप्यार्थिकसाध्यत्वावगत्या तत्कर्मकभावना
यां करणत्वेन संबध इत्याशंक्य दूषयति न चेति। अयोगादिति शब्दस्यैव शाब्देनान्वय इति नियमा
दिति भावः। ननु भावनावाचकप्रत्ययस्य समत्वाद्भूतत्वमसिद्धं तत्राह फलभावनाहीति। विध्यर्थ
प्रवर्तनायाः पुरुषार्थभाव्यकप्रवृत्तिजननस्वाभाव्यात्फलपदसमभिव्याहाराच्च फलभावनैवाप्या
व प्रत्ययार्थो न धात्वर्थभावनेत्यर्थः। अध्याहारेऽपि दायागंयायोनपशूनिति वाक्यभेदमाशंक्याह उभि

शा· देति इतिशब्दस्य न चेति पूर्वेणान्वयः निषेधे हेतुमाह विनेति। एवंगत्यंतरनिरोधे फलितमाह तदवश्य
७० मिति। तस्मात्तद्गत्यभावात्। द्वितीति वाक्यान्यथा सामानाधिकरण्यायोगादित्यभावः। अतो गत्यभावमेवानु
70 वदति। नान्येति। किं तत्तत्राह तत्रेति। ननु नाम्नोऽपि नाम्नि निर्लक्षणेव तत्राह नामधेयत्वेति श्रुत्या
योगरूढ्याय ह्यासंतायाः सन्निनिशत्वेवेत्यर्थः। श्योकान्नराधे विवृणोति सोमेनेति। नाम्न आनर्थक्यमु
नि५ द्दरति प्रयोजनं लिङ्गद्रव्यदेवतादिनोपलक्षणापेक्षयालघुरित्यर्थः। उपबंधेन संबंधविधानार्थत्वेने
त्यर्थः। सत्रे अपि वेति शर्वपक्षव्याहृत्यर्थं उत्सनो उत्सन्निगाकाय पर्वमप्रसिद्धार्थकं पदं कर्मनामधे
य अविधायकत्वाद्गुणविधायकत्वाभावात्॥ ॥यस्मिन्॥ ॥पूर्वाधिकरणविषयाद्व्यावर्तयति
जातीति। निरूढा रूढाः आज्यादिशब्दा जातौ चित्रादिशब्दास्तु गुणे रूढा इति भावः। वस्तुमात्राभि
प्रायेणोत्पत्तिवाक्यगताज्यशब्दव्याहृत्यर्थमाह गुणफलेति आज्यादिशब्दा गुणविध्यर्थवाक्ये
श्रुताः चित्रादिशब्दाः फलोपबद्धवाक्य इति विवेकः। दधिसोमादिशब्दान्व्यावर्तयति कर्मणएवेति श्री·एम·
योगेति योगो वयवशक्तिलक्षणो मुख्यार्थसंबंधलक्षणश्च विवक्षितः। ततश्चाजिमधावन्नेषु मो ७०

सत्य छंना

त्रेषु देवा इत्याज्य शब्दस्तत्र साधुरितियत्तस्य येमत्यवयवयोगात्संभवतीति: एदाजिमीयुरिसदाज्यानामाज्यत्व
मित्यर्थवादात्।। आपोवा तीयमार्क्ष्मासावायुः कष्ठशाहोरयुंतरादिषु योगात्संभवतीति: सोमः एव
न इत्यादो पवनक्रियाकर्तृत्वेन प्रसिद्धः सोमे। एकेष्वपवर्तते यात्तेवयुक्तानामपाष्टकेनायुस्यशादिद्यंतरा
दी त्युसन्तानीति स्पृशातिधातुनिष्पन्नः। योगिकः पवमानशब्दस्तद्वाचकमंत्रसाध्ये स्तोत्रेमुख्यार्थ
संबंधेन सहसोवहिः क्रियमाणस्तोत्रे वहिष्पवमानमितिवंसंभवतीति: तथादधिमध्वादि चित्र इव्यकत्वा
न्मुख्यार्थसंबंधेन चित्राशब्दः कर्मणि संभवतीतिरितिभावः। नामत्वापकर्मसामानाधिकरण्यमप्यावश्य
कमाह तत्सत्रीति। आज्यवहिष्पवमानपदे तु सन्निधा नाम भिनीयदशितेत्याज्येति। परिहरति पक्षेति।
पूर्वपक्षः सिद्धांतपक्षोवायत्रनिर्णीतुं शक्यस्ते सेवोदाहरणे यत्ताद्रुसन्निगाकोतदभागान्तोदाहियत इत्यर्थः।
तत्र पूर्वपक्षनिर्णयाशक्तिं तावदुपपादयति नतावदिति असंभवादिति आशाश्वात्मकत्वादिति भावः। तथा
च्याज्यशब्देन घृतवाचकेन घृतसंबंधिनो मंत्रा लक्ष्यंत इति वक्तव्यं तदपि न संभवतीत्याह नचेति न
नु विशिष्टविधिविषयासंभवस्त्वेवमंत्राणां घृतसंबंधोपि विधीयते तत्राह नवेति स्तोत्रमात्रविधिमपेक्ष्य
५ वाक्ये कर्मसमानाधिकृते। चित्रापदे सिद्धांते फलवाक्ये कर्मसमानाधिकृतं। पूर्वपक्षे तु गुणवाक्य इत्यभिप्रायेण
५ गुणवाक्ये वेत्युक्तं। विषयंशोधयितुमाह [illegible] आज्यादिशब्दानां सन्निधाकर्मसामा

शा० ७१

71

मंत्रविशिष्टस्तोत्रविधौ गौरवं सुतरां स्फुटमतो विशिष्टमंत्रविशिष्टविधानमित्युक्तं ते त्वक्तं विधौ चेति अत्र तु वादे
द्विलक्षणानाश्रयणे दोषः तस्य पुरोवादानुसारेणार्थबोधकत्वात् विधेस्तु तदनपेक्षत्वान्मुख्यार्था
र्थस्य लक्षणात्यंतक्लिष्टेत्यर्थः यद्यपि वैरूप्यकाप्यत्वेन तत्संबंधिनो मंत्रा बहवः शमिष्ठास्तथापि तेषाम
त्र विधाने त्वस्मत्र आद्याया ही तादिमंत्राणामाज्यस्तोत्रसन्निधिनामानर्थक्यं विकल्पो वा स्यादिति दोषो द्र
ष्टव्यः। नत्वर्जिपदस्य कागतिरित्याशंक्य पात्तो नामत्वमित्याह तद्वदिति योगः आगेवदर्शितः इत्था
नीमिष्टं तत्पक्षनिर्णयाशक्तिमाह तद्वदिति सामानाधिकरण्यमात्रे सोमादावतिप्रसक्तं वाक्य
शेषस्य वस्तुस्वार्थत्वान्नादर्तव्य इति भावः। एवमुक्तनिवाक्येपक्षद्वयनिर्णयासंभवमुक्त्वा गुणवाक्येन त
त्संभवमुपपादयन्नादौ पूर्वपक्षनिर्णयसंभवं दर्शयति यदा त्विति। अवांतरप्रकरणेनेति अनेनानुवृत्त
तीयाविभक्त्यभावेन करणत्वानपेक्षत्वादंगत्वमात्रेण विधिरुपपद्यत इत्युक्तं यद्यपि द्रव्यमात्रस्य क्रि श्रीराम:
यायोगं विना न प्रकरणेन विनियोगस्तथाप्याज्यस्य स्तुत्यंगत्वेन सन्निधानं विनेत्याज्यानि सन्नि ७२
धापयेदिति। विधिपर्यवसानादर्शनिक्रियायोग इति भावः। तेनैवांगत्वविधानेनैव प्राप्तमंत्राणामाज्य

संबंधमाज्यपृष्ठेनाज्यसंबंधिमंत्रलक्षणयानूद्यतेति यो जनाविनैवेति सन्निहितत्वादुक्तो गौरवभयेनाम
त्वांगीकारः न चैतदस्तीति भावः प्रसिद्धाधिकरणे इति रूढिः प्रसिद्धिः आदिनात्र प्रवृत्तिविशेषः उत्पत्ति
वाक्ये सिद्धान्तसंभवमुपपादयति यदानुनादेति सिद्धान्ते वक्ष्यमाणन्यायादिति भावः पृष्ठपदे तेन वर्ष
याम सिद्धेनैवगृह्यत इति मुख्यत्वमिति प्रकृतस्तोत्राणां मंत्रसङ्ख्याया तदनुवादेन पंचदशत्वसंख्याविधिः
संभवतीति तथा पृष्ठशब्दस्य पृष्ठस्य प्रकाशकमंत्रलक्षणेव दोष इति बोध्यं तदनुवादेति उत्पत्तिवाक्य
इति शेषः विधानव्येति गुणवाक्य इति शेषः वाचित्वइति उत्पत्तिवाक्ये नामत्वे सिद्धे सत्वेवेत्यर्थः इति
गुणेति उक्तरीत्या गुणवाक्ये आज्यशब्देन स्तोत्रानुवादात् लोचनेनेत्यर्थः एवं विषयसंशोध्य प्रागु
क्तमेव संभवविरोधं निपंचेति संख्येति समगिरि द्वा आज्यस्य स्वतः संख्यायोगाभावेपि पात्रभेदेन
तावत्वत्परिमाणेन वा संख्यायोग इति भावः एवमिति किं समदशसंख्याकानि पृष्ठानि स्तोत्राणि गत्वे
न विधीयन्ते स्तोत्रकाले समदशापुरुषपश्वारागप्रकृहचशन्निमिति यावत् किं वा पृष्ठशब्देन स्तोत्राण्य
नूद्य संख्यामात्रं विधीयते तथात्रिवृद्बहिष्पवमानमित्यत्र किं समदसोमवहि विजनाहिना त्रिगुणेवा

श्रा॰ ७२ यः। क्रायेइतिस्तोत्रांगत्वेनविधीयते। उन्नवहिष्पवमानशब्देनस्तोत्रमनूद्यतत्त्वत्रिवृत्त्वंविधीयत इ
तिसंशयो द्रष्टव्य इत्यर्थः। चित्रयेतीति। चित्रया यजेत पशुकाम इतिवाक्य इत्यर्थः। अग्नीषोमी
येति। उद्भिच्छब्दवदनुवाद इति भावः। तत्रेति। प्रकृतयागएवनामधेयत्वमित्यन्वयः। चित्रद्रव्यवाचकत्वा
72
दिति। प्रवृत्तिनिमित्तोक्तिः नानाद्रव्यवाचकत्वादित्यर्थः। चित्रद्रव्यवाचकत्वादितिपाठे यागस्य च तद्द्र
व्यकत्वादिति शेषः। पूर्वपक्षमाह तत्रेति। गुणविधिः चित्रत्वस्त्रीत्वगुणविधिः रूढत्वादिति। उद्भिदा
दयस्तु यौगिका इति। वैषम्यमित्यर्थः। अतएव संगच्छत इति भावः। ननु तर्हि गुणविधौ मत्वर्थलक्ष
णा स्यात्तत्राह उत्पन्नेति। अर्थैतिना साधितं करणमिति न्यायावगतमित्यर्थः। वैयधिकरण्येने
ति सामानाधिकरण्ये हि लक्षणा स्यादिति भावः। सोपि द्रव्याधिकरणएवोक्तमित्यर्थः। नन्वेकेन वाक्ये
न गुणद्वयविधाने वाक्यभेदः। न च विशिष्टोभयं स्त्रीत्वस्य प्राप्तत्वान्नत्र चित्रत्वमात्रविधानात् वाक्य
भेदः शंकः। अग्नीषोमीयेत्र यागेति हि नेता इत्यादि शु चित्रत्वस्य प्राप्तत्वेन स्त्रीत्वमात्रविधेरपि सुवचत्वा श्री एप॰
द्विनिगमनाविरहितपशुषु विध्यसंभवेनानारभ्याधीतानां प्रकृतगामित्वन्यायेन प्रकृताव ७२

ग्नीषोमीय एव तदुभयविशिष्टस्य कर्मभेदो दुर्वार इत्याशंक्य निराकरोति नचेति एकेति चित्रत्वस्त्रीत्वकारकाणां
चित्रयेत्येकपदोपात्तत्वादित्यर्थः। उभयेति। प्रातिपदिकार्थस्य चित्रत्वस्य तदाक्षिप्तद्रव्यद्वारा टाबर्थस्त्रीत्वस्य
च तत्तीयार्थकारकेणावैशिष्ट्यस्य सम्भवत्सिद्धत्वादिति भावः ननु एवमपि यागे चित्रत्वस्त्रीत्वविशिष्टकारकस्य
यागस्य च फले विधानाद्वाक्यभेदः स्यादेवेत्यत आह पश्विति ननु फले कामनावतः साधने तत्राह अस्तीति। फल
स्य साधनाधीनत्वात्फलमिच्छन्नवश्यं साधनमिच्छत्येवेति प्रसिद्धमित्यर्थः। ननु स्वतन्त्रेवं आज्यवाक्ये त्वाज्य
संख्ययोः पदद्वयोपात्तयोर्विधौ वाक्यभेदो दुर्वारस्तत्राह एवं चेति स्तोमेडः पंचदशाद्यर्थे इति डप्रत्ययविधायकस्
त्रे स्तोमशब्दस्य स्तोत्रांगभूतपदगतसंख्यावाचित्वसंभव इति भावः ननु तत्र गुणविधावपुष्टसन्निवाक्यगता
ज्यपदस्य नामत्वे किमायातं तत्राह एवं चेति नत्राज्यपदार्थनिर्णयस्य गुणविधानाधीनताया उक्तत्वादित्यर्थः।
वाक्येति। गुणविधावित्यादिः वाक्यभेदान्न गुणविधिः किंतु सामानाधिकरण्यादेर्नाममत्वेनैवेत्यर्थः अन्वा
ख्यानेति। प्रकृतार्थमनूद्य तस्य स्वार्थमाख्यातीत्यन्वाख्यानं अत्राज्यपदव्युत्पादनवाक्यशेषः स चाग्रे सामार्थवा
दश्चेत्यर्थः। विधानेपीत्यपि नान्यग्नीषोमीयपशोः कृष्णसारंगत्वलोहितसारंगत्वधर्मवत्त्वाच्चित्रत्वस्या

शा· मेः स्त्रीत्वमात्रवि। शिष्टकारकविधाने पीति विशिष्टविधिगौरवमस्येवेति सूचितं मुख्यमिति स्वर्गकामा
७३ धिकरणोक्तन्यायेनेति शेषः तथा च सर्वेषम् भवति न गौणान्याय्यमिति नोक्तसाधनकामनानुवादइत्य
73 तिभावः। दोषांतरमाह प्रकृतेति। तत्रैव प्रकृतेदध्यादियागएवेत्यर्थः फलमात्रविधानमिति फलेयागसंबंध
मात्रविधानमित्यर्थः। प्रतिपत्तिरितिनियमेनेति शेषः। तथा च विध्यन्वयस्याभ्याहितत्वाद्दाक्ष्यसंख्ययोः प
न रस्परान्वयित्वेनैव विध्यन्वये स्याद्वाक्यभेद इत्यर्थः उत्पत्तिवाक्यस्याज्यपदस्य नामत्वमपि गुणवाक्याधीन
निर्णयमित्याह तच्चेति। आज्यस्तोत्रानुवादेन संख्याविधानमित्यर्थः। वाक्यांतरप्राप्तस्योद्देश्यत्वाद्यो
गादितिभावः। उदात्तत्वमिति उत्पत्तिवाक्यत्वेनोदात्तत्वमित्यर्थः चोद्यमेवाह यदीति संतु बहूनि को दोष
स्तत्राह तत्रेति पत्नसमेव क्ष्यते तादृरूप्येतेत्यन्वयः वक्ष्यमाणमेवाह ज्योतिरिति ढेएवेति बृहद्रथंत
ररूपेइत्यर्थः ननु ज्योतिष्टोमेपि मैत्रावरुणसामादिष्टष्ठानि बहूनि संति तत्राह मेवेति ज्योतिष्टोमे
पृष्ठबहुत्वाभावफलितमाह तेनेति सर्वेति विश्वजित्सर्वपृष्ठो भवतीति वाक्यइति शेषः चोदकेति ज्यो श्रीएमः
तिष्टोमिकातिदेशेत्यर्थः तर्हि किमुत्पत्तिवाक्यंतदाह तेनेति पृष्ठेस्तुवतइत्यस्योत्पत्तिवाक्यत्वाभा ७३

वेनेत्यर्थः मन्त्रादितं वार्त्तिकानुपपत्तिचोद्यमर्धांगीकारेणापरिहरति सत्यमिति तद्वाक्यं नो सन्निवाक्य
मित्यर्थः नहि किंकथमुदाहृतं वार्त्तिके तत्राह अनादरादिति। अनादराभिप्रायं स्फुटयति एतदिति
सर्वथेति एष्ठेः स्तुवत इति वा पष्ठं तत्र ष्ठं भवतीति वा तत्सन्निवाक्यमिसत्र नाग्रहः किंत्वेतदधिकरण
विषयत्वेन गुणवाक्यमेवोदाहृतं वंनोत्सन्निगा कं पक्षद्वयनिर्णयस्य गुणवाक्याधीनत्वादित्यत्र
तात्पर्यमित्यर्थः सूत्रे यस्मिन्वाक्ये गुणोपदेशः प्रतीयते तत्र तस्य नामत्वेनैव प्रधानसंबंधः॥ ॥तत्र॥
इह गुणविधित्वेपि न वाक्यभेदः इत्युत्थानात्संगतिः प्रसिद्धीति समासावयवस्याग्निशब्दस्य देवतायां प्रसिद्धिः
आदिना प्रवृत्तिविशेषकरत्वाहि- ननु ह्रिदादाविव मत्वर्थलक्षणाप्रसंगात् न गुणविधिरित्याशंक्याह न
चेति। बहुव्रीहिणेति। सप्तमीविशेषणे बहुव्रीहाविति ज्ञापकात् सप्तमीगर्भव्यधिकरणबहुव्रीह्येवश्यं
भावात् सामान्यज्ञापकवशाच्चतुर्थीगर्भव्यधिकरणबहुव्रीहिरविरुद्ध इति भावः। एतेनोद्भिदधिकरणे स
र्वेषामेव यौगिकानां नामत्वेप्युसाध्यदितेयत्र मत्वर्थलक्षणाभावाद्गुणविधित्वमस्त्विति शंका निरा
करणार्थत्वादस्य नैवेयमभिति सूचितं होमं मत्वर्थस्य होमाग्न्योः संबंधस्यानुबहुव्रीत्यर्थस्यान्वय

हुंनं र

शा० दार्थस्य होमस्य जुहोतीति नैव विधानात् किमग्निहोत्रपदेनेति तत्राह उपसर्जनेनेति उपसर्जनमग्निपदं नामत्वेनाबाध
७४ कमाह। नामेति। द्रव्यदेवते हि यागस्य रूपं तत्कृत्यत्वमेव न ह्यकाले हि न कर्मणः स्यात् एतद्धाऽस्य देवताविधायकत्वा
भावादित्यर्थः। दध्नादीति दध्ना जुहोति पयसा जुहोतीत्यादीत्यर्थः। ननु यदग्नये चेत्यादिवाक्याभ्यां देवतालाभ
74 स्तत्राह यदग्नये चेति अग्नेकेति यथास्य मग्निप्रजापति सूर्यप्रजापतिलक्षणानेकगुणप्रापणात् त्राहि शिष्ट
कर्मान्तरविधानान्न ततो देवतालाभ इत्यर्थः। ननु कवाक्ययोः किमिति कर्मान्तरविधिः देवताविधिरेव किं न
स्यात्तत्राह देवतेति प्राप्तकर्मण्यनेकगुणविधाने विध्यावृत्त्यापातादसामर्थ्यमित्यर्थः। ननु यदग्नये च
ति वाक्येऽग्निप्रजापत्याश्रितमेकं देवताकारकमग्निहोत्रहोमानुवादेन विधीयते एवं सूर्यवाक्येऽपीति नवा
क्यभेदः न चाग्नये प्रजापतय इति चतुर्थीभेदान्न ह्याद्यं देवताकारकभेदस्तु चतुर्थ्यास्तद्धितेन देवतायाम
स्मरणात् न च द्रव्योद्देश्यत्वविशिष्टद्रव्यप्रतिग्रहीतृत्वरूपसंप्रदानत्वगो विन्या चतुर्थ्यावाच्ये कदेश श्रौतम:
द्रव्योद्देश्यत्वरूपदेवतात्वलक्षणासंभवाच्चतुर्थीद्वयलभ्यदेवताकारकभेद एवेति वाच्यं द्रव्योद्देश्यत्व ७४
मात्रस्य मैत्रावरुणाय दण्डं प्रयच्छतीत्यादावतिप्रसक्तेन याद्देवतात्वरूपत्वाभावादनन्तरं दर्शितस्यान्यस्य

वदेवतात्वस्येह लाघवादेकस्यैव कल्प्यत्वान्नशाहं देवताकारकद्वयमिति तद्वाक्यभेद इति प्राभाकरमतमा
शंक्य निराकरोति न चैककारके इति कल्पनयापि देवतायाः प्रतीतावश्यंभावे अग्नयमाणा चतुर्थ्या एव स्वार्थे
कहेशहारात्तल्लक्षकत्वौचित्यादिह भक्तिभेदेन तत्त्वस्य देवताभेदः स्यादेवेति भावः विभक्तिपृथक्त्वे कार
कनानात्वं व्यतिरेकमुखेनोपपादयति यदिहेति अग्नीषोमीयवदिति अग्नीषोमपदोपरि देवताप्रत्य
यत्ववदित्यर्थः । अग्नीति अग्निपदप्रजापतिपदाभ्यामुभ्येमित्यर्थः । तत इति । समासेन सहितत्वयो
पात्तयोरेव विभक्त्यर्थान्वयादिति भावः । अश्रोष्यत्तत्रभेत्स्यतेति क्रियातिपत्तौ ल्रुङ् । तथा च तथाश्रव
णाभावेन देवताकारकभेदाद्वाक्यभिन्नस्यैवेत्यर्थः । नन्वरुणास्थले द्रव्यगुणयोरसत्यपि समासे क्र
येण वैशिष्ट्यवदिहाग्निप्रजापत्योः समासाभावेपि विभक्त्यर्थेनान्वयोस्त्वत आह अथापीति य
थारुणैकहायन्यापदाभ्यां पृथक्पदं क्रीणातिना तथाग्निप्रजापतिपदाभ्यां चतुर्थीविभक्तिः पृथ
क्पदस्यादित्यर्थः तथापीति तथा सत्यपीत्यर्थः । तथा चतुर्थ्या सहतदर्थकारकेण सहेति यावत्
वाक्येन समभिव्याहाररूपवाक्यप्रमाणेन त्वाग्निप्रजापत्योर्युगपत्संबंधे दृष्टान्तः अरुणेति य

श्रा० याऽरुणैकहायन्योर्द्वयोर्गुणयोः क्रीणात्यर्थेन सहवाक्ययोर्युगपत्संबंधस्तथेत्यर्थः प्रकृतेनेपदद्वय
७५ कृत्वाभावाद्वैषम्यमाह यद्यपीति भावनेतिभावनावाचिनी विभक्तिर्भावनामित्येवमन्वयः उच्चरंतीत्युर्ध्वव
75 र्तमाना एवं च यजतीत्यत्र पदश्रुत्या प्रथमं यज्यन्वितभावनायां धात्वंतरोपात्तस्य दुर्बलेन वाक्येनान्वया
भाववद्दिहापिपदश्रुत्या प्रथममेकैकमात्रान्वितदेवताकारके पदांतरोपात्तस्यान्वयासंभवात्तद्विशिष्ट
देवताकारके भेदः स्वीकार्य इत्यर्थः। देवतात्वेन देवतैक्याद्वाक्यभेदस्तत्राह देवतेति एवंप्राभाकरमतंदू
षयित्वात्र प्रकृतमुपसंहरति। अत इति। वाक्यभेदादित्यर्थः। असंभवादित्यनेनान्वयः नामत्वइति अग्निहो
त्रपदेतिशेषः असंभवादिति। अग्निसूर्यवाक्ययोरग्निहोत्रनामत्वे चेतिशेषः एवं बहुव्रीहिसूचितगुणवि
शिष्टकर्मांतरविधिपक्षं प्रदूष्य पक्षांतरमाह अविहितेति ननत्र ख्यात्वमिति अग्निसूर्यवाक्ययोर्विशि
ष्टकर्मांतरविधायकत्वेनाग्निहोत्रपदं प्रवृत्तिनिमित्ताग्निगुणरव्यापकमाख्यातं नास्तीत्यर्थः। आघा श्री एम:
रेति। घृ क्षरणदीप्त्योरितिधातोरकर्तरि च कारक इति कर्मणि घञंत आघारशब्द इति भावः। ननु किम ७५
त्राह तच्चेति तथा चात्र संस्कारार्थगुणविधिरित्यर्थः। ननु स्कंदनद्रव्यस्य प्रयोजनमाह निष्प्रयोज

नस्येति । आज्यभागादिव्यावृत्त्यर्थं प्रकृतेति । प्रकृतस्थासोऽवाच्यापेक्षोपांशुयाजस्तदर्थमित्यर्थः । आ
ज्यभागादिं व्यावृत्तदेशत्वंगत्वान्न प्रकरणमतः प्रधानोपांशुयाजार्थत्वमस्य सर्वस्यैवा इति वाक्ये त्वाज्य
भागादिविषयमिति भावः । अत्रापि नमत्वर्थलक्षणाप्रसक्तिरित्याह प्रकरणेनेति अत्रयघप्या
घारमाघारयतीत्यत्र साधारपदं नविधेयगुणसमर्पकं न चापि प्रकरणकल्पितवाक्येन संस्कृताघा
रद्रव्यस्यैव विधानात्तत्राघारपदस्याविधेयगुणसमर्पकत्वमस्तित तस्मात् श्रुतवाक्यैर्गतं कल्पितवाक्याग
तेनापद्रेवसिद्धान्तेनामत्वेनाभिमतं तस्यैव सर्वपक्षेगुणविधित्वमिति प्रकरणेन गुणो विधीयमान इत्यनेन न
सूचितं मन्तुविशिनचोपांशुयाजवाक्यविहितमुपांशुयाजमनूद्य प्रकरणकल्पितवाक्येन वैष्णवधिकर
णपनैवगुणविधिसंभवान्नमत्वर्थप्रत्ययः कस्य इति शंक्यं उपांशुयाजवाक्यमेव प्रकरणसनाथंसंस्कृ
ताघारद्रव्यविशिष्टोपांशुयाजविधायकमित्याश्रित्य तदुक्तेः आघारशब्देन प्रकृतसान्नाय्योपांशु
याजादिद्रव्यमनूद्य संस्कारगुणविधिरित्यनंशोकारस्त्वाघारशब्देन सान्नाय्यादेरविहितत्वेन तेन
शब्देन नदेनुवादायोगादिति ध्येयं न तु प्रकरणेन वाक्यकल्पनाप्रेयादस्त्रैव यागविधेर्नामेव स्या

अपेक्षित्वेति विश्व साधितमधिकरणत्वादिति भावः। अभिप्राय इति सुप्तामपदस्य त्याधात्वर्थस्य कर्मनान्वयात् त्वे
द्वितीयोपपत्तिरिति भावः। विधेरिति विधायकप्रत्ययादित्यर्थः। प्रवर्तनायाः समीहितसाधनविषयतास्वारस्यादिति भावः। ७

ग्रा० ७६ 76 तत्राह नचेति यज्ञश्रवणादिति भावः। ननु स्त संस्कारविशिष्टत्याध्याधारपदं नामेव ननु संस्कार्यसम
र्पकमर्थादेवलक्षणया योग्यद्रव्यलाभादित्यत आह नच संस्कारेति। संस्कारनामनः संकल्पादावनुपयो
गः श्रुतपदस्यैव च संस्कार्यसमर्पकत्वसंभवे पात्रेनं तत्कल्पनं मत्वा चिन्तामिति भावः। इतोपि गुणविधिरि
त्याह एवं चेति। संस्कार्यत्वात्। आघारणरूपसंस्कारं कि याया कर्मकारकत्वात्तेन त्यांग्निहोत्रमि
त्यत्र कथं द्वितीयोपपत्तिस्तत्राह अग्नीति अनुवादेनेति। द्वितीययेति शेषः। इदं च दर्विहोमाद्यैगुण
विधिपक्षेन तु विशिष्टविधिपक्षे तत्रोक्तरीत्यसंभवात्। सिद्धांते द्वितीयानुपपत्तिमाह। नामत्वेति। तस्य
उपसर्जनार्थगुणस्य स्यादितिकरणेन सामानाधिकरण्यादिति भावः। सिद्धांते द्वितीयोपपत्ति
माशंक्य परिहरति नच फलेति करणत्वमिति फलकर्मभावनायाः करणापेक्षत्वात्समानपदश्रुत्या
धात्वर्थस्य करणत्वेनान्वयादिति भावः। ननूत्पत्तिवाक्ये साध्यत्वेनान्वयेपि फलवाक्याधीनसमीहि श्रीएम: ७६
तसाधनत्वालोचनात्प्रवर्तनाविषयत्वं स्यात्तत्राह साध्यत्वे चेति कर्मान्तरमिति तत्तस्य फलवाक्येपि
समीहितसाधनतानवगमात्प्रवर्तनासंभव इति भावः। उत्पत्तिवाक्ये करणत्वेनाप्रतीतेस्तस्य फ

त्वषावों ना। ग्नेयमितीमन्त्राधितत्वाकांक्षत्वात्कांक्षितिभावः। अग्निपात्रमितीति समानपदश्रुतस्याग्नेयपदस्य
त्वपदइत्यत्र वार्तिकसंमतिमाह। तथा चेति। अस्यैवार्थः पूर्वपक्षमुपसंहरति अतइति सिद्धांतयति अत्रेति
वाक्यार्थइति। विशिष्टविधिपक्षे गुणाविशिष्टकर्मपदद्वयगम्यत्वाद्वाक्यार्थः। गुणमात्रविधिपक्षेपिगुणस्यावि ना
धेयत्वसंबंधोवाक्यगम्यएव। आधारवाक्येद्रव्यानुवादेनसंस्कारस्यश्रुत्याविधानेतदभावेपितत्करणक
त्वितवाक्येनविशिष्टविधिपक्षस्यरूपेणस्तुत्यानुवादेनद्रव्यविधिपक्षस्यचोक्तत्वाद्वाक्यार्थतावोध्यान
न्वगत्यावाक्यार्थविधिस्वीकारमत्राहपदांतरमिति श्रुत्येति। समानपदश्रुत्येत्यर्थः। त्याद्वाक्येतिसोमेन
यजेतेत्यादाविवेतिशेषः। तद्वितेति उपपदमित्यर्थः। गुणमिति देवतालक्षणंगुणमित्यर्थः। ततस्त्व
८ नामरूपत्वमपीतिभावः। नामधेयत्वेनेति तन्त्ररत्नव्याख्यायामगुणप्रवृत्तिनिमित्तकतयाव्याधिक
रणोपिवह्रीहिः साभागिकः सिद्धांतेनपूर्वपक्षइतिभावः। प्रश्नपूर्वकमाह अग्नेरिति मंत्रा
पिनलिंगाद्विनियोजकः येनदेवतावगमात्सर्वमंत्रसामर्थ्यानिश्चयात्मंत्रविनियोगोपिनस्यादित्या
शयेनाहवाचनिकेति एवंचगुणसाधनत्वात्नविशिष्टविधिः नापिदधिहोमादौगुणविधिः

गृ॰ ७७ समानपदत्वश्रुतस्यार्थोविधिसंभवेवाक्यार्थविध्ययोगादितिभावः। अत्र यदुक्तं अग्निहोत्रवाक्यविहितकर्म
णोऽग्निसूर्याभ्यां यथास्वगुणद्वयविधाने वाक्यभेद इति तदप्रसक्तिरित्याह यदेव यदुक्तं तेनास्मै याय
चेत्समस्यास्यमुपलक्षणां मंत्रेति अग्निर्ज्योतिरित्यादावुक्तमंत्रद्वयेत्यर्थः। ततइति एकैकैवमन्त्रद्वयस
विध्यानामित्यर्थः एतेन तदस्यैवेत्यादेर्गुणादृष्टविधिः कर्मान्तरविधौ अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेत्या
दौ मंत्रविध्योः सायंप्रातःशब्दाभ्यां बलेन तादृशयत्न याग्निहोत्रवाक्यविहितकर्मणि मंत्रविधेरेवाभावा
त्कृतन्तत्र मन्त्रवर्णोक्तदेवताग्निरितितयांकानिरस्तासमुच्चयमात्रविधित्वाद्येवमतितत्रविशिष्ट
कर्मान्तरविधेरत्रसक्ते मंत्रविध्योरग्निहोत्रवाक्यीयकर्मविषयत्वादितिबोध्यं। कर्ममात्रेति मात्रशब्देना २५
घारमिति द्रव्यमनूद्य तस्याघारणसंस्कारविधिरित्यस्मात्बद्धेदंतयाचधात्वर्थोघाघारणमेव विधी
यत इत्यर्थः। आज्येति। उक्तस्याघारणस्यानुह्वां गृह्णाति प्रयाजेभ्यस्तदिति वाक्ये यज्ञोहवं प्रया
जाज्यं श्रुतं तच्चतुर्गृहीतं वा इत्यनूद्य तस्याघारमाघारयेत्यनेन संस्कारतया विधानात्तेन षाकेन संस्का श्रीला॰ ७८
र्यस्य प्रयाजाज्यस्याप्राप्तेरित्यर्थः क्षरणेति प्राप्तस्याज्यस्य द्रव्यत्वादितिभावः तदिति ततक्षरणान्म

कर्तृत्वप्रवृत्तिनिमित्तीकृत्य भावघञन्तं तन्नामधेयत्वसंभवाद् इत्यर्थः। आधारपदस्येति शेषः। एवंकार
उक्तरीत्या समानपदश्रुत्या धात्वर्थविधानेन नामत्वोपपत्तौ आघारणाविधिवाक्यस्य संस्कृतद्रव्यपर्यन्तत्व
स्य प्रकरणेनोपांशुयाजे तत्तद्रव्यविनियोगस्य चतुर्गृहीतवाक्येन प्रयाजानुसंस्कारत्वेन यागेनाघार ५२
ण उपांशुयाजद्रव्यसंस्कारत्वस्य कल्पनमेतत् क्रियया वा प्रयाजानुसंस्कारादाघारणापेक्षया आघारवाक्ये आ
घारणानरं विधीयत इति कल्पनेनं चायुक्तमिति द्योतनार्थः। यदुक्तं संस्काराणां न नामधेयत्वमिति तत्राह-
दृष्टं चेति। अवश्यकाभ्यन्वा येनोपांश्वेतयोर् अपि नामत्वमिति भावः। केवलसंस्कारत्वमभ्युपेत्याह
मुक्तं यागत्वमप्यस्यास्तीत्याह न चेति संस्कारत्वमिति। संस्कारत्वपि चेत्यर्थः। सिद्धे इति। तथा च संस्कारप्रक
रणाद् उभयरूपत्वमिति भावः। ननु नामत्वे कथं द्वितीयान्तस्य तस्य करणार्थके धातुसामानाधिकरण्येना
न्वयबोधस्तत्राह अर्थाक्षिप्तेति। आसाधितस्य करणत्वायोगाद् धात्वर्थस्याक्षिप्तं साध्यत्वमस्तीति तदा
दायेत्यर्थः द्वितीयान्तनामधेयस्य धातुसामानाधिकरण्यमुपपद्यत इत्यर्थः। आक्षिप्तसाध्यत्वाभिप्रायेण
द्वितीयानिर्देशो न युक्त इति शंकते कथमिति। अथ्याहेनायाह साध्यत्वविशिष्टेव धात्वर्थेन शाब्द

शा॰ ७८ स्य शाब्दसाध्यत्वविशिष्टस्य नामार्थस्यान्वयः सामानाधिकरण्येन शाब्दधीः ननु तत्राग्निहोत्रं होमं
कुर्यादिति शाब्दाध्याहारेणान्वयोस्त्विति शंकां वारयितुमनध्याहृतेन चेति अध्याहारस्यानुपदमे
व दूषयिष्यमाणत्वादिति भावः धात्वर्थसाध्यत्वस्य शाब्दत्वमुपपादयति न हीति विधिवाक्य इति धा
त्वाख्यातसमुदायरूपे यजेतेति पद इत्यर्थः साध्यत्वे धात्वाख्यातयोरशक्तत्वान्न विधौ लक्षणे
ति न्यायाच्चेति भावः अध्याहारेण शाब्दत्वं दूषयति नापीति। वाक्यभेदमभिनयति अग्नीति। आर्थिक
शाब्दयोरन्वयमंगीकृत्यापि दोषमाह आर्थेति अन्वयः शाब्दान्वयः तथा सति उद्भिदादिवाक्ये करणभूते
पि क्रमेण अर्थाक्षिप्तसाध्यांशाभिप्रायेण गुणविधीयमाने श्रुत्यैव गुणस्य विधानं शक्यमिति योजना
प्राभाकरास्तु ज्योतिष्टोमेन यजेतेत्यादौ लिङादेः कार्ये शक्तत्वात् ज्ञानितं कार्यस्यावश्यं प्रवर्तकं कार्य
ता च कृतिसाध्यता तत्र कृतेर्विषयनिरूप्यत्वात् तदाकांक्षायां धात्वर्थ एव कृतावच्छेदकत्वरूपविषय
त्वेनान्वेति एवं कार्यं साध्यं भाव्यमिति पर्यायत्वात् भाव्यरूपापूर्वोद्देशप्रवृत्तकृतिलक्षणभावनायाः क्रि श्रीरामः ७८
यात्वात् करणापेक्षायां धात्वर्थ एव भाव्योद्देशप्रवृत्तकृतिव्याप्यत्वलक्षणकरणत्वेनान्वेतीत्याहुः

स्वन्मतमपि धात्वर्थस्य करणतया साध्यतया चान्वयनियमन्यायेनानिरस्तमित्याह एतेनेति किंविषयत्व
परः शाह्वः उत करणत्वपरः आहोस्विदुभयपर इति विकल्प्याद्यमाह विषयभूतेनेति। विषयवाचिना धा
तुनेत्यर्थः। करणत्वरूपविषयत्वयोः सिद्धसाध्यधर्मयोर्विरोधादिति भावः। ननु करणस्य शाब्द त्व२
त्वे हि विरोधाच्छाब्दविषयत्वेनानन्वयः। आर्थिकत्वानुनोक्तानुपपत्तिरिति शंकते आर्थिके नेति।
उक्तरीत्या करणत्वं विना कार्यनिष्पत्त्ययोगादिति भावः। दूषयति साध्यत्वमपीति। यद्यपि तन्मते करण
त्वमुपादानाख्यप्रमाणान्तरगम्यं न त्वार्थिकमिति वैषम्यमस्ति तथाप्युपादानस्य विध्याक्षेपरूप
त्वाद्यथा करणं विनानुपपद्यमानो विधिर्धात्वर्थस्य करणत्वमाक्षिपति तथा साध्यत्वं विना करण
त्वानुपपत्तेः साध्यत्वमप्याक्षिपेदिति तद्यौपादानिकं स्यादिति द्वयोरार्थिकत्वमौपादानिकत्वं वा स
मानमिति भावः। द्वयोरार्थिकत्वे का हानिस्तत्राह इति गुणेति विनैवेति सति हि करणत्वस्य शाब्दत्वे
उद्भिदा यागेनेति मत्वर्थलक्षणा स्यादेवं साध्यत्वस्यापि शाब्दत्वे उद्भिदा यागं यागेन च कार्यमिति वा
जपेयाधिकरणोक्तसारस्यप्रमाणवैरूप्यं स्यान्न त्वेतदस्ति द्वयोरप्यार्थिकत्वादतः सर्वत्र विना

शा-दी- ७२ नामधेयत्वं तु गुणविधिरेव स्यादित्यर्थः । द्वितीयं शंकते अथेति । विषयत्वद्वारेण विषयत्वबोधने न विष-
७२ यति रूपं कार्यमुत्पाद्य कार्यं शिक्षितकरणत्वपरः । उक्तं हि । कृतिमत्तमाध्यमध्यस्थो यागादिर्वि-
षयो मतः । कार्यसंघटिता कारककरणत्वेन सम्मत इत्यर्थः । दूषयति न तन्न इति यत्परः शास्त्रः स शास्त्रार्थ इ-
79 ति न्यायादिति शेषः । न चेष्टापत्तिः शास्त्रांतराधिकरणे तेर्विषयत्वस्य शास्त्रार्थत्वमुत्पादन-
विरोधादिति भावः । तृतीयं शंकते अथ शास्त्र एवेति । दूषयति कथमिति । उच्चारितः शास्त्र इत्यनु-
षंगः शास्त्रस्य विरम्य व्यापाराभावादिति भावः । तदभ्युपगमे दोषमाह अपि दधान इति । तेनापि
किं तत्राह मतमत्रेति । उक्तमिति विनैव मत्वर्थेत्यादावनुपदमेवोक्तप्रायमित्यर्थः । प्राभाकरनिराकर-
णमुपसंहरति अत एवेति । एवं पूर्वपक्षीयपरमतं निराकृत्य सिद्धांतिनं प्रकृतं पृच्छति अतः कथमिति ।
उत्तरमाह तदुच्यत इति । साध्यत्ववाचिन्या द्वितीयया करणत्वलक्षणया सामानाधिकरण्यमिति वक्तुं ल-
क्षणाबीजं संबंधमाह अग्नीत्यादिना इति प्रतिपद्यत इति वा नाम्नो धातुसामानाधिकरण्यं प्रापयती- श्री रामः
त्यर्थः । एतेन तस्य विधित्सितगुणस्य प्ररूढं प्रत्यायकं शास्त्रमन्यद्यस्य तदपि नाम स्यात् ॥ ॥ तथा । ७२

उद्भिदादिन्यायाविषयत्वार्थमाह कटेत्यादिना तत्राद्यविशेषणेनोद्भिदग्निहोत्रादेर्व्यावृत्तिः द्विती-
येन चित्रान्यायादेः ननु वाक्यभेदाभावे चित्राधिकरणपूर्वपक्षन्यायेन गुणविधिः स्यात्तत्र सिद्धा-
न्तसिद्धिरित्याशंक्य तन्त्वं भावनायां विशिनष्टि तद्व्यपदेशेति । सोऽत्र शास्त्रानुकरणं तत्र यस्मिन् गु-
णोपदेश इति पञ्चतत्पुरुषार्थकत्वं तद्व्यत्ययः विशिष्टोभिन्नार्थकः तत्रश्च तस्माद्विधित्सितात् गुणाद्भे-
देन निर्देशस्तद्व्यपदेशः स च तथा श्येन इत्यादिसादृश्यबोधकवाक्यशेषस्तद्धेतुरित्यर्थः श्येनेने-
ति । आदिनासंदंशो घोनाभिवरन्यजेतेत्यादिः पूर्वपक्षमाह अत्यं तेति । अवयवप्रसिद्ध्या वैशद्ध्या
यात्यं तद्देगुणोनि । शिष्टसोमगुणावरोधात्कथं तत्र । गुणविधिस्तत्राह काम्यत्वादिति गुणवि-
धेस्तस्य तस्मात् श्येनान्वयाद्वाक्यशेषानुपपत्तिरतो पहेति न यावश्येनविशिष्टस्य श्येनाङ्गत्वात्तदु-
पपत्तिरिति भावः श्येनपदस्याप्रसिद्धार्थो यागः ननु वाक्यशेषे यथा वै श्येनो निपत्यादत्ते एवम-
यं द्विषन्तं भ्रातृव्यं निपत्यादत्त इति विधेयकर्मणो निपत्यादानक्रियया श्येनसादृश्योक्तेस्तद्वि-
भिन्नगोणनामत्वमस्तु इति वाक्यभेदप्रसिद्ध्यर्थस्वीकारान्नाप्रसिद्धकल्पने साशंक्याह न चेति

श्येनात्मत्यपदिश्यगुणेत्यर्थः आतिदेशिकं (धूम) आदिनाऽधिकरणो कविरस्य जिद्धाङ्कसन्ति ४५

श्रा॰ ८०

आहितायथासंहंशेनआ्रदानमाहसाइत्यादिः असंतेति सिंहोमाणवकइत्यादौ सिंहशब्दः स्वार्थ
सिंहगतक्रौर्यादिकं लक्षयित्वा तद्वन्तं लक्षयतीति गौणपास्तत्र विशेषकर्षः लक्षणायां तु स्वार्थ
संबंधिनं पुरुषं लक्षयतीति नायं दोष इति भावः। गौणयातु एणलक्षणापूर्वकत्वे वार्त्तिककार
सम्मतिमाह लक्ष्यमाणेति वक्ष्यतीति तन्निर्दिष्टे पुंवार्त्तिककार इति शेषः। दोषान्तरमाह गौण
ते चेति। अन्यपरत्वेन मुख्यार्थस्य सर्वथा त्यागादित्यर्थः। लोहितेति यथा लोहितोष्णीषा इत्या
दौ लोहितशब्दस्य लोहित्यविशिष्टोष्णीषबोधकत्वेपि विशेषणीभूतलोहित्यविधिपरत्वं तथात्र
रूपेण शब्दस्य करणवाचि धातुसामानाधिकरण्योपलक्षणायाशेन विशिष्टयागबोधकत्वेपि वि
शेष्यांशस्य धातुनैव लाभाद्विशेषणीभूतस्वार्थविधिपरत्वेनैवेति स्वत्यनुग्रह इति भावः। सिद्धान्तमाह
उच्यत इति स एवेति ननु यागो विधेयस्यैव सत्यन्वयित्वादित्यर्थः। तत्तः किं तत्राह न स्यादेवेति मिन्न
योरेवोपमानोपमेयभावनियमादिति भावः। मा भूदुपमानं तत्राह इति तद्व्यपदेशोपेति इति द्वैतो यथा श्रीरामः ८॰
वैश्येन इत्यादि सा व्यपदेशः प्रागेव व्याख्यातः। ननु विशिष्टविधिपक्षे नोक्तानुपपत्तिः याग श्ये

नयोर्भेदात्तयागक्रियायामनिपत्यादानक्रियांतरत्वेननिर्देशस्यास्य हेतुमात्रेणोपपत्तेस्तत्राह वि
शिष्टेति। ननु गौरवं स्यो मा दाविवागत्यास्वीकार्येतत्राह नचेति विधिलाघवाय क्रियैष्टापि गौणी
क्रातिबाधश्च न दोष इति भावः॥ शयेनादन्यत्किंचिदपि पदस्यमिति सर्वनाम्नानिर्दिश्यत तत्र शये नसाम्या
केवींकाशेषस्य गोणनाम्नेवत्तात्पर्यमित्याह अवश्यं चेति सर्वत्रेति अर्थैषज्योतिरित्यादौ ज्यो
तिरादिशब्दानामपीत्यर्थः स चैतन्स्य गुणस्य व्यपदेशो यस्मिन् शयेनाज्यपदेन तदपि नामधेयं॥ ॥
नाम॥ ॥ यजेते तेत्यारव्यातमिति यज्यन्वितत्वत्यार्थइति यावत् तंत्रेणेति युगपदित्यर्थः तंत्र संबंध
नक्रियमाणे सर्वपूर्वस्य सर्वत्र संभवादाह सर्वाणीति। नन्वग्निहोत्र शयेनादौ तत्प्ररव्यथा स्त्रा
दयो गुणाविधिविरोधिन उक्ताः तत्कथं तेषामप्यत्रोदाहरणत्वं तत्राह सर्वेषामिति। सत्समुक्ता सत्था
पिनात्र सर्वेषां तेषामुद्धारः शंकानेकिंतु विशिष्टविधिपक्षे सर्वत्रोक्तमेतत्त्वर्थलक्षणाया एवान्यथा
करणे संभवतीत्यभिप्रायेण सर्वेषामुदाहरणत्वमुच्यत इति भावः। एवं च शयेनादावपि मत्वर्थ

शा॰ लक्षणाक्षेपात्संगतिः ननु भावार्थाधिकरणोक्तधात्वर्थस्य करणत्वेनान्वयस्यासादनात्करणस्य
८१ करणांतरासंभवात्कथं गुणफलाभ्यां तत्संबंधः पूर्वपक्षस्तत्राह कर्मत्वमिति तत्र हि व्युत्पाद्यं कर
स॰ ३ णत्वं प्रकृतिप्रत्ययसमभिव्याहारेण संबंधमात्रबोधनेपि संभवतीति न करणत्वप्रकारकबोधावश्य ता॰ २
81 कत्वेतिभावः साधारणं कर्मत्वकरणत्वोभयसाधारणं कर्मत्वकरणत्वान्यतरोक्तौ हि धात्व
र्थस्य गुणफलाभ्यां युगपत्संबंधो न स्यात्तत्त्वेन तदंशत्यजस्तदुपपत्तिरिति श्लोकं व्याचष्टे यदि हीति
तत्तत्कारकत्वोक्तौ तत्र संबंधासंभवं दर्शयति यत्नेनेति असमन्वयात्परस्परासंबंधात्करणत्वो
क्तौ तदसंभवं दर्शयति अथत्विति करणत्वमिति उभयोर्नेत्यनुषंगः अन्यतरवाचकाभावमुप
पादयति प्रकृत्येति संबंधमात्रेपि वाचकाभावस्तुल्यस्तत्राह तयोस्त्विति गम्यते वा कलक्षणा
येति शेषः ननु तथापि कर्मत्वेन करणत्वेन वा एकेन रूपेणान्वयः स्यात्तत्रावैतेनैराकांक्ष्यान्न श्रीएमः
त्राह नचेति विनिगमकविशेषाप्रतीतेरिति भावः ननु तथापि गुणफलयोः कारकयोरक्रियारूप ८१

यागे कथं संबंध इत्याशंका न साक्षात्तयोर्यागसंबंधः किं तु भावनाद्वारेत्यभिप्रेत्य संबंधसाधारण
त्वफलमाह अनन्यथेति उभयेति कर्मत्वकरणत्वेत्यर्थः द्वेधा यागसंबंधेन भावनाहेतुरूपेण द्वारा यागे
मनगुणफलयोर्यथायोग्यमन्वयमाह तत्रेति विनैवेति वैयधिकरण्येनैव यागस्य गुणेन संबंधा
दिति भावः तेन संबंधलक्षणवाक्यार्थमभिनयति वाजपेयेनेति सिद्धान्तयति अत्रेति नैकस्यापीति याग
स्य करणत्वेनाप्रतीतौ फलस्य करणापेक्षस्य संमुग्धतया भावनान्वितयागेनान्वयो न स्यात्करणाकां
क्षाया अशामकत्वात् एवं यागस्य साध्यत्वेनाप्रतीतो करणत्वेनोक्तस्य गुणस्य साध्यापेक्षिणस्तत्रा
नन्वयः भाव्याकांक्षाया अशामकत्वादित्यर्थः तद्विशेषेति कर्मत्वकरणत्वान्यतररूपसंबंधविशे
षेत्यर्थः ननु संबंधसामान्यावगमेऽपि तस्य विशेषपर्यवसानाभवश्रयेभावाद्गुणफलसंबंधस्यात्तत्राह
श्रुत्येति शाब्दस्यार्थिकेनानन्वयादिति भावः अस्तु तर्हि संबंधसामान्येनैव भावनान्वितेयागे गुण
फलोभयान्वयस्तत्राह तेन तद्धीति। फलगुणयोर्मध्ये एकस्यापीत्यन्वयः फलस्य यागानन्वयमुप
पादयति फलस्येति गुणस्यतमुपादयति तथेति अनिर्धारितेति यागकर्मकत्वयागकरणकत्वरू

सा॰ ८२

येणानिर्धारितंभावनासामान्यमित्यर्थः अयोग्यत्वात् आकांक्षाविरहेणान्वयानर्हत्वात्फलि
तमाह नत्वेति वाचकविभक्त्यभावात्कर्मत्वाद्यन्यतरस्तीति नघटत इति शंकते कथमिति अतिबंधा
ष्ठत्वान्विवक्षांपरिहरति नसामान्येति पूर्वापेक्षीसंबंधसामान्यावगमं शंकते समभीति लक्षणायेति स
मभिव्याहारगम्यः सर्वोपि लाक्षणिको वाक्यस्य वाक्यार्थेलक्षणेतिसिद्धान्तादिति भावः नत्वाकांक्षि
तकरणत्वादिविशेषएवलक्षणीयोनत्वनाकांक्षितसामान्यमित्याह नतत्वइति कर्मत्वंकरणत्वं
वालक्षणीयमितिस्वविनिगमकमाह एकं नरेति विनाविशेषंपदान्तरानुपपत्तेरितिभावः तामेव दृष्टा
गुक्त्वास्मारयति नहीति उक्तमिति अनिर्धारितोभयेत्यादिनेति शेषः एवंप्रथमश्लोकस्यपूर्वार्धं
व्याख्याय विशेषपरत्वपर्यवसायमुत्तरार्धं व्याचष्टे तस्माद्विशेषेति शब्द इति शेषः द्वितीयश्लो
कंव्याचष्टे उभयेति आवृत्तिमिति यजेरिति शेषः लभ्यत इति उभयमिति शेषः अलाभमुपपादयति
नखल्विति तथाचैकस्य शब्दस्य सिद्धत्वसाध्यत्वरूपकरणत्वकर्मत्वलक्षणविरुद्धद्वयबोधन श्रीरामः
व्यापारद्वयाभावाद्वाक्यभेदः स्यादिति भावः उभयपरत्वे दोषान्तरमाह एवमिति साधनस्य साध्यार्थत्वा ८२

छेषत्वारंभगुणत्वं साध्यस्य शेषित्वाख्यं प्राधान्यं तत्र च प्राधान्यं क्रतुद्देश्यत्वाधीनत्वाउद्देश्यत्वापादकमप्राप्तस्य चोद्देष्टुमशक्यत्वात् प्राप्तस्तु
कीर्तनरूपानुवादापादकमुद्देश्यत्वं एवं विशेषत्वमपि पारार्थ्यरूपत्वात्

सारार्थरूपोपादेयत्वापादकं तच्च विध्यधीनत्वाद्विधेयत्वापादकमिति एवं साधनत्वे गुणत्वोपादेयत्व
विधेयत्वात्मकमेकं त्रिकं साध्यत्वे प्राधान्योद्देश्यत्वानुवाद्यत्वरूपमपरं त्रिकं न च परस्परविरुद्धमतो
याग एकेन वाक्येन गुणतयोपादातुं विधातुं प्राधान्यतयोद्देष्टुमनुवदितुं च न शक्यत इत्यत्रापि वा संभि
घेतेति भावः। नन्वक्रीयायागस्य कर्मत्वकरणत्वाभ्यां भावनया संबध्यमानत्वाद्गुणफलसंबंधेहि
यागकरणकत्वेन यागकर्मकत्वेन च द्विरूपायां भावनायां फलकरणोभयाकांक्षायां यागकरण
कत्वांशे फलस्य न त्वकर्मकत्वांशे च गुणस्य यागपदान्वये यागस्योक्तवैरूप्यं स्यात् न साक्षादेव यागस्य
गुणफलसंबंधे तु न्यायदोष इति भावनादृष्टांतेन शंकते भावनावदिति दृष्टांतं विशदयति यथेति आ
ख्यातेति भावनात्वरूपेणेत्यर्थः साध्येनेत्यर्थः साध्यादिभिः फलकरणेतिकर्तव्यताभिः संबंधमभि
इदमिति नयति इदमिति फलस्याभिनयः अनेनेतिकरणस्य इत्थमितीतिकर्तव्यतायाः यागेतियागत्वेनेत्यर्थः नेद्र
क्रियात्वकारकत्वाभ्यां वैषम्येण दृष्यति नेति। अक्रियात्वात् यागस्येति शेषः वैषम्यमुपपादयति
भावना हीति अक्रियारूप इति कारकरूपत्वादिति भावः कथमिति क्रियाया एव कारकान्वयनियमा

शा॰
८३

83

दिति भावः फलितमाह तदिति तस्मात्कारकसंबंधासंभवादित्यर्थः अरुणेति यथारुणस्यैकहायन्याः
स्वकारकत्वान्मत्वर्थलक्षणया सामानाधिकरण्येन क्रयान्वयेन द्रव्यपरस्यारुणान्वयस्तथेत्यर्थः। तर्हि
स्वरूपेणभावनयासंबंध्यतद्रूपगुणफलसंबंध इति प्रागुक्तामेवाशंकामनूद्य प्रागुक्तमेव परिहारं स्मा
रयति तदा दादिपभावनासंबंधोपीत्यादिना स्वरूपेण यागत्वसामान्यरूपेणेति तत्र हेतुमाह कारकं हीति कार
कमेवेत्यर्थः यद्यपि कारकस्यैव क्रियासंबंध इति न नियमः मातुः स्मरतीत्यादौ व्यभिचारात्तथाप्यधीगर्थद
येशां कर्मणीति कर्मणः शेषत्वविवक्षायां षष्ठीविधानात्संबंधसामान्येन तत्रान्वयेपीह धातुप्रत्ययस
मभिव्याहारस्य संबंधसामान्ये विधानाभावात्तल्लक्षणाया अपि भावेपेक्षितकरणत्वादिविशेषलक्षणैवन्या
य्येति भावः तेनेति तत्रेण्योभयसंबंधाभावादेव व्याधिकरण्येन गुणविध्यसंभवेनेत्यर्थः तेषामिति मतइति
शेषः इदमधिकरणमनुपपन्नमिति संबंधः अनुपपन्नं वक्तुं धात्वर्थस्यैव क्रियात्वं तत्तावद्धारयति काष्ठे
दिति अप्युपगंतव्यमिति अक्रियात्वे कारकान्वयायोगादिति भावः किं ततस्तत्राह अतश्चेति अनुपपन्न
मिति गुणविधित्वे बाधकाभावान्नामत्वमुत्सादनमत्र न स्यादित्यर्थः बाधकाभावमेव दर्शयति न

श्री एण॰
८३

चेति अपि नामसिद्धत्वसाध्यत्वकृतं वैरूप्यं समुच्चयः गुणेति यागे गुणस्य यागस्य च फले विधौ हि वै
रूप्यं नेदानीं गुणविशिष्टयागस्य फलेविधानादित्यर्थः न च गुणवैशिष्ट्यसार्थमत्वर्थलक्षणापीत्याह
न चेति कारकविभक्त्या वा न्यपेयेनेति तृतीययाश्रुत्याश्रवणात् न चतन्मते धात्वर्थस्य क्रियात्वे फलं प्र
ति करणत्वोपगमात् गुणान्वयाय मत्वर्थलक्षणा स्यादेवेति वाच्यं यागस्य कार्ये निष्पन्ने पेक्षति साध्य
त्वस्यापितेः स्वीकारात् साध्यत्वरूपेण गुणान्वययोग्यत्वान्न लक्षणेत्यत्र तात्पर्यात् अतः अधि
करणानारंभप्रसंगात् आश्रयणीयमिति परैरपीति शेषः न केवलमिति एवाक्रियात्वं किं तु
पपुत्साहीत्याह युक्तं चेति स्यादिति न चेष्टापत्तिः प्रयोगादर्शनादित्यभिमानः वस्तुतस्तु कर्तृकर्म
णोः कृति कर्तृकरणे कृता बहुलमित्यादिसूत्रात्कृदंतस्थलेपि कारकान्वयेन तथा प्रयोगस्ये
ष्टत्वादिति बोध्यं ननु धात्वर्थसामान्यं क्रियेति वक्ष्यमाणत्वात् क्रियात्वं धात्वर्थस्य तत्रापीष्टमि
ति तत्राह तेनेति अक्रियात्वेनेत्यर्थः नाभिधीयत इति संबंधः अयमर्थः यजेत स्वर्गकाम
इत्यत्र यागेन स्वर्गं भावयेदिति बोधस्तत्र स्वर्गस्य भवितुर्भावकः पुरुषस्तस्य स्वर्गभवनानुकूलो व्या

पारोभावना सचाग्नेयादिप्रधानयागलक्षणः प्रयाजादीतिकर्तव्यतालक्षणश्च एकफलावच्छिन्न
पूर्वापरीभूतव्यापारनिचयस्यैकक्रियात्वात् तत्र प्रधानभूतव्यापारः स्वर्गोत्पादनानुकूलव्यापार
निचयांतर्गतत्वेपि क्रियारूपभावनात्वमस्त्येव तेन रूपेण यजिधातुना बोध्यते तथा नानुभवा
त् किंतु यागत्वेन रूपेणाख्यातेन तु क्रियारूपभावनात्वेन बोध्यते तत्र भावनात्वस्य यागसा
धारण्येपि तदंशस्य यागत्वरूपेण धातुनैव लाभात्तं विहाय प्रयाजादीतिकर्तव्यतांश एवाख्याते
न भावनात्वसामान्यतो बोध्यते विशेषतस्तु समिदादिवाक्यैः एवं च यागस्य धात्वर्थत्वेपि वस्तुग
त्या क्रियात्वसत्वेपि क्रियात्वेन धातुनोपात्ततेन तत्र कारकान्वय इतीत्यनभिधानरूपहेत्वर्थक
इति शाब्दः धात्वर्थस्य क्रियात्वेपि धातोस्तद्वाचित्वे शाब्दशक्तिवैचित्र्यं दर्शयति यथाहीति । नका
रके शितिक्रियात्वेनानुपात्ततेति विशेषः नन्वाख्यातमात्रार्थत्वे भावनायास्तत्पर्यायत्वे भावना
क्षिपेत्यादिपदानां न स्यादितीष्टमित्याह भावनादीति अविकलस्येति पूर्वापरीभूतत्वघटितस्ये श्री रामः
त्यर्थः अन्यूरेति अन्नोत्पादानुकूलत्वलक्षणभावनात्वबोधकत्वमात्रेणेत्यर्थः पर्यायत्वप ८४

यपि लत्वप्रसिद्धिः एवं च लडादिष्वाख्यातस्य भावनानभिधायित्वमिति यत्प्रभाकरमतं तद्येन तदधिकरण
भेदेनैव निरस्तमित्याह तेन लडितिम ननु यत्र प्रधानभूतकार्याभिधायकं लिङाद्यस्ति तत्र कार्यवि
शेषणतयाभिधीयमानभावनयैव कार्यान्वयो न धात्वर्थेन यत्र तन्नास्ति पचतीत्यादौ न तत्र धात्व
र्थरूपक्रियया कारकान्वयः एवं च वाजपेययागे कार्यविशेषणीभूतभावनासत्त्वात्करणस्य धा
त्वर्थान्वयात्प्रसक्तिरित्यत आह भवतीति अत्रापीति पचतीत्यादावित्यादिः सुतरामिति प्रकृ
त इति शेषः धात्वर्थस्यानुपसर्जनतया पदोपात्तत्वात्तत्रैव कारकान्वयो न्याय्यः ननु प्रकृतयागे
कार्यविशेषणीभूतभावनायां तथा चात्र गुणविधित्वमेवापस्याधिकरणानुपपत्तिरित्यर्थः किं च
धात्वर्थस्य क्रियात्वे तत्समानाधिकृतनामधेयानां तत्तोयां तन्नान स्यात् क्रियायाः करणत्वाभाव
नत्तदभेदान्वयानुपपत्तेः मन्मते तु धात्वर्थस्य करणत्वात्तदुपपत्तिरित्याह अपि चेति अत्र त्वन्मते धा
र्थक्रियात्वं नास्तीति सूचयितुं लडादिभिरित्युक्तं वाजमिति वाजमन्नमवरुन्द्धे ते घायजुमिश्चतिन
हीति धात्वर्थस्य क्रियात्वे हि तदभिन्नस्य नामधेयस्य न करणत्वे धात्वर्थ एव धात्वर्थकरणमि

शा॰प्र॰ त्युक्तं स्यान्नलिङ्गं संभवतीत्यर्थः तमाहरत्तेनायजतेति नेष्टं हृदयेन स प्रजापतिस्तु प्राधावत्तस्मा ए
८५ तमेकविंशतिरात्रं प्रायच्छदिति पूर्ववदुक्तेनैकविंशतिरात्रमर्थः अत इति यथा वैदिकप्रयोगबलादश्व अपरार
85 वैस्यलिङ्गादिवाच्यत्वं तथा यो अश्वमेधेन यजत इत्यादि वैदिकप्रयोगबलात्सर्वो स्यात् नोभावना
वाचित्वं स्वीकार्यमित्यर्थः विपक्षे न स्यात्तमेव सत्त्वोक्तं बाधकं स्मारयति तथा हीति प्रयोजनं पूर्वपक्षे
दार्शिकधर्मप्राप्तिः सिद्धान्ते सोमिकधर्मप्राप्तिः सर्वेनामधेये नामधेयत्वेन संभाविते वाजपेयपा
दे वाजादिगुणस्य श्रुतेस्तस्यैव विधानं॥ ॥तद्गु॥ ॥वाजपेयशब्दवदाग्नेयशब्दोपि नामेत्यु
त्थितेः संगतिः पूर्वपक्षमाह तत्रेति वाक्यभेदेति विशिष्टविधाने वाक्यभेदाभावेपि विशेषणेषु नैकेषा
क्षेपलभ्यविधिभेदाद्वाक्यभेदः गौरवभिया कारणं नाष्टव्यमिषोवाक्यभेद इति भावः ननु नाम
त्वमपि नामार्हकर्मोपनीतेस्तत्राह अष्टेति अष्टाकपालद्रव्यस्य भावनायां विनाधात्वर्थानु
रागं करणत्वासंभवात्तद्द्रव्यकं किंचिद्धात्वर्थे विशिष्टविधाने वाक्यभेदाभावेपि भावनागम्यते॰ श्रीरामः
सच धात्वर्थः शिरो वा एतद्यज्ञस्य यदाग्नेयो हृदयमुपांशुयाजः पादावग्नीषोमीय इत्यर्थवादेउ ८५

यांश्रुयाजादिसमभिव्याहाराद्यागरूपः स एव नामाहेत्यर्थः। तत्र प्रवृत्तिनिमित्तमाग्नेयदेवतालाभमाह
तस्य लिप्सेति क्रमादिति वाजसनेयिशाखायां प्रथममाग्नेयस्य पश्चादग्नीषोमीयस्याम्नातत्वेन न च क्र
मेण याज्यानुवाक्यासु पुरःपाठादस्ति क्रम इति भावः। मांत्रवर्णिक इति मंत्रवर्णोत्थबलोपस्थितेः। प्रा
गुक्तविशिष्टविधिगौरवान्न देवताविधिक्षम इति भावः। सिद्धांतमाह उच्यत इति श्लोकस्याद्यपादं व्या
चष्टे नहीति अष्टाकपालद्रव्यकर्तृकभवनमात्रप्रतीतेरित्यर्थः। ननु भवनेनाक्षिप्यते भावकव्या
पारस्तस्य मंत्रापेक्षेत्याशंक्य द्वितीयपादं व्याचष्टे समत्यामपीति पुरोडाशोत्पत्तेः प्रथमं पुरोडाशं कूर्मं
भूतं सर्पतं मितिवाक्यशेषबलब्रह्मकूर्मीकारनिर्माणविषयेत्यर्थः। अयोग्यत्वादिति देवतोद्देशकद्रव्य
त्यागरूपयागस्यैव देवतान्वययोग्यत्वादन्यत्राग्निर्मूर्धेत्यादिदेवताप्रतिपादकमंत्रस्यायोग्यते
त्यर्थः। नन्वंशुयाजादिसमभिव्याहाराद्यागत्वावगतिरुक्ता तत्राह यदीति उक्तार्थवाक्यगतस्या
ग्नेयशब्दस्य नामत्वे सिद्धे तदभिधेयस्य यागत्वसिद्धौ च मंत्रान्वयान्मांत्रवर्णिकदेवताप्राप्त्या न
श्वव्यन्यायेन नामत्वसिद्धिरित्यन्योन्याश्रय इति भावः। नन्वाग्नेयो यागत्वानवगमेप्याघारवन्मं

सिद्धिसार

श्रा.प्र.
८६

आग्नेयात्तदवगतिरित्यत स्तृतीयं पादं व्याचष्टे नचेति चतुर्थ्या कुर्वन्नग्निहोत्रे वेष न्ययमा
ह अग्नीति आग्नेनिक इति अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति वचनस्त्वा
दिति भावः यागान्तरं यागत्वावगमात्तत्र मंत्रवर्णाद्देवतालाभासंभवाद्ध्रौ एवम् अंगीकृत्या
ग्नेयशब्देन देवताविधिः स्वीकार्य इत्यर्थः ननु तथापि कथमत्र यागसिद्धिरत्राह देवतेति आ
ष्टाकपालादेव्याग्निदेवतासंबंधस्यैव यागकल्पकत्वादिति भावः । अत एव न द्रव्यदेवतोभयवि
धानप्रयुक्तवाक्यभेदप्रसक्तिः विशिष्टयागविधौ विशेषणविधीनामार्थिकत्वाच्छ्रूयमाणविध्या
द्यभावादित्याह विशिष्टेति आक्षेपलभ्यविधिभेदगौरवं च प्रकृते अगत्या स्वीकार्यमिति भावः
प्रयोजनं पूर्वपक्षे त्वाग्नेयं पयो भवतीत्याग्नेयशब्दस्य कौण्डपायिनामयनगताग्निहोत्रशब्दवद
तिदेशकतया चोदनालिंगापेक्षया प्रबलेन नामधेयेन गुणाशधर्मप्राप्तिः सिद्धान्ते नामत्वासं
भवाद्समिति नामनिमित्तातिदेशो देवतासामान्यापेक्षया प्रबलेन द्रव्यसामान्येन सान्नाय्य
धर्मप्राप्तिः तत्रेसयागो द्रव्यदेवतात्मकरूपो चाव धीयेरन्निति विधानार्थे लिङि यागस्येव द्रव्य

श्रीभाम:
८६

सैव देवताया एवं वा विधानमिति विशेषाभावात् इहं च सर्वविधानं विध्यंतरेणातेषां विधानाभा
वे त्वश्यविधेयत्वात् ॥ ॥बर्हिः॥ ॥ द्रव्याणामविचारस्य कर्मणामविचारप्रस्तावासंगति
माशंक्याह कर्मेति पूर्वत्र पुरोडाशादिविषयाग्नेयशादिविचारात्तत्प्रसंगेन पुरोडाशशब्दस्य
तत्तुल्ययोगक्षेमतया बर्हिराज्यशब्दयोश्च बुध्यारूढत्वात्तत्संगिकी संगतिरित्यर्थः अ
ग्निमाधिकरणे सेन्द्रपवादेन वनदाग्निमाधिकरणस्यतद्दृत्तिदेशत्वेन च प्रवृत्तेस्तयोरपि कर्मवि
चारप्रस्तावसंगतिः पृथक्त्ववाच्यत्याशयेनैतदधिकरणस्यैव कर्मनामविचारसंगतिरुक्ता बर्हिरिति
बर्हिषि हवींष्यासादयति आज्यस्यैव नावुपांशुधानाः करंभः पुरोडाश इत्यादौ श्रुतानामिति शेषः
संस्कृतेषु लवनविलापनग्रथनरूपसंस्कारवत्सु शास्त्रस्थेत्यनेन वक्ष्यमाणपूर्वपक्षे हेतुरिहे
व बुद्धिसांकर्याय सूचितः जातिमात्र इति च जातेरव्यभिचाररूपः सिद्धांतहेतुः सूचितः प्रभुक्ताना
मिति बर्हिरादाय गावो गताः आज्यं क्रयं पुरोडाशेन मे मातामहेलकं दत्तानीत्यादाविति शेषः नि
मित्तताप्रवृत्तिनिमित्तकतानतुकथं संस्कारविचारकोटिः तत्र हि बर्हिर्लुनाति आज्यं विलापय

शा॰टी॰
८७

87

तिपुरोडाशं श्रपयतीत्यादिविधिषु सत्सु बर्हिरादिशब्दस्य संस्कारविचारत्वेन तदर्थकबर्हिरादिशब्देन च
बर्हिरादिषु देशे संस्कारविधिः संस्कारविधौ च सति तदर्थकबर्हिरादिशब्देनोद्देश्य इत्यन्योन्याश्रयादिस
न उक्तं स्यादिवदिति यथा यूपं तक्षतीत्यत्र यूपीकर्तुं तक्षतीति वचनव्यक्तौ किं तक्षतीत्यपेक्षायां पला
शं छिनत्तीत्यप्रकृतपलाशान्वयात्पलाशं तक्षति यूपीकर्तुमिति वचनव्यक्तेर्नोन्योन्याश्रयस्तथे
हापि दर्भैस्तृणीत बर्हिरित्यादौ दर्भादेः प्रकृतत्वाद्दर्भैर्लुनाति बर्हिः कर्तुं घृतं विलापयतीत्याज्यं
कर्तुं पिष्टं पाचयति पुरोडाशं कर्तुमिति वचनव्यक्त्याश्रयणान्नोक्तदोष इति भावः पीत्विति पी
त्वादिषु केवलशास्त्रस्य प्रसिद्धिरस्त्ववालादिषु याज्ञिकप्रसिद्धिरित्याशयेनोभयोपादानं शास्त्र
स्य प्रसिद्धेर्बलवत्त्वे युक्त्यन्तरं सार्वलौकिकत्वमिति शास्त्रस्थैः सर्वदेशेषु संस्कृते प्रयोगादिति भावः क
तिपयेति अशास्त्रस्थैः सर्वदेशेषु ज्ञातार्थप्रयोगादिति भावः अन्वयेति जातौ सत्यां सर्वैः प्रयोगाद
सत्यामप्रयोगादसत्यामप्रयोगाच्चेत्यर्थः व्यभिचारादिति संस्काराभावेप्यशास्त्रस्थैः प्रयोगादित्य
र्थः अनेनैवाभिप्रायेण श्लोकं व्याचष्टे नहीति ननु स्मृतिपादे शास्त्रस्य प्रसिद्धेर्बलवत्त्वोक्तेस्तथा

श्रीरामः
८७

चाशास्त्रस्थप्रसिद्धेर्बाधाल्कथंजातिवाचितात्तत्राह नचेति बलवत्वेप्यविरोधान्न बाध्यबाधकते
तिभावः ऽउक्तमिति संस्कृतेष्वपि जातेरनपगमात्तन्निमित्तातिक्रमो न प्राप्त इति वार्तिक इति शेषः न
नु केवलजातेः शास्त्रस्थैरप्रयोगाद्विरोधोऽस्त्येव तत्राह नचेति नहीति नहि शक्तः शब्दः सर्वैः शास्त्रे
प्रयोक्तव्य इति नियमोऽस्ति आलस्यादिनाप्यप्रयोगसंभवादिति भावः अतस्तदप्रयोगमात्रान्नवि
रोध इत्यर्थः प्रयोजनं पूर्वपक्षे बर्हिषामप्रणवदमवस्तरणातीति पूपावदवस्तरणार्बर्हिषि समंत्रकलव
नादयः आज्येनपूपमनक्तीति पूपांजनार्थे आज्ये विलापनावेक्षणादयः सो हि एणपुरोडाशादौ समं
त्रकलवनादयः आज्येनपूपमनक्तीति पूपांजनार्थे आज्ये विलापनावेक्षणादयःऽउ प्रथनादयश्च
कार्याः सिद्धांते नेति मन्त्रे संस्काराभावेपि बर्हिराज्ययोः प्रयोगाद्बर्हिराज्यशब्दः संस्कारव्यतिरि
क्तजातिवाचकः पुरोडाशवृत्त्या हसेद मुपलक्षणं ॥ ॥प्रोक्ष॥ ॥दर्शपूर्णमासयोः प्रोक्षणीरासाद
येति श्रुतः प्रोक्षणीशब्दः किमुत्पवनादिसंस्कारनिमित्तःऽउतोस्वजातिनिमित्तःऽउत यौगिकः सेच
नक्रियानिमित्त इति संशये पूर्वोऽधिकरणपूर्वपक्षरीत्या संस्कारनिमित्तत्वपक्षं तावदाह प्रोक्षणीरिति

शा·प्र· वेष्वपीति पूर्वाधिकरणस्थपक्षवदित्यर्थः अनेनाऽपवादिकी संगतिः सूचिता तत्सिद्धांतरीत्याहितो यत्पक्ष
८८ माह प्रागमयोघेति क्वचिद्विषिद्देशविशेषे प्रोक्षणीभिरुद्धे जिता स्म इति प्रयोगादित्यर्थः ननु प्रक्रु
४४ र्वन्तु स्मेचन इति धातोः प्रकृष्टोक्षणसाधनत्वाप्रतीते यौगिकत्वमेव न्याय्यमिति सिद्धांतमाशंक्या
स्वप४ ह नचेति बलीयस्त्वमुपपादयति अवयवशक्त्युपस्थापितावयवार्थद्वारेत्यर्थः विशिष्टेति एकावय
वार्थविशिष्टापरपदार्थप्रतीतिरित्यर्थः लाक्षणिकीत्यन्वयः तत्र दृष्टांतः वाक्यादिति वाक्याज्जायमा
नापदार्थनिमित्तावाक्यार्थप्रतीतिरिवेति योजना अयमर्थः लाक्षणिकी हि प्रतीतिः शक्त्युपस्था
पितमुख्यार्थरूपपदार्थनिबंधना एवं च वाक्यार्थप्रतीतिरपि शक्त्या तत्तत्पदोपस्थापितपदार्थनिबंध
नत्वाल्लाक्षणिकी तत्समानयोगक्षेमा यौगिकार्थप्रतीतिरपि लाक्षणिकी शक्त्या अवयवोपस्थापि
तावयवार्थनिबंधनत्वादिति अत्येति पदं श्रवणमात्रनिबंधनत्वात् क्लृप्ता प्रतीतिर्बलीयसीत्यर्थः सि श्रीराम:
द्धांतमाह रूढिरिति ननु तत्रापि प्रयोगाद्रूढिस्तत्राह तत्रैवेति अस्याः रूढेः नचावयवार्थसत्वेपि पंक ८८
जादिष्विव योगरूढिरिति शंक्यं पंकजनिकर्तृत्वेपि पद्मभिन्ने प्रयोगाभावात् प्रोक्षणशब्दस्य चास्व

जात्यभावेप्याज्यंप्रोक्षणमितिप्रयोगाद्दुष्टमस्यादिति भावः। अवयवार्थाभावे रूढिरित्यत्र दृष्टां
तः यथेति उपपन्नत्वादितिप्रयोगप्रत्ययपयोरितिशेषः संनीतिप्रयोगस्तु प्रागेवदर्शितः नन्व
वयवार्थस्यघृतादिसाधारण्यात्कथंप्रोक्षणीशब्दस्यां बुद्धिहेतुत्वंतत्राह स्त्रीति एतेषां चतुर्णा
मपिश्लोकानांवक्ताख्यव्यहृत्त्वविशेषत्वाल्लक्षणानुसारेण द्वितीयचतुर्थपादयोर्गुरूपोत्तमत्वेबाध्यं
प्रयोजनेनविकृतोसोमारोद्ध्वर्यवाज्यप्रोक्षणमितिविहिते आज्यपविकृतः प्रोक्षणीरासादयेतिमं
त्रः प्रयोज्यः संस्कारवाचित्वेजातिवाचित्वेतुआज्यमासादयेतिविकृतः यौगिकत्वेप्रोक्षणमासा
दयेतिलिंगवचनविकृतः॥ ॥तथा॥ ॥अस्पष्टमितिदेशलायपूर्ववत्पूर्वपक्षद्वयंसिद्धांतंचदर्श
यति निर्मथ्यस्येतिनिर्मथ्येनेष्टकाः पचंतीत्यत्रोष्ठपृक्ष्येतिशेषः संस्कारेतिजातेयजमानोभि
प्राणितिजातमध्वर्युरंजलिनागृह्णातीत्याधाधानाहिअकरणाश्रुतसंस्कारेत्यर्थः अव्यभिचारा
दिति अस्संस्कृतेपिनिर्मथ्यमानयपक्ष्यामइतिजातिमात्रे कृविद्धयोगादित्यर्थः प्रसिद्धेतिनि
रूपस्यघ्रातंमथ्यतेः केहलोणीतिनिष्पत्तिवृत्तान्तस्यायोगान्निर्मथनार्थकत्वादित्यर्थः सर्वेणगता

श्रा॰दी॰ ८९ र्थत्वमाशंक्याधिकाशंकामाह विशेषस्त्विति पूर्वं निष्पन्निदर्शायां मथनकर्मत्वं भूतमासीत्तत्रागति

माश्रित्य निष्पन्नेऽपि प्रयोगमाशंक्याह नचेति निष्पन्नाग्निव्यक्तिभेदान्नोक्तगतिरित्याह प्रति

89 क्षणमिति अधिकतुषकाष्ठादिव्यापनप्रयुक्तपरिमाणभेदेन तदधीनज्वालाभेदप्रयुक्तपरिमा

णभेदेन चाग्निव्यक्तिभेदादित्यर्थः संतानेति प्रतिक्षणं व्यक्तिभेदेऽपि संतानैक्यान्मथननिष्पन्ना

ग्निसंततिपतितत्वादेकतामापाद्य भूतपूर्वगत्याप्रयोग इति भावः एवं च निर्मथ्येनेष्टका इत्यत्रा

ग्नेः सामर्थ्यादेव प्राप्तत्वान्मथनमात्रविधिरिति मथनस्य प्रयोगमध्ये करणं सिद्धान्तप्रयोजनेन स

त्रेतथाप्रोक्षणीष्विव ॥ ॥वैश्व॥ ॥चातुर्मास्यकर्मणश्चत्वारि पर्वाणि वैश्वदेववरुणप्रघाससा

कमेधशुनासीरीयाख्यानि तेषु प्रथमम् इत्यर्थः वैश्वदेवशब्दस्य देवताविशिष्टद्रव्यवाचित्वेऽपि द्रव्य

विशेषाश्रवणादाग्नेयमष्टाकपालमित्यादिवाक्योक्तस्य प्राप्तत्वाच्चोपसर्जनदेवतामात्रविधा

नान्न द्रव्यदेवतोभयविधानेन वाक्यभेदः ननु स्वपूर्वत्रोपसर्जनमंथनविधिवदत्राप्युपसर्जनदे श्रीरामः

वताविधिरित्युत्थितेः संगतिः एतत्संगतिलोभेनैवेदं कर्म नामचिन्ताप्रकरणेन कृतं एवं चामिक्षा ८९

देव १

यांनिश्चदेवताकत्वस्योपसन्निपात्कं देवताप्रमेयत्वातिरिक्तेषु समस्तेव हविष्युदेवताविधिरिति ध्येयं·
किंचेति देवतानद्धितस्य सूक्तहविषोर्वार्त्तिककारेणनियमितत्वेपि कृष्णत्वस्याग्नेयस्याज्यभा
गस्येत्साज्यभागयागादौत्रयोगदर्शनेनतद्धितिकस्याग्नेयकत्वाभिप्रायत्वाद्देवतानद्धितानस्य·
यजिसामानाधिकरण्यायोग्यपन्निशिति भावः पूर्वपक्षमाह नचेति अविधेयत्वादिति विधेयधात्वर्था
वच्छेकत्वेनस्वयंविधानर्हत्वादित्यर्थः अरूपत्वेनेति अव्यक्तत्वेनसौमिकरूपस्याग्निमहत्त्वाये
पूर्वपक्षः गुणपदमात्रस्यवेणोपिप्रकरणात्मकतेकर्माणिगुणविधिरिति ज्ञातुं शक्यत्वादिति तोः यत्व
पात्नयग्रहमात्रार्थत्वेनानर्थकसामान्याद्युक्तं सम स्तोति ननु यजिनानूद्यमानप्रकृतयागानां देवता
नरविशिष्टत्वेनबुद्धिस्थत्वात्कथंतत्रदेवतानांतरविधिरितिशंकते अग्नीतिनिष्कृष्यस्वरूपमात्रानुवा
देनगुणविधिरितिपरिहरतिविकल्प्येति ननु सक्तो देवताविशिष्टानामेवबुद्धिस्थत्वेनानुवादार्हत्वा ना२
उक्तनिशिष्टगुणस्यचप्राबल्यान्नविषमशिष्टेनविकल्पोयुक्तइत्याशंक्याह नचेतिकथंचिन्नभिन्नेति·
व्युत्पादितमित्यर्थः तेनचित्राधिकरणेभाष्येतद्व्यवहारेपिनव्युत्पादनपरत्वमित्यदोषः अतोत्रैव

शा·टी· युत्साघत्वात्सर्वपक्षे विकल्पो ऽनुपपत्तिरिति भावः न त्विति नैव न देशैव व्युत्साघं गुणाधिकरणेतु चतुर्थी
९० नबलाबलमिति शंकां ऽत्रात्रासन्निशिष्टप्राबल्ये स्थितेनत्रो ऽसत्तु सन्निशिष्टामिक्षा वाजिनयोः स
मबलत्वं सर्वपक्षायोगादिति भावः गुणाधिकरण एव व्युत्साघमुत्पत्तिशिष्टप्राबल्यमंगीकृत्यैव हेतु
तंतरेण सर्वपक्षपक्षपतितिरित्याशयेन परिहरति आनर्थक्येनेति तदेव विवृणोति वक्ष्यतीतिमिमं दृष्टां
तमाह स्यादेतदिति समुदायीकरणेनेति यजेतेत्येकेन पदेनान्यसमुदायीकृत्यैकसंज्ञासंपा
दनेनेत्यर्थः अर्थवत्त्वमेवोपपादयति नहीति आज्यापत्यवत्स्महोत्यत्रो विनाप्येकशब्देणादा
नं समुदायापत्तिः स्यात्तत्वे तदिहेति दर्शयितुं नानावाक्येत्युक्ते एकसंज्ञालाभफलमाह तत्रश्चे
ति वसंते वैश्वदेवेन यजेतेत्यादिरादिशब्दार्थः ननु तथाप्यामिक्षायागस्यैव प्राचीनप्रवणादि सं
बंधस्यादिति शंकते नन्विति आनर्थक्यं स्फुटयति आमिक्षेति मत्त्वपीति वैश्वदेवेन यजेतेत्य
नुवादाभावेपि प्राचीनप्रवणवाक्येनैव देशसंबंधः स्यादित्यर्थः ननु लक्षणतो वरं गुणविधिरत्रा श्री रामः
ह नचेति ननु वाक्यभेदभयोगेनैव समुदायनामत्वसिद्धौ किमनुवादेन तत्राह तदनेनेति सति ९०

स्यत्ववादे एतेषु कथं वैश्वदेवनामप्रवृत्तिरित्याकांक्षायां ब्रूयात्तेनेति भावः ननु तर्हि विषम
शिष्टविकल्पादिदोषाभावाद्देवताविशिष्टकर्मान्तरविधिरस्तु तत्राह सतिचेति प्रकृतप्रत्ययः प्र
त्ययमित्राहवींषीति नव प्रयाजा इज्यंते नवानूयाजाः अष्टौ हवींषि द्वावाघारौ द्वावाज्यभागौ त्रिंश
त्संपद्यंत इति त्रिंशदाहुतिसंपत्तिवचनमनुपपन्नं स्यात्कर्मान्तरविधौ तद्विधासहाग्नेयादीनां न
वत्वादित्यर्थः देवतामात्रविधिपक्षोऽपि तुल्यमिदं सर्वेषां विश्वदेवदेवताकत्वेन संप्रतिपन्नदेवता
कत्वाद्विधामाङ्गत्वे क्यादिति ध्येयं॥ ॥पूर्वं॥ ॥आदित्यं चरुं निर्वपेदष्टाकपालो विरा
जैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति यद्द्वादशकपालो
जगत्यैवास्मिन्पशून्दधाति यस्मिं जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशु
मान्भवतीत्यत्र श्रूयते नामधेयमिति प्रसंगाभिप्रायमेकवचनं तदर्थमिति कर्मणामुणविध्यादि
पक्षद्वयार्थमित्यर्थः अत्र किमेते समशिष्टा विषमशिष्टा वेति संशयशरीरं तत्राद्यवेत्स्यतः प्राक्र
मेनैकधा समशिष्टतालाभप्रकारो दर्शितः उपरितनेन विषमशिष्टतालाभप्रकारः तत्र समशि

पूत्वेगुणविधिर्विषमशिष्टत्वेफलायगुणविधिरितिफलफलिभावः द्वादशकपालत्वसन्निधिशिष्टो
न्येतत्त्वन्नाशिष्टाइत्यनेनेनगुणविधावेकवाक्यत्वासंभवस्फोरणान्नतएवार्थवादत्वसिद्धेरर्थ
वादसिध्यर्थनकोपंतरमुक्तपूर्वपक्षमाह नचेति विध्यानरदेवनाप्रकृतयागपरत्वेध्यानर
मितिपदस्याग्रयमंतनयाविपरिणमय्याष्टाकपालादिषाष्टानांतत्त्वमानाधिकरण्यादष्टाकपा
लादिषुविधित्सितात्वष्टत्वादीनांसहस्वेभवन्न्यायेनद्वादशसुसत्वात् द्वादशकपालविधिनेवप्राप्ते
स्तत्प्ररव्यन्यायेननामत्वमित्यर्थः नत्रैवहेत्वंतरंतन्त्रख्येति तदभावमुपपादयति तथाहीति नद्वाद
शेति तयाचविधित्सितस्याष्टसुकपालेषुसंस्कृतस्यपुरोडाशस्यद्वादशकपालविधानेनात्वाभा
न्नतत्प्ररव्यनेति भावः अमुमेवार्थविवृणोति यद्दत्यादिना पुरोडाशांतराभावेपिद्वादशकपालसे
वाष्टसुसंस्कृतत्वादस्ति द्वादशकपालविधितात्पर्यमित्यत आह नचेति सापेक्षत्वात् चतुः
संख्यासापेक्षत्वात् अष्टभिरिति संस्कृतंभक्षाइत्यत्रतत्रोश्रुतमप्येषइत्यतस्तत्रैत्यधिकारादष्ट
स्वितिवक्तव्यत्वेप्यधिकरणसेवसाधकत्वविवक्षयान्तृतीयानिर्देशोबोध्यः असौद्वादशकपा

लः असामर्थ्यात्त सामर्थ्यं नैरपेक्ष्यं तदभावात् सामर्थ्यः एकविधिरिति सामर्थ्यापेक्षस्तद्धितोऽष्टाकप
लशाद्धान्न स्यादित्यर्थः तद्धिताभावे तद्धितार्थविषयभूते विधीयमानः समासोऽपि न स्यादिति भावः
द्रव्यकपालानां च वैश्वानरवाक्या देवशाप्तिं मत्वा न आह अष्टत्वेति अष्टत्वादीत्यर्थः न च द्वा
दशत्वस्य षष्ठत्वादेः आपन्नत्वात्तत्र ख्यातेव स्यादिति पंकांतस्याः परिच्छेदकत्वेनैव विधिन्वितत्वात्ते
न रूपेणापत्तेरष्टत्वसंख्यायाः स्वनिर्देशात् अप्राप्त्यावपि एतदर्थं विधानेन नवत्वादिना बाधो भावा
र्थमिति भावः एकं हीति अष्टाकपालादीनां द्वितीयांततया विपरिणामे वैश्वानरमष्टाकपालं
नवकपालं दशकपालमेकादशकपालं द्वादशकपालं निर्वपेदित्येकवाक्यसमावेशात्सर्वेषामुत
त्तिशिष्टत्वेत्यर्थः विभक्तिविपरिणाम एव दोषः भवतीत्यस्मगायत्र्यैवेनमित्यादेश्चात आह एषेति
देवताविशिष्टेति देवतामात्रविशिष्टेत्यर्थः ननु वैश्वानरवाक्ये द्वादशकपालस्यापि श्रवणात्क
थं देवतामात्रविशिष्टयागविधिस्तत्राह उपक्रम इति गुणवाक्येति पदष्टाकपाल इत्यादिवाक्यगतसर्व
द्रव्योपलक्षणार्थो न द्वादशकपालमात्रपर इत्यर्थः आनर्थक्यादिति द्वादशकपालद्रव्येणैव द्रव्याका

शा॰प्र॰
६२

क्षाशांतेरितिभावः सिद्धांतयति उच्यत इति कर्मणि गुणविधिं दूषयन्सर्वेषामुत्पत्तिशिष्टत्वं तावद्दूष
यति उत्पन्नीति अर्थभेदान्नन्नत्रासंविक्षेपभेदात्ननु विपरिणामे नैकवाक्यतेत्यत आह निर्वपतीति
निर्वपतिपरप्रत्ययेनेत्यर्थः सचेति निर्वपातेरित्यर्थः नप्रथमेति विपरिणामः प्रागेव दूषितइतिभावः
नह्यादशकपालस्येति उपक्रमगतस्येति शेषः विवक्षायोग्यत्वाद्विवक्षितसामानाधिकरण्यमाह वै
श्वानरेति सामानाधिकरण्ययोग्यत्वाद्द्वितीयांतेतिसकर्मकनिर्वपत्याकांक्षितत्वेनापि विवक्षांसू
चयति निर्वपतीति नन्वष्टाकपालाद्यानर्थक्यापत्यातद्विवक्षेत्यत आह अष्टत्वेति अन्यथेति वक्ष्य
माणस्तुत्यर्थत्वेनेत्यर्थः फलायत्तिगुणविधिपूर्वपक्षमुत्थापयति अथेति अत्र ब्रह्मचर्यसादीनांसा
ध्यत्वबोधकमिपदस्याष्टाकपालादीनांसाधनत्वबोधकविभक्तिपदस्य चाश्रवणेपि कर्मणि गुणविधे
र्दूषितत्वात्पुनातीत्यादिस्तुतिबलात्प्रवृत्तौ तत्स्वाविधित्वं प्रकल्प्य ब्रह्मचर्यसादेरपि कथंचित्फल
त्वमगत्याकल्प्यमितिभावः ब्रह्मवर्चसादीनि ब्रह्मवर्चसादिहेतुकपूतत्वादीत्यर्थः उत्पत्तिशि
ष्टगुणावरोधं विघटयति काम्य इति गुणे विधि विधीयमाने विति शेषः ननु मोदोहनादि

श्रीरामः
९२

विधिर्विधिवनासेदोषस्तत्राह उपक्रमेति तत्र दर्शपूर्णमासादिष्वाग्नेयाद्यवान्तरवाक्यैः कर्मविधौ
पर्यवसिते फलाय गुणविधिरिहेतु वैश्वानरविधेः पशुमान्भवतीत्यतः प्रागवान्तरवाक्यस्यैवापर्यवसा
नान्नोक्तसंभव इति वैषम्यमिति भावः एतदभिप्रायेणैव श्लोकं व्याचष्टे वैश्वानरमिति नामैवेति अ
नेन श्रुतत्वादीनां प्रधानगतत्वावगतेर्न गुणफलत्वं न्याय्यमिति सूचितं न नु विधिनात्वेकवाक्यत्वादि
ति न्यायादविहितं न स्तोतव्यमित्युक्तं तत्राह द्वादशेति अष्टाकपालादिशब्दैरष्टाकपालादिसदृशा
नां द्वादशकपालावयवानामेव निर्देशात्तत्स्तुत्या चैको द्वादशकपालः प्रशस्तो यजनद्वयवोध्य
कपालादिरेव स्तुतत्वादिहेतुरिति स्तुतिलाभ इत्यर्थः सत्रे सर्ववतः सर्वप्राप्तिमतो वैश्वदेवादिशब्दाः स्व
लगुणविधानार्थानि भवन्तीति अष्टाकपालादिसमाम्नाये गुणविधानसामर्थ्यं स्यादिति अनेन संग
निर्दर्शिता ॥ ॥तत्सिद्धिः॥ ॥ नामेति किं नामधेयमुत गुणविधिरर्थवाद इति संदेह इत्यर्थः नामधे
यमिति न च नाम्नो विधेयत्वाभावात् द्रव्यविधेयान्तरस्य चाभावाद्वाक्यानर्थक्यं शंक्यमुत्तरं बर्हि
षः प्रस्तरं सादयतीति प्रस्तरस्य बर्हिष्परिभावकरणविधिस्तुत्यर्थत्वात्प्रस्तरस्य यजमाननामक

शा॰प्र॰ २३

93

त्वेहि प्रज्ञावेव बर्हिरित्यनेन बर्हिषः प्रज्ञानामकत्वे सति प्रसिद्धयजमानस्य प्रसिद्धप्रज्ञोपरि भाववत्प्र
स्तरस्य बर्हिरूपरि भाववद्दत्योचितत्वेन स्कृतिर्लभ्यते न चार्थवादपक्षाद्भेदः नत्र साक्षात्स्कृतिरिह
गुणार्थपर्यणेति भेदादिति भावः एवं स्कृतिलाभार्थमेवाह यजमान शब्दोवेति अनेकार्थत्वस्यान्याय्य
त्वात्सामानाधिकरण्यस्य वक्ष्यमाणरीत्याप्युपपत्तेर्नीमत्वपक्षस्यापादसंगतिमात्रार्थत्वं सूचयि
तुं शंकेत्युक्तं सिद्धान्ताभिमतमर्थवादत्वं निरस्यति नचेति अपेति अनेन पूर्वैवसम्पात्तसंगतिः शि
लिस्तु चिन्तं अन्यस्यान्यत्वविध्ययोगादाह कार्यइति विनिगमकमाह नत्रापीति सुगिति प्रस्तरे जुहू
सादयति सर्वाः स्रुच इति स्रुग्धारणं प्रस्तरकार्यं श्रूयते दिनात्र प्रस्तरपाणिः परिधीन्परिदधातीत्यादि
स्वपदार्थेति । द्वितीयाधारान्वारंभणमाह विशिमिमर्शनेऽन्वारंभणादिरूपेत्यर्थः । यजमानकार्यपि त्व
ध्वर्युर्वीकरिष्यातिविधिबलादेव स्रुग्धारणादौ यजमानप्रस्तरयोर्विकल्पे सति पाक्षिक यजमाना
नुष्ठानेनन तस्य याजमानसमाख्योपपत्तेरित्यस्वरसादाह प्रस्तरवदिति प्रहरणमहोममयोः प्रस्तरैक
कपालपुरोडाशप्रतिपत्तित्वेन तत्कार्यत्वाभावे पि प्रतिपत्तिक्रियायां तयोरार्थिके साधनत्वमस्तीति

श्रीराम॰ २३

प्रहरणादेस्तत्कार्यत्वोक्तिः प्रहरणस्य तु यागत्वमप्रसक्तमिति प्रस्तरस्य तत्र गुणत्वादपि तस्य प्र
स्तरकार्यत्वं बोध्यं सर्वतंत्रेति एवमाने छिष्ठेव यजमानस्य प्रस्तरवत्प्रहरणाद्यर्थ इत्येमा स्यादिसर्वतं
त्रत्वोपपत्त्यर्थः । वस्तुतस्तु विधिकल्पनागौरवाद्द्वैध्यं तेरेकवाक्यतायाः स्पष्टत्वाच्च न गुणविधित्वं
किंत्वर्थवाद इत्युपसंहरति तस्मादिति एवमग्रेपि गुणविधिपक्षनिरासो बोध्यः । पदप्रवृत्तिनिमि
त्तेन धर्मेण सक्तीति मार्शंकामाह सामानाधिकरण्यं चेति पदान्तरार्थे परपदप्रवृत्तिनिमित्तस्येवासंभवः ।
अन्यथा पदयोः करहस्तवत्पर्यायत्वापत्त्या भिन्नप्रवृत्तिनिमित्तयोरेकार्थ्यरूपसामानाधिकरण्य
न स्यादिति भावः । गुणादिति स्वार्थनिष्ठगुणजातीयगुणनिमित्तान्तरशब्दस्य परत्वप्रवृत्त्यासक्तति
रतो न पर्यायतानापि सामानाधिकरण्यानुपपत्तिरित्यर्थः । वाच्यस्येव प्रवृत्तिनिमित्तत्वाद्गुणस्य
चावाच्यत्वान्नोक्तसंभव इत्याशंकते कथमिति न वाच्यो गुणो निमित्तं किंतु लक्ष्य इत्याह नेति बोध
यति लक्षयति सचेति स्वार्थो यजमान इत्यर्थः स्वकार्यं सांगप्रधानं तत्कर्तृत्वं गुणं सबंधादाश्रया
श्रयिभावरूपात्तद्गुणलक्षणया प्रस्तरे किं तदाह नचेति प्रस्तरस्यापि सांगप्रधानरूपकार्यक

रत्वादिति भावः ननु लक्षितगुणसंबंधात्समारप्रतीतौ द्विरेफादिषु च लक्षितलक्षणास्यात्तु गौणी
नामवृत्त्यंतरं तत्राह एवमिति लक्षितगुणवत्त्वतात्पर्येण प्रवृत्तशब्दव्यापारो गौण एव यथा सिंहो माणव
क इति न माणवकस्य सिंहसंबंधप्रतीतिर्विवक्षिता किंतु सिंहपदमुख्यार्थसिंहसंबंधिक्रौर्यादिगु
णवत्त्वमिति सिंहशब्दस्य गौणी वृत्तिरस्त्येवेत्यर्थः केचित्तु लक्षितलक्षणा व्यवहारस्य लक्षणा द्वयक
त्वमात्रादिति बोध्यसंबंधित्वमेवानादरस्य च नायसहशा इति साहश्यनिर्वाहाय तद्गुणशालितेति
केचित्तु परस्पराः स्वार्थाध्यारोपप्रवर्तने तथा चाध्यारोपार्थत्वं गौणत्वमित्याहुः तत् दूषयति न
चेति तदभावादिति प्रयोक्तृ इति पञ्चार्थिशेषदर्शितेनाध्यारोपविवक्षाप्रतिपत्योरभावादित्यर्थः
तदेवोपपादयति नहीति प्रतिवाद्युक्तस्य संतासत्वख्यापनाय खपुष्पमेव त्विदं तत इति प्रयोगे
खपुष्पादीनामत्यंतासत्त्वेन मुख्यार्थाभावेन तद्गुणयोगाभावादारोपितार्थत्वमेव गौणत्वमिति श
केन कथमिति तर्हि तवापि मुख्यार्थाभावात्तदारोपासंभव इति दोषसाम्यमाह यदीति प्रतिबंधा
ननुत्तरत्वात्स्वयमेव तं परिहरति तेनेति अभिधेयाभावे आरोपायोगेन तद्रूपमभिधेयस्वरूप

तदु

मेवप्रथममारोपितं त्वयांगीकर्तव्यमित्यर्थः। ननु तर्हि किं तत्राह ननुश्चेति मुख्यत्वादितिनत्व
नारोपितत्वकृतं मुख्यत्वं किंतु दृष्टसंनतरमनपेक्ष्य प्रयोगकृतमिति भावः। अन्यत्रेति उदाहृत
सिद्धांतादावित्यर्थः। तासत्वमुख्यार्थसाहश्यमादाय गौणत्वं युक्तमित्यर्थः। यद्युक्तं प्रतिबंदीपरि
हाराय परत्र मुख्यार्थारोपमादाय गौणत्वं परैरेणनेष्यते किंत्वारोपितार्थत्वमात्रेन तदा दोषमाह त्व
दितिरत्वपुष्पशब्देनाभिधानार्थमेवरत्वपुष्पादेरारोपितत्वादिति भावः। प्रयोगप्रयुंजनद्वितिणकेप्रचनी।
तिवत्प्रयोगं कुर्वतीत्यर्थः। ननु तत्संतासतां कथं साहश्यप्रतियोगित्वमपीत्याशंक्याह यथेति आका
शादीनामेवात्र साहश्यप्रतियोगित्वं तेषां खपुष्पादिरूपेणासत्वेपि स्वरूपेण सत्वान्नानुपपत्ति
रिति भावः। ननु प्रयोक्तृप्रतिपत्त्रोर्विशेषदर्शनेप्याहार्यारोपः प्रतिमासु देवतात्वारोपवदालंका
रिकाणां रूपकस्थलेमुखे चंद्रत्वारोपवच्च संभवत्येवान्यथाकाशादीनां पुष्पाद्यात्मनाभिकाप्रि रो३
कथं बुद्धिमारोहेत्तथाचारोपितार्थत्वं गौणत्वं नेष्यमितिचेत्तत्र संवेदस्यारोपितार्थस्वीकारे प्रत्रा
माण्यप्रसंगात्तद्वक्ष्यते नदेयद्दत्यत्र तातपर्यादिरेण त्वमन्यथासमर्थ्यतेऽदंचात्र बोध्यं अत्र गौण

शा॰ प्र॰ ९५

95

वृत्तेर्लक्षणमात्रमुच्यते गुणमुख्याधिकरणेन तत्समन्वयः अर्थैकाद्यधिकरणगुणसूत्रेषु चैतत्सिद्धानु
वाद इति न तो भेद इति सूत्रे तस्य मुख्यस्य सिद्धिः कार्यं तत्कार्यकरत्वमिति यावत् तत्र चैव ग्रामाणजात्या
दयश्चैते गौणवृत्तेराश्रयाणि निमित्तानि निरूढत्वस्यैकसूत्रत्वेऽपि बाहुल्येनोक्तयोर्थं प्रत्याधिकरणमभे
न लेखः॥ ॥ जातिः॥ ॥ पूर्वन्यायातिदेशात्संगतिः गुणविधित्वमग्निकार्ये होमादौ ब्राह्मणवि
धित्वं ननु विशेषाशंकाभावाद्व्यर्थमिदं तत्राह निमित्तेति सूत्रांतरं सूत्रैकदेशांतरं प्रयोज्यमधिक
रणांतरं उत्तरेति उत्तराणि पंचाधिकरणानीत्यर्थः तथा च तत्र संगताव पुनरुक्तेनातीव्यति
व्यमिति भावः आकृतिश्रमत्वारयति जननमिति जननमात्रस्यातिप्रसक्तत्वादाह सा वर्पीति मुख्या
र्थेन सहजन्मनिमित्तमिति भावः अर्थवाद इति प्रजापतिरकामयत प्रजायेयेति स मुखतस्त्रिवृतं निर
मिमीत तमग्निर्देवतान्वसृज्यत गायत्री छंदो रथंतरं साम ब्राह्मणो मनुष्याणामित्यस्मिन्नित्य
र्थः कीर्तिनाविस्य नेनकीर्तनमात्रमेतन्न वस्तुतः सृष्टिरिति सूचितं॥ सारूप्यात्॥ ॥ न एवेति आ
दित्यसाधनककर्मांगोपस्थानादौ यूपसमंजनरापूपंचाहवनीयं च दक्षिणाग्नित्वसंस्त्याहिकालिप

श्रीरामः ९५

यज्ञसामान्य

यूपकार्ये आदित्यस्य वा विधिरिति गुणविधिपक्षो बोध्यः सर्वत्रेति नात्रिध्याद्युदाहरणेष्वपीत्यर्थः
अत्र सादृश्यस्य चाक्षुषत्वेनोद्भूतत्वाट्टिति प्रवृत्तिनिमित्तत्वं प्रतीयत इति स्फारणाय सूत्रे प्रथ
मान्तस्याभिप्रारूप्यस्य चम्योपादानं ॥ ॥प्रशंसा॥ ॥अनाशंकनीयमिति तैत्तिरीये त्वपशवो
वा अन्ये गोअश्वेभ्यः पशवः इति पशुनामेवान्यः इत्यस्य विशेष्यत्वेन श्रवणात् गवाश्वभिन्नेषु पशु गादिषु
नामत्वविरोधादिति भावः एवं च नामप्रशंसा वेत्यत्र नित्रपक्षतया प्रसक्तगुणविध्यर्थविचारतया
प्रसंगतिर्बोध्या ननु पश्वभिन्नघटादिकार्ये जातिदिरशनाविधिरपि न संभवतीत्यत्राह पश्वितिग
वाश्वभिन्ना अजादयः अपशवः पशुकार्यकरा न स्तुरित्यजादिषु पशुकार्यप्रतिषेधो विधीय
त इत्यर्थः अशास्त्र इति प्रत्यक्षश्रुतिविरोधे प्रतिषेधविधिकल्पनाया अप्रयोगादिति भावः प्रशं
सानिमित्तत्वमिति अपशव इति पशुपदलक्षितगवाश्वगतप्राशस्त्याभावं निमित्तीकृत्य प्रयोगा
त्तन्निमित्तघटकतया प्राशस्त्यस्यानिमित्तत्वमित्यर्थः निमित्तशब्दस्य फलपरत्वं मत्वाशंकते नन्विति
नन्वजादिषु पशुत्वाभावो नास्ति कथं प्रशंसा प्रतीतिः कथं च तस्या अजादिषु पशुप्रवृत्तिनि

शा॰ प्र॰ २६ ९६ मित्वगुणत्वमित्याशंक्याह अयमिति उपादायलक्षयित्वा नत्वानन्यपशुपदसमुदायेन कथ्यते ग
वाश्वगवाश्वगतपाशस्याभाववत्त्वेनोज्जादय इति बोध्यते अयमर्थः अपपशुशब्दस्य पशुभिन्नो घटा
दिर्मुख्यार्थः तत्संबंधी च गुणो गवाश्वगतपाशस्याभावः तत्र पशुपदेनैव पाशस्य मात्रं लक्ष्यते
न तु समुदायेनाभावात्तः पशुपदलक्षितपाशस्य नञर्थान्वयमात्रेणोक्तपाशस्याभावोपस्थि
तिसंभवात्तमेव च गुणनिमित्तीकृत्यापशुशब्दोन्यपरार्थेषु जादिषु प्रवृत्तेर्गौण इति न चैवं समुदाय
स्योक्तपाशस्याभाववद्गुणलक्षकत्वाभावे लक्ष्यमाणगुणयोगाद्वृत्तेर्गौणीत्वानिकविरोधः वार्ति
कस्य लक्षणामूलकत्वोतीति कत्वार्थत्वोपपत्तेरिति भावः लक्षणाबीजमनुपपत्तिमाह नहीति अव
श्यं चेति अपशुशब्दस्य पश्वंतरवाच्यन्यशब्दसामानाधिकरण्यादिति भावः ननु पशुशब्दस्य स्वार्थ
गतं पाशसंयं विहाय कथं गवाश्वगतत्वल्लक्षणासामर्थ्यं तत्राह शक्नोतीति एकवाससताचात्र समभि
व्याहारमात्रं समासांतर्गतपशुपदस्य गवाश्वपदैकवाक्यतालाभायोगात्तथा चाजादिषु पशुसामा श्रीराम॰
न्यपाशस्य पर्युदासानुपपत्त्या योग्यतया समभिव्याहारोपस्थितगवाश्वगतमेव पाशसंयं लक्ष्यत २६

इत्यर्थः ननु परस्मात्प्राचीनमस्य स्योपदधाति पश्चात्प्राचीनमृषभस्येति विध्येकवाक्यमिदं
गवाश्वप्राशास्यपूर्वं तेच्च प्राशास्यं समामासानगतेनपशुपदे नैव लब्धमित्यजादिषु तन्निषेधो व्य
र्थ इत्याशंक्याह एतदिति । इतरप्राशास्यानिषेधमुखेन प्राशास्योक्तावतिशयलाभान्न निषेधान
र्थक्यमिति भावः । अपशुपदस्यागौणत्वोपपादनमुपसंहरति सोयमिति अपशूनां घटादिग्र
हणार्थीनां ॥ ॥ ममा ॥ ॥ पूर्वं वैषम्येणोत्थानात्संगतिरिति सूचयन्पूर्वपक्षयति तत्रेति
स्वष्टिलिंगेति स्विष्टिप्राद्योहितद्वानामप्रधानो मंत्र इतीष्टकासु लुकृच मतोरिति सूत्रेण
स्वष्टिमानामप्रधानउपधानार्थो मंत्र इत्यस्मिन्नर्थे यत्प्रत्यये मतुब्लोपे च सति षाडसले
न यत्प्रत्ययलोपान्निष्पन्नः स्वष्टिशब्दवन्मंत्रोपधेयेष्टकावचनः तत्र विशेष्यभूतानामिष्ट
कानामिष्टकाभिरग्निं चिनुत इति वाक्येन प्राप्तावपि विशेषणभूतमंत्रविधिसंभव इति भावः सि
द्धांतमाह नैवमिति लिंगेति मंत्रेषु प्रधानप्रकाशकपदाभावे पि कथंचित्सामर्थ्यकल्पनं मत्वा
लिंगोपन्यासः लिंगप्रकरणाभ्यां प्राप्तावपीमामगृभ्णान्निति मंत्रस्यैव विधिमाशंक्याह न

त्रेति इदं यज्ञा वाहः सा चेति अत्र विनियोजन कवचन रहित आकरणि कमंत्रांतरपरिसंख्यायाम अ-
न्यपरिसंख्यात्वात्रैदोष्यात् उपसंस्कारपि विधेरितरनिवृत्तिमात्रफलकत्वेन जघन्यत्वं यमित्यत्र नान्य-
थेति तदुक्तिः आनर्थक्यमिति इदमापातितः ग्रहणासादनादौ विनियोगसंभवात् तस्मादिति नव-
न्वयं न विधिन एव प्राप्तमुपधानं न विधेयमिति शंकां समुदित रूपेणापि इष्टकानां स्थापनसंभवेन
प्रत्येकोपधानाप्राप्तेरिष्टकोद्देशेनोपधानविधौ तु प्रति प्रधानं गुणावृत्त्या प्रत्येकोपधानसिद्धेः २
एवमाध्वर्यवसामाख्यातकारविधानाद् अध्वर्युकर्तृकत्वसिद्धेः स्तन चैवमेकेनैवोपधानविधिना प्र-
त्येकोपधानस्याध्वर्युकर्तृकत्वस्य च सिद्धेः ब्रुवं सीदपदधाति चित्रिणीरुपदधातीत्यादि विध्यंतरवै-
यर्थ्यं स्यादिशनानां तत्रात्रिष्टकातिधानेन व्युष्ट्यादीष्टकानां विध्यसिद्धेः सामा समपि प्रत्येकोप-
धानाध्वर्युकर्तृकत्वसिद्धये वाक्यांतरे सन्निधि आवश्यकत्वादिति भावः कथं तर्हि भाष्ये र्थवादत्व सि-
द्धांतस्तत्राह स्त्रष्टीति इत्थमुपधाने प्रशस्त्यं तु स्त्रष्टिपदवन्मंत्रैः क्रियतैतत्तो हि यथा स्त्रष्टं ब्रह्म-
णा यानि स्त्रष्टान्यनुवाक्ये कीर्तितानि तान्यनतिक्रम्य तदतिरिक्तमनिज्ञं विघ्ननिरसेति यावत्स

मि२

वीणि ७ म्नानि यजमानः प्राप्नोतीत्युपधानमन्त्रं तु पणस्यार्थस्य सृष्टिपदेन मंत्रानुवादात्सृष्टिपदमात्रमर्थ
वादद्वत्यर्थः साधारणेति कल्प्यसामर्थ्यस्य प्राकरणिकसर्वसाधारण्यादिति भावः ननु चयनप्रक
रणाम्नातानां चयनाव्यवहितसंबंध्युपधानमेव प्राप्तिमत्तत्राह सत्यामिति यां वै कांचन ब्राह्मण
वतीमिष्टकामभिजानीयात्तां मध्यमचितावुपदध्यादिति वचनेनाभिपूर्वस्यज्ञानातेः अप्रत्यक्षा
र्थकृतयाप्रत्यक्षब्राह्मणविहितेष्टकानां चयनसंबंधिविहितपंचकमध्यमचितौ प्राप्तिरिति पंच
मेवस्यमाणत्वात्तत्सिध्यर्थविधानमित्यर्थः अत्रेष्टकानां प्रत्यक्षब्राह्मणाविहितत्वं नामप्रत्यक्ष
ब्राह्मणाविहितमंत्रकत्वमेव तथा च मध्यमचितौ मंत्रातिरिक्तप्राप्तिस्विकरूपेणेष्टकाविध्यभावेपि
न क्षतिः वक्ष्यतीति सूत्रकार इति शेषः ब्राह्मणवत्यः प्रत्यक्षब्राह्मणविहिताः ननु पूर्वत्रार्थवादा
नामेवोदाहरणात्सु विधेयार्थकसृष्टिपदोदाहरणमसंगतं तत्राह न चेति सृष्टीनां सृष्टिमंत्राणांत्व
विधानमविधायकं अर्थवादरूपमुदाहरणमिति यावत् गुणेति यत्किंचिदुदाहरणेपि गुणनि
मित्तत्वसिद्धेरिति भावः भूमांबकृत्वं भूम्नोमुख्यामुख्यसाधारण्यमुपपादयन्गुणवृत्त्यापरत्वे

शा॰ प्र॰ २८

98

रश्मांश्च ब्रह्मन्निंदर्शयिष्यति स्तृणातीति एकसमुदायावच्छिन्नसमुदायिष्वित्यर्थः एवमग्रेऽपि समुदायग्रहणेन तु
प्रत्येकं बहुत्वानन्वयात्तद्योग्यत्वार्थं अस्तृणीति आद्यचतुर्दशांतिमेष्वेकयास्तुवत समप्रविंशत्या
स्तुवत नवयस्त्रिंशतास्तुवत तेषु तेषु स्तृणातिशब्दाभावादस्तृणातिलेखनस्य स्त्वित्वावश्यकत्वात्स प्र
दर्शोपदधातीत्युपसंहारे समहदशात्वसंख्यायाः स्तृणातिशब्दहितानामपि संग्रहादिति भावः॥ ॥लिंग॥ ॥
प्राणभृत इति अत्रायं पुरो भुवस्तस्य प्राणो भौवायनो वसंतः प्राणायनः आगंग हत्वाभिप्रजा
भवइत्यादिषु मंत्रेषु प्राणभृच्छब्दाभावेऽपि प्राणं प्राणशब्दं बिभ्रतीति प्राणभृत इति मंत्रेषु मंत्रोपधे
येष्टकासु च मंत्रद्वारा प्राणशब्दभरणात्प्राणभृच्छब्दो बोध्यः वक्तव्यमिति संशयपूर्वपक्षादिकमि
ति शेषः तत्रैतस्य वप्राणं दधातीत्यादिर्यद्वाधोद्रष्टव्यः अधिकरणे वेष्टका अपि परिहरतीति मित्रोति
अत्र प्राणभृत उपदधातीत्यनंतरं अयं पुरो भुव इति पुरस्तादुपदधातीत्यादिपर्यायपंचकोन दशा दशो
पदधातीति पंचाशत्संख्याया प्राणभृत्त्वरहितानामपि संग्रहात्प्राणभृत्प्राणभृत्त्वं च बोध्यं
सर्वत्रेति आपिकाभिप्रायं स्तेनं मनइत्यादौ प्रच्छन्नत्वादिना पिगोणत्वमप्यग्रे शेषः केः सन्नेति

श्री एम॰ २८

गवतां मंत्राणां समवायः संबंधमात्रमल्पत्वमिति यावत्॥ ॥ मंदि॥ ॥तदर्थमिति विरोधे विध्यु
द्देशप्राबल्यात्तदनुसारेणायेन केनचिदंजनमविरोधेर्थवादानुसारान्नु घटते नैवेति फलफलि ८८
भावः नेतीत्यनंतरं संशयइत्यनुषंगः केनांजनमिति विचारस्य प्रामाण्यविचारासंगतिमाशंक्या
ह स्तावकत्वेनेति विध्यर्थवादमंत्रनामधेयरूपवेदावयवानां विधायकत्वपक्षात्तयोर्विच्छेदकत्वा
रव्येस्तत्तदवयवव्यापकरूपैः प्रामाण्ये उक्तेऽर्थवादैकदेशस्य कस्यचित्स्तावकत्वातिरिक्त
प्रकारेण प्रामाण्यव्युत्पादनस्य प्राभावमरेत्वात्संगतिरित्यर्थः पादसंगतिस्तु नामधेयापवादत्वे
न प्रसक्तार्थवादश्च संगाह्योध्या तृतीयत्वज्ञात . संजनक्रियायाः साधनद्रव्यापेक्षत्वादिति भावः
ननु प्रधानमपि विधिरूपक्रमाधिकरणेऽर्थवादानुसारेणान्यथानीतं तत्स्येहाप्युक्तंतत्राह अक्र
मस्यत्वादिति तत्रोपसंहारगतो विधिरिति वैषम्यमिति भावः अप्राप्तेति अपूर्वत्वेनासंजातविरो
धीत्यर्थः प्रधानमिति प्रेरणात्मकशब्दभावनात्वाद्विधेः प्राधान्यं तदिति कर्तव्यतात्वात्तु कितिर
गमित्यर्थः कांस्यभोजिन्यायेनविधेः संकोचो नशक्य इति सूचयन्नाह विधिश्चेति यथाश्रुतः अस

शा॰ भ॰
९९

९९

कचितः यत्र गुणानुरोधे प्रधानस्य न किंचिद्बाध्यं तत्रैवोक्तन्यायो न त्विह तैलादिविषये बाधापु
त्तिरिति भावः ननु विधेः प्ररोचनार्थमपेक्षितादर्थवादादंजनसाधनद्रव्यलाभेन सामान्यापे
क्षत्वायोगस्तत्राह विधेश्चेति उपक्रमो कल्पयिष्यामो विधेरिति न्यायेन विधेरेव प्ररोचनाश
क्तेरपि संभवान्नार्थवादापेक्षेति भावः नवास्तीति सामान्यविषयविधिना घृतव्यावृत्त्या विशेषां
तराबाधनादिति भावः सामान्यस्य प्रत्येकपर्यवसानादपि न विशेषेण विरोध इत्याह न हीति
अस्मिन्नर्थे श्लोकं व्याचष्टे सामान्यं हीति ननु सामान्यस्य विशेषे संकोच एव बाधस्तत्राह अ
वध्यं चेति व्यवहारायविध्यनुमतः संकोचो न दोष इति भावः ननु घृतशब्देन घृतान्तरविशेष
मनपेक्ष्यैव विधिनापि विशेषमनपेक्ष्य व्यवहारः स्यात्तत्राह तत्रेति घृतविशेषेण प्रमाणं घृते
त्वस्तीति वैषम्यमिति भावः। अर्थवादे घृतेनांजनकर्तव्यता न प्रतीयते तत्राह स हीति एवं च प्र
त्यक्षस्तुतिबलाद्धृतविध्यवश्यंभावे विधेरेव स्तुतिशक्तिकल्पनेन नैतैलाद्याक्षेपकत्वं गौर
वहतमिति भावः सोत्र संदिग्धे विधावर्थवादरूपवाक्यशेषात्तद्विषयत्वकल्पना॥ ॥श्री॥ ॥

श्रीभाष्यः
९९

सामर्थ्यरूपलिंगविचारस्य तृतीये संगतिर्नास्तीत्यत आह विधेरिति अप्रवृत्तिपादिति विधायकत्वेनेत्या
दिः अर्थवादरूपवेदावयवस्यन्ताक्कव्यतिरेकेण प्रामाण्ययोक्तो न तु वेदविधिरूपावयवस्यापि
विधायकत्वातिरेकेण विधान्तरेण प्रामाण्यव्युत्पादनमत्रैव संगतमितीहानौ मित्यनेन सूचितं
विचारायाववदानविषयमाहावदाने चेति यथा सामर्थ्यमितिह स्तस्य पुरोडाशावदाने स्रुवस्य द्रव्याव
दाने स्वधितेर्मांसावदाने चेत्यर्थः इतीति संशय इति शेषः संयोगेति अत्यन्तेत्यादिः आक्रोश इत्युक्तो
शः ईषद्धिकसितसुकलसदृशो न त्वेसंतहस्तयोः संयोग इत्यर्थः अनियमकोटिमुक्त्वा नियम
कोटिमाह आक्रोश एवेवेति तत्र सामर्थ्याद्धि ह्येवंविस्थितार्थकल्पना स्यात् सामर्थ्यकल्पितं
शब्दस्य विधिवाक्यैकदेशत्वात् तद्बुद्धिसौकर्यार्थमेतदध्यायार्थबुद्धिर्याद्यध्यायार्थजातं च श्लोके
न संगृह्णाति नामेति चरितमाचारः॥ ॥ इति श्रीचैतकनाथकृता शास्त्रदीपिकाव्याख्या
नेप्रकाशाख्याने प्रथमाध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः १ १ ॥

30

32

शास्त्रदीपिकाप्रकाशप्रथमाध्यायसमाप्त चतुर्थपादः

प्रथमाध्यायस्य द्वितीयतृतीय चतुर्थपादः

